# मनीषा

(संस्कृतविषयिणी वार्षिकी DOUBLE-BLINDED
विशेषज्ञसमीक्षिता शोधपत्रिका)

# MANĪṢĀ

(A Research Journal of Sanskrit)
DOUBLE-BLINDED PEER REVIEWED JOURNAL

**ISSN : 2583-2271**
**Vol.-5 No.-1**
**2025**

सम्पादकौ
डॉ. गगनचन्द्रदे, डॉ. सुमन्तचौधुरी

स्नातकोत्तरसंस्कृतविभागः
सबं-सजनीकान्तमहाविद्यालयः
लुटुनिया, पश्चिममेदिनीपुरम्-७२११६६, पश्चिमबङ्गः

# मनीषा

(संस्कृतविषयिणी वार्षिकी DOUBLE-BLINDED
विशेषज्ञसमीक्षिता शोधपत्रिका)

# MANĪṢĀ

(A Research Journal of Sanskrit)

**DOUBLE-BLINDED PEER REVIEWED JOURNAL**

**ISSN: 2583-2271**
**Vol -5 No. 1**
**2025**

सम्पादकौ
डॉ. गगनचन्द्रदे, डॉ. सुमन्तचौधुरी

स्नातकोत्तरसंस्कृतविभागः
सबं-सजनीकान्तमहाविद्यालयः
लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः

# मनीषा

## (संस्कृतविषयिणी शोधपत्रिका)


### मुख्यसम्पादकः

**अध्यापकः (डॉ.) तपनकुमारदत्तः** — अध्यक्षः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागरविश्वविद्यालयः

### सम्पादकौ

**डॉ. गगनचन्द्रदे** — सहाचार्यः, विभागाध्यक्षः (स्नातकोत्तरीयस्तरः), स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्त-महाविद्यालयः, विद्यासागरविश्वविद्यालयः

**डॉ. सुमन्तचौधुरी** — सहायकाध्यापकः, विभागाध्यक्षः (स्नातकस्तरः), स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्त-महाविद्यालयः, विद्यासागरविश्वविद्यालयः

### सम्पादकमण्डली

**अध्यापकः (डॉ.) बिष्णुपदमहापात्रः** — आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविश्वविद्यालयः, निउ-दिल्ली

**डॉ. केशवचन्द्रमहापात्रः** — अध्यक्षः, नरेन्द्रनाथसंस्कृतमहाविद्यालयः, प्रियबागः, ओडिशा

**डॉ. चन्दनभट्टाचार्यः** — आचार्यः, संस्कृतविभागः, गौरबङ्गविश्वविद्यालयः, मालदा, पश्चिमबङ्गः

**डॉ. सुशान्तकुमारराजः** — सहाचार्यः, केन्द्रियसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा

**डॉ. बुद्धेश्वरषडङ्गी** — सहाचार्यः, श्रीसीतारामवेदिक-आदर्शसंस्कृतमहाविद्यालयः, कलिकाता, पश्चिमबङ्गः

**डॉ. गोपीकृष्णन-रघुः** — सहायकाध्यापकः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्, बेलुडमठम्, हाओडा, पश्चिमबङ्गः

### उपदेष्टृमण्डली

**अध्यापकः (डॉ.) गोपबन्धुमिश्रः** — प्राक्तन उपाचार्यः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातः

**अध्यापकः (डॉ.) गोपालमिश्रः** — भूतपूर्व उपाचार्यः, गौडबङ्गविश्वविद्यालयः

| | |
|---|---|
| | अध्यापकचरः, संस्कृतविभागः, रवीन्द्रभारतीविश्व-विद्यालयः, कलिकाता, पश्चिमबङ्गः |
| **अध्यापकः (डॉ.) गोपालकृष्णदाशः** | अध्यापकचरः, उत्कलविश्वविद्यालयः, भुवनेश्वरः, ओडिशा |
| **अध्यापिका (डॉ.) सर्वाणी गाङ्गुली** | वरिष्ठा फेलो, ICSSR, संस्कृतविभागः, विद्यासागरविश्वविद्यालयः, मेदिनीपुरम्, पश्चिमबङ्गः |
| **अध्यापकः (डॉ.) गोविन्दचन्द्रकरः** | अध्यापकचरः, व्याकरणविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा |

# MANĪṢĀ

## (*A Research Journal of Sanskrit)*


## CHIEF EDITOR

**Professor (Dr.) Tapan Kr. Dutta** — Principal, Sabang Sajanikanta Mahavidyalaya, Vidyasagar University

## EDITORS

**Dr. Gagan Chandra Dey** — Associate Professor and H.O.D. (PG Section), P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, VU

**Dr. Sumanta Chowdhury** — Assistant Professor and H.O.D. (UG Section), P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, VU

## EDITORIAL BOARD

**Dr. Bishnupada Mahapatra** — Professor in Nyaya, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi

**Dr. Keshab Chandra Mahapatra** — Principal, Narendranath Sanskrit College, Priyabag, Odisha

**Dr. Chandan Bhattacharyya** — Professor, Department of Sanskrit, Gour Banga University, Malda, W.B.

**Dr. Susanta Kumar Raj** — Associate Professor in Sahitya, Central Sanskrit University, Shri Sadashiv Campus, Puri, Orisha

**Dr. Buddheswar Sarangi** — Associate Professor, Sri Sitaram Vedic Adarsha Sanskrit Mahavidyalaya, Kolkata, W.B.

**Dr. Gopikrishnan Reghu** — Assistant Professor, Ramakrishna Mission Vivekananda Educational and Research Institution, Belur Math, Howrah, W.B.

# ADVISORY BOARD

| | |
|---|---|
| **Prof. (Dr.) Gopabandhu Mishra** | Formar Vice-Chancellor, Somnath Sanskrit University, Gujarat |
| **Prof. (Dr.) Gopal Mishra** | Former Vice-Chancellor, Gour Banga University, Professor, Department of Sanskrit, Rabindra Bharati University, Kolkata, W.B. |
| **Prof. (Dr.) Gopal Krishna Dash** | Ex Professor, Utkal University, Bhubaneswar, Odisha |
| **Prof. (Dr.) Sarbani Ganguly** | Senior Fellow, ICSSR, Department of Sanskrit, Vidyasagar University, Midnapore, W.B. |
| **Prof. (Dr.) Govinda Chandra Kar** | Ex. Professor in Vyakarana, Shri Jagannath Sanskrit University, Puri, Odisha |

**मनीषा - संस्कृतविषयिणी शोधपत्रिका**

(*Double-Blinded विशेषज्ञसमीक्षिता शोधपत्रिका)*

**MANĪṢĀ** - *A Research Journal of Sanskrit*
*(Double-Blinded Peer Reviewed Journal)*

**ISSN - 2583-2271 (Vol -5, No. 1)**

**प्रकाशनवर्षम् – २०२५**
**Year of Publishing: 2025**

**प्रकाशनदिनाङ्कः – २८.१२.२०२५**
**Date of Publication – 28.12.2025**

**विषयः – साहित्यम्**
**Subject – Literature**

**भाषा – संस्कृतम्**
**Language : Sanskrit**

**प्रकाशनप्रारूपम् - आन्तर्जालिकम्**
**Publication format - Online**

**प्रकाशनावधिः - वार्षिकी**
**Frequency : Annual**

**प्रकाशकः –** अध्यक्षः
सबं-सजनीकान्त-महाविद्यालयः
लुटुनिया, सबं, पश्चिममेदिनीपुरम्, पत्रसंकेतः - ७२११६६
पश्चिमबङ्गः, भारतवर्षम्

**Publisher – Principal**
*Sabang Sajanikanta Mahavidyalaya*
Lutunia, Sabang, Paschim Medinipur, 721166
West Bengal, India

© अध्यक्षः, सबं सजनीकान्तमहाविद्यालयः

© *Principal, Sabang Sajanikanta Mahavidyalaya*

E-mail - manisha@sabangcollege.ac.in
Website - https://sabangcollege.ac.in/Manisha-a-research-journal-of-sanskrit.aspx

# From the Desk of Chief Editor

It gives us immense pleasure to present the latest issue of *MANĪṢĀ (A Research Journal of Sanskrit)* to our esteemed readers, scholars, and contributors. This volume reflects the enduring vitality, intellectual depth, and interdisciplinary relevance of Sanskrit studies in the contemporary academic world. The present issue brings together a rich collection of research papers representing diverse branches of traditional and modern Sanskrit scholarship. A significant portion of the volume is devoted to Philosophy, highlighting the analytical brilliance of Indian intellectual traditions. The discussions on Nyāya, epistemology, metaphysics, causation, and logical inquiry demonstrate the continuing relevance of classical reasoning systems. Studies relating to Vedānta further illuminate profound questions concerning self, reality, and liberation. The contributions on Īśvara, Brahman, and related philosophical categories reveal the subtlety of Sanskritic metaphysical discourse. The issue also contains important studies in Vedic literature and interpretation. Such works remind us of the foundational role of the Vedas in shaping Indian spiritual and cultural consciousness.

Research in Grammar included in this volume reaffirms the scientific precision of the Sanskrit linguistic tradition. The grammatical papers offer valuable insights into semantic structure, derivation, and interpretative methodology. Particular attention has also been given to the field of Literature. The literary studies explore aesthetic theory, poetic imagination, dramatic expression, and social reflection embedded in Sanskrit texts. These contributions demonstrate how Sanskrit literature remains a living source of artistic inspiration and ethical reflection. The article examining the theory of Dhvani deserves special appreciation for engaging with one of the finest achievements of Indian poetics. Equally noteworthy are the studies connected with manuscripts and textual transmission. Manuscript research plays a crucial role in preserving the authentic heritage of Sanskrit learning for future generations. The paper on pedagogical processes in Sanskrit language teaching reflects the practical importance of educational innovation.

This reminds us that Sanskrit scholarship must remain connected with modern classrooms and learners. The volume also includes studies on Purāṇic themes that enrich our understanding of cultural memory and narrative tradition. General and interdisciplinary essays broaden the scope of the journal by linking Sanskrit studies with society, science, and contemporary concerns. Such diversity confirms that Sanskrit is not confined to the past but continues to engage with present realities. We are particularly pleased to note the participation of scholars from varied academic backgrounds and institutions. Their contributions reveal both fidelity to tradition and openness to new methodologies. The editorial board sincerely appreciates the diligence, patience, and scholarly commitment of all contributors.

We also express our gratitude to the reviewers whose careful evaluation has enhanced the quality of this issue. Our thanks are equally due to the members of the

advisory board for their guidance and encouragement. We hope that this volume will stimulate further dialogue, deeper research, and renewed appreciation for Sanskrit studies. May *MANĪṢĀ* continue to serve as a meaningful platform for rigorous scholarship and creative academic exchange. We dedicate this issue to the timeless pursuit of knowledge embodied in the Sanskrit intellectual tradition.

Prof. (Dr.) Tapan Kr. Dutta
The Chief Editor
Manīṣā - A Research Journal of Sanskrit

# सम्पादकीयम्

गीर्वाणवाणी भारतीयबौद्धिकपरम्परायाः शिखररूपा अस्ति । सा केवलं प्राचीनशास्त्राणां वाहिका न, अपि तु तत्त्वज्ञानं, विज्ञानं, साहित्यं, दर्शनं, भाषाशास्त्रं च सम्यक् आलोकयन्ती जीवितपरम्परा इति निःसंशयम् । अस्याः सरस्वत्याः निरन्तरं प्रवहमानं स्वरूपमधुनातनशोधप्रवृत्तिभिः सततं समृद्धि यान्ति ।

संस्कृतवाङ्मये व्यापकं वर्तते अनुसन्धानस्य क्षेत्रम् । प्राचीनैर्महर्षिभिः प्रतिपादितविषयेषु अभिनवतत्त्वान्वेषणम् उत प्रसङ्गानुसारं नूतनपदार्थस्य प्रतिपादनमनुसन्धानस्य द्वारमुद्घाटयति। स्वविकल्पानुसारं विशारदाः काले काले समाजस्य अपेक्षानुसारं प्रत्यग्राविष्कारं कुर्वन्ति एव। प्रायोगिकक्षेत्रे भाषाक्षेत्रे च गवेषणायाः स्वरूपं भिन्नं भिन्नं भवितुमर्हति। परन्तु उभयत्रापि नूतनतत्त्वानुसन्धानमिति सदृक्षं वर्वर्ति। संस्कृतवाङ्मयं भाषाक्षेत्रे वर्तत इति कृत्वा व्याख्यानरूपमन्वेषणं बहुधा व्यापकं स्थानमावहति। अतः संस्कृतशास्त्रे गवेषकैः प्राचीनकालादारभ्य अधुनातनकालपर्यन्तं नव्यतथ्यप्रतिपादकं व्याख्यानात्मकमनुसन्धानं विचित्रता। कस्यापि विषयस्य गम्भीरावलोकनेन पुनः पुनः पर्यालोचनेन च विद्यमाने विषये नवचिन्तनं स्फुरति आहोस्विदवशिष्टं नूतनं तत्त्वं वा प्रादुर्भवति। येन समाजोपयोगि नूत्नशोधकार्यमखिलानां पुरस्तात् समायायात्।

एतादृश सन्दर्भे सबं सजनीकान्तमहाविद्यालयस्य संस्कृतविभागपक्षतः प्रकाशितेयं संस्कृतविषयिणी वार्षिकी द्विगूढविशेषज्ञसमीक्षिता शोधपत्रिका अस्माकं महाविद्यालयस्य शैक्षणिकदृष्टेः, शोधपरम्परायाः च सशक्तं प्रतीकमस्ति। अत्र प्रकाशितानि शोधपत्राणि वेद- वेदाङ्ग-दर्शन-काव्य-व्याकरण-पुराण-इतिहास-संस्कृतिसम्बन्ध विषयान् सम्यक् आलम्ब्य नूतनदृष्ट्या चिन्तनं प्रस्तुवन्ति। द्विगूढविशेषज्ञसमीक्षणपद्धत्या शोधलेखानां चयनं कृत्वा मनीषाख्यायाः पत्रिकायाः अकादमिकविश्वसनीयता अधिकतया प्रतिष्ठिता जाता। लेखकानां मौलिकता, सन्दर्भ सम्पन्नता, शास्त्रीयमर्यादा च समीक्षकैः सम्यग् परीक्षणं कृत्वा एव अत्र लेखाः स्वीकृताः। तेन एषा मनीषाभिख्या शोधपत्रिका न केवलं लेखनमञ्चः, अपि तु गुणणवत्तापूर्णसंशोधनस्य प्रमाणस्वरूपा भवति ।

अस्याः वार्षिक्याः प्रकाशनेन संस्कृतशोधे रुचि जनयितुं, नवीनशोधकर्तारं प्रोत्साहितुं, गुरु-शिष्यपरम्परायाः शोधात्मकस्वरूपं सुदृढीकर्तुं च अस्माकं स्नातकोत्तरसंस्कृतविभागः सर्वदा प्रयत्नशीलः अस्ति । राज्ये राज्यान्तरेषु कर्तव्यरतानां विदुषां योगदानं अस्याः पत्रिकायाः वैशिकमूल्यं वरीवृध्यते ।

हे शास्त्रानुसार! भवतां सुलेखैः गीर्वाणवाणीवाङ्मयादुन्नीतानां नव्यविचाराणणां परम्परा प्रवर्द्धिता, आगामिनि समये सरस्वतीसमाराधनपराणां भवादृशानामन्येषामपि विपश्चितां वाङ्मयापाम्पतिसमुन्नीतानि चिन्तनरत्नानि मनीषामिमां मण्डयन्तु, सुरभारत्यां शास्त्रनिचये च कृतभूरिपरिश्रमा इतरेऽपि लब्धवर्णाग्रतःसराः अनुसन्धाननिष्णाताः शोधयाचनकाश्च अनुसन्धानप्रविध्यनुरूपं प्रणीतान् प्रत्यग्रोन्मेषपरिचायकान् लेखान् प्रकाशनाय संप्रेष्यास्मानुपकुर्वन्तु इति पुनः पुनो विनिवेदनानि समर्प्यन्ते।

चरमे, अस्याः शोधपत्रिकायाः प्रकाशने ये सहृदयाः सहयोगं कृतवन्तः – लेखकाः, समीक्षकाः, सम्पादकमण्डलम् , अस्मन्महाविद्यालयस्याध्यक्षाः डॉ. तपनकुमारदत्तमहोदयाः च- तेभ्यः सर्वेभ्यः हार्दिकाः कृतज्ञताः निवेद्यन्ते । भविष्यमपि एषा शोधपत्रिका प्राच्यविद्यायाः प्रचारप्रसारे, नवदृष्टिशोधस्य वीकाशे, शैक्षणिकसंवादस्य विस्तारस्य च प्रभावी माध्यमं भविष्यतीति प्रगाढः प्रत्ययः ।

मनीषा शोधपत्रेयं संस्कृतज्ञानदीपिका ।
नवशोधविचाराणां प्रकाशयति वै प्रभाम् ॥
शास्त्राणां सम्यगालोके नूतनार्थप्रबोधिनी ।

मनीषा विदुषां वाणीं भारते सुप्रतिष्ठिताम् ॥
गुरुशिष्यपरम्पर्यां शोधसंवादसेतुका ।
संस्कृतस्य विकासाय मनीषा यतते सदा ॥

विदुषां वशंवदः
सम्पादकः

# सूचीपत्रम्


| क्रमः | प्रबन्धाः | लेखकनाम | पत्रसंख्या |
|---|---|---|---|
| १ | न्यायवैशेषिकनये परमात्मतत्त्वविमर्शः | प्रो. बिष्णुपद-महापात्रः | १-८ |
| २ | नासदीयसूक्तदिशा महाविस्फोटतत्त्वदिशा च सृष्टिविज्ञानम् : एका पर्यालोचना | रियाव्यापारी | ९ - १४ |
| ३ | अद्वैतवेदान्ते ईश्वरस्वरूपम् | डॉ. एस्. पि. तेजस्वि | १५ - २१ |
| ४ | अथातो ब्रह्मजिज्ञासा" इत्यस्मिन् सूत्रे अथशब्दार्थविमर्शः | दिवाकरचक्रवर्ती | २२ - २५ |
| ५ | सांख्यशास्त्रे भ्रमज्ञानघटितसिद्धान्ताः | डॉ. देवाशिषमिश्रः | २६ - ३३ |
| ६ | न्यायनये निग्रहस्थानपदार्थस्वरूपविमर्शः | मिन्टुदे | ३४ - ३९ |
| ७ | न्यायदर्शनदिशा मनस्तत्त्वविवेचनम् | प्रीतिरायः | ४० - ४३ |
| ८ | वैशेषिकनये ईश्वरस्वरूपविचारः | दीपकमण्डलः | ४४ - ५० |
| ९ | तर्कसंग्रहे विशिष्टस्थलपर्यालोचनम् | पङ्कजदासः | ५१ - ५४ |
| १० | रघुदेवन्यायालङ्कारकृते नवीननिर्माणम् इति अप्रकाशितग्रन्थे षड्विधग्रन्थसङ्गतिपर्यालोचनम् | सुमना-चक्रवर्ती | ५५ - ६१ |
| ११ | चार्वाकमते ईश्वरस्वरूपम् | बिल्पबसरकारः | ६२ - ६६ |
| १२ | अनुमानविनिर्णये चार्वाकमतपर्यालोचनम् | डॉ. दीपकगराइः | ६७ - ७२ |
| १३ | धनेश्वरभट्टदिशा अपशब्दविचारः | डॉ. सुमन्त-चौधुरी | ७३ - ७७ |
| १४ | वैयाकरणसिद्धान्तकौमुद्या अपत्याधिकारप्रकरणोपेत-बालमनोरमायां ग्रन्थान्तराणां प्रभावः | तनयवैद्यः | ७८ - ८६ |
| १५ | रससिद्धान्ते भुक्तितत्त्वमेकं परिशीलनम् | डॉ. प्रशान्तकुमारपण्डा | ८७ - ९४ |
| १६ | शाकुन्तले जनजातितत्त्वानि | डॉ. लक्ष्मीकान्तषडङ्गी | ९५ - ९९ |
| १७ | 'कुट्टनीमतम्'-काव्ये प्रदर्शनकलायाः शास्त्रीयं सामाजिकं चानुशीलनम् | डॉ. परिमल-मण्डलः | १०० - १०६ |
| १८ | नैषधीयचरितस्य प्रथमसर्गे विरहवस्थावर्णनम् | विनयकुमारवरः | १०७ - ११४ |
| १९ | मृच्छकटिकनाटके वर्णव्यवस्था | सुस्मिता-दे | ११५ – १२१ |
| २० | संस्कृतभाषायां पाठसमीक्षणप्रक्रिया – एकं समीक्षणात्मकं अध्ययनम् | प्रलयशङ्कर-अधिकारी | १२२ – १३५ |
| २१ | पौराणिकसमये स्त्रीधनविमर्शः | डॉ. अविनाशगायेनः | १३६ – १४४ |
| २२ | चतुःषष्टिकलाः भारतीयदर्शनञ्च – ज्ञानकौशलसङ्गमः | डॉ. छबिलालन्यौपाने | १४५ – १५२ |

| | | | |
|---|---|---|---|
| २३ | अधिगीतं वैश्विकसमस्यायाः समाधानम् | दयाराम-गौतमः | १५३ – १६० |
| २४ | लिङ्गवैषम्येन दत्तकप्रथा नवजागरणञ्च | सरस्वती-अधिकारी | १६१ – १६५ |
| २५ | भारतीयसंस्कृतौ संस्कृतस्य स्थानम् | सुशान्तमण्डलः | १६६ - १७१ |

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# न्यायवैशेषिकनये परमात्मतत्त्वविमर्शः

**प्रो. बिष्णुपद-महापात्रः**
**आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**नवदेहली**

**प्रबन्धसारः**

*भारतीयज्ञानप्रणाल्याम् ईश्वरविषये दार्शनिकानां वैमत्यं दरीदृश्यते। तत्र अवैदिकाः ईश्वरस्य पृथक्सत्तां नाङ्गीकुर्वन्ति। वैदिकेष्वपि दार्शनिकेषु ईश्वरविषये वैमत्यम् अवलोक्यते। तथाहि साक्षात् ईश्वरस्य सत्तानङ्गीकारेऽपि कर्मणि तस्य अन्तर्भाव इति पूर्वमीमांसकैः स्वीक्रियते। एवञ्च "ईश्वरासिद्धेः" इति सिद्धान्तमुररीकृत्य साङ्ख्यैः प्रकृतितः जगतः उत्पत्तिः, पुनश्च ब्रह्म एव जगतः अभिन्ननिमित्तोपादनमिति उत्तरमीमांसकैः यदुच्यते तदनङ्गीकृत्य व्यवहारिकदशायां जगतः निमित्तकारणम् ईश्वरः इति न्यायवैशेषिकैः यदङ्गीकृतं तदभ्युपगत्य अत्र जीवात्मपरमात्मभेदेन आत्मनः यद्वैविध्यं न्यायवैशिषिकतन्त्रे अवलोक्यते, तत्र अल्पज्ञः जीवः सर्वज्ञः ईश्वरो भवतीति यदभिमतं विद्यते तदत्र मया शोधप्रबन्धे समुपस्थापितम्। एवञ्च ईश्वरस्य अस्तित्वविषये उदयनाचार्याणां यो हि अनुमानप्रकारः विद्यते तदपि अत्र निपुणं विभाव्य ईश्वरस्यानुमेयत्वं जगत्कर्तृत्वञ्च साधितम्।*

**कुञ्चीशब्दाः – सर्वज्ञः, अनुमानम्, जीवात्मा, ईश्वरः, नित्यत्वम्, धर्म्मः, अपरोक्षज्ञानम्, कृतिः, सकर्तृकत्वम्, अङ्कुरः, धृतिः, श्रुतिः, सिसृक्षा चेत्यादयः।**

***************************************************************************

**'अथ क ईश्वरः, को जीवः'** इति जिज्ञासायां भारतीयदार्शनिकपरम्परायाम् ईश्वरविषये विप्रतिपत्तयः दृश्यन्ते। अवैदिकाः चार्वाकाः पृथिवी-जलवायुतेजोव्यतिरिक्तं किमपि तत्त्वं नाङ्गीकुर्वन्ति, सौगतास्तु बुद्धं शरणं, धर्म्मं शरणं गच्छामीति सिद्धान्तानुरोधेन बुद्धस्यैव सर्वज्ञत्वमिप्सन्ति। जैनास्तु तीर्थङ्कराणामेव श्रेष्ठत्वमित्यभ्युपगच्छन्ति। वैदिकाः सांख्यास्तु ईश्वरस्य सत्तां नाङ्गीकुर्वन्ति, ईश्वरासिद्धिरित्यनुशासनात्। योगिनस्तु "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" इति प्रतिपादयन्ति। पूर्वमीमांसकस्तु कर्मणः प्राधान्यं स्वीकृत्य ईश्वरस्य पृथक् सत्तां नेच्छन्ति। वेदान्तिनस्तु आदौ अनादिरतिर्वाच्या भूतप्रकृतिश्चिन्मात्रसम्बन्धिनी माया, तस्याश्चित्प्रतिबिम्ब ईश्वरः। तस्या एव परिच्छिन्नान्तप्रदेशेष्वावरणविक्षेपशक्तिमत्सु अविद्याभिधानेषु चित्प्रतिबिम्बो जीव इति वदन्ति। रजस्तमोऽनभिभूतशुद्धसत्त्वप्रधाना सत्त्वरजस्तमोगुणात्मिका माया, तदभिभूत मलिनसत्त्वाऽविद्येति मायाऽविद्याभेदं परिकल्प्य मायाप्रतिबिम्ब ईश्वरः, अविद्याप्रतिबिम्बो जीव इति तत्त्वविवेककृतः। तत्र प्रमाणम्- 'जीवेशावभासेन करोति माया चाविद्या च स्वयमेव भवति' इति श्रुतिः।

एकैव मूलप्रकृतिर्विक्षेपशक्तिप्रधानां मायापदबाध्येश्वरोपाधिः। आवरणशक्तिप्रधानाऽविद्याऽज्ञानशब्दाभिधेया जीवोपाधिरित्यापि कश्चित्। तदुक्तं पञ्चदश्याम्-

**"सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते।**
**मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः ॥**

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा ।**"[1] इति ।

अन्तःकरणावच्छिन्नचैतन्यं जीवः, अन्तःकरणोपहितं चैतन्यं जीवसाक्षि, मायावच्छिन्नं चैतन्यमीश्वरः, मायोपहितं चैतन्यमीश्वरसाक्षि इति धर्मराजाध्वरीन्द्रः ।

संक्षेपशारीरककृतस्तु मायायां चित्प्रतिबिम्ब ईश्वरः, अन्तःकरणे चित्प्रतिबिम्बो जीवः । 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रुतेः । अतः कार्यपदेन मायाकार्यमन्तःकरणं गृह्यते इत्याहुः । तत्र जीवेश्वरविषये न्यायवैशेषिकाः इत्थं प्रतिपादयन्ति -

**"स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।**
**यदुपास्तिमसावत्र परमात्मा निरूप्यते" ॥**[2]

मनीषिणः योगिनः यस्योपकसनां स्वर्गापवर्गयोः मार्गम् अनुमन्यन्ते स परमात्मा इति नाम्ना ख्यातः वर्तते, तस्य परमात्मनः अत्र वर्णनमावश्यकमित्यनुभूयते । वैशेषिकस्वीकृतेषु नवसु आत्मा अष्टमं द्रव्यमस्ति । तस्यात्मनः द्वौ प्रभेदौ जीवात्मा परमात्मा च । परं वैशेषिकदर्शने महर्षि कणादेन स्पष्टतया आत्मनः प्रभेदरूपेण स्वतन्त्ररूपेण वा न क्वापि उल्लेखोऽकारि ।

ये खलु पाश्चात्याः वैशेषिकं निरीश्वरमिति कथयन्ति तन्मतं न युक्तं यतः - न हि कस्यचन वस्तुनः उद्देशमात्रेण कथनाभावात् तस्य अस्वीकारः अनुचितः, यदि नाममात्रेण ईश्वरः नोद्दिष्टः तथापि परमात्मा निषेधोऽपि नैवकृतः अतः कणादम् अनीश्वरवादीति ख्यापनं सर्वथा अन्याय्यम् ।

परवर्तिनः विद्वांसोऽपि **आचार्य शङ्करमिश्रः, पं. जयनारायणादयस्तु** प्रथमाध्यायस्य तृतीयसूत्रस्य- "**तद्वचनादाम्नायस्य प्रामाण्यं**"[3] व्याख्यायां तदिति पदेन ईश्वरस्यैव संकेत इति स्वीकुर्वन्ति- तदिति अनुक्रान्तमपि प्रसिद्धितया ईश्वरं परामृशति । **प्रशस्तपादेनापि सृष्टिप्रकरणे- सृष्टि- संहारकतृरूपेण ईश्वरस्योल्लेखोऽत्यन्तस्वाभाविकरूपेण कृतः ईश्वरस्य संजिहीर्षावशाद्**[4]**..**अस्यैव टीकायां न्यायकन्दलीकारेणापि[5] "ईश्वरोऽपि बुद्धिगुणत्वादात्मैव" स्पष्टमेव परमात्मनः वर्णनं कृतम् ।

न्यायसिद्धान्तमुक्तावल्यां तर्कसंग्रहेऽपि "**ज्ञानाधिकरणमात्मा, स च द्विविधः आत्मा परमात्मा**[6] **च ।** इति प्रयोगदर्शनात् परमात्मपदेन ईश्वरस्य जीवात्मपदेन प्रतिशरीरभेदात् अनन्तस्य व्यपदेशः ।

अतः इदमेव युक्ततरं यद् द्रव्यपदार्थान्तर्गतात्मनि द्रव्ये उभयोः समावेशोऽस्तीति ।

मन्मते तु महर्षिकणादेन अनावश्यकत्वात् सर्वथा सिद्धत्वादीश्वरस्योल्लेखः नाकारि । परमात्मविवेचने परिमाणद्योतके सूत्रे विभु महत् परिमाणेन परमात्मनः एव संकेतमदायि । तथा च **तद्वचनादाम्नायस्य प्रामाण्यम्, अस्मद् बुद्धिभ्यो लिङ्गमृषेः** तथा आत्मनः योगिनां प्रत्यक्षं भवति तत्रापि ईश्वरस्यैव संकेतः अतः कथमभिधातुं शक्यते यत् कणादः निरीश्वरवादीति विशदविवेचनस्य अनावश्यकत्वात् ईश्वरास्तित्वे चासन्दिग्धमानसत्वात् ईश्वर अवश्यमङ्गीकार्यः । एवञ्च विश्वनाथेन स्वीयमङ्गलाचरणे यदुक्तं – "संसारमहीरुहस्य बीजाय" इत्यत्र मिथ्याज्ञानजन्यवासनात्मकः संसारः, जन्मस्थितिलयशीलात्मकं

[1] पञ्चदशी, तत्त्वविवेकप्र., १६ - १७

[2] न्या. कु. स्त. १

[3] वै. द, १/१/३, उप, भा, १/१/३, वै. सू. वृ., पृ. २

[4] प्र.पा. भा., पृ. १२२

[5] न्या. कु., पृ.- १२२

[6] त. सं., पृ. ३९

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

यत् जगत्, तादृशसंसार एव महीरुहो वृक्षः तस्य निमित्तकारणमीश्वर एव।

तत्र केचन सांख्याः इत्थं प्रतिपादयन्ति – यथा बाधकप्रमाणाभावे सत्यपि साधकप्रमाणाभावात् शशश्रृङ्गादेरभावः तार्किकाणामभिमतः तथैव ईश्वरस्यापि साधकप्रमाणाभावादेवाभावः सेत्स्यतीति सांख्यमतं मनसि निधाय उदयनाचार्यैः न्यायकुसुमाञ्जलौ पञ्चमविप्रतिपत्तिः समुपस्थापिता- "तत्साधकप्रमाणाभावादिति" ।[7] तन्मतनिराकरणाय न्यायकुसुमाञ्जल्याम् उदयनाचार्येण ईश्वरसिद्धौ अष्टौ युक्तयः प्रादुः, येन ईश्वरस्य सिद्धिर्भवति।

**"कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।**
**वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः" ॥[8]**

अत्रेदमवधेयं यत् 'धृत्यादेः' इत्यत्र आदिपदेन नाशस्य परिग्रहः। अनेन कार्यहेतुना, आयोजनहेतुना, धृतिहेतुना, नाशहेतुना, पदहेतुना, प्रत्ययहेतुना, श्रुतिहेतुना, वाक्यहेतुना, संख्याविशेषहेतुना च ईश्वरस्य सिद्धिर्भवतीति नैयायिकानाम् उदयनाचार्याणां दृष्टिः।

तत्र केचन अवैदिकाः इत्थं जल्पन्ति – प्रमाणेन प्रमेयस्य सिद्धिर्भवति चेत् तर्हि ईश्वरः न प्रत्यक्षप्रमाणवेद्यः, यतः बाह्यप्रत्यक्षं प्रति महत्त्वे सति उद्भूतरूपस्य कारणत्वं प्रसिद्धमस्तीति ईश्वरे रूपाभावात् ईश्वरः न बाह्यप्रत्यक्षप्रमाणवेद्यः। स्वात्मभिन्नद्रव्यत्वात् ज्ञानादिभिन्नत्वाच्च, परात्मनः परेण मनसाऽग्राह्यत्वात्, स्वमनसा स्वप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयमनःसंयोगस्यैव कारणत्वाच्च ईश्वरः न मानसप्रत्यक्षवेद्यः।

ईश्वरः न अनुमानप्रमाणवेद्यः, यतः अनुमानं प्रत्यक्षपूर्वकं भवति, अनुमितौ व्याप्तिज्ञानं करणं परामर्शश्च व्यापारो भवति। व्याप्तिस्तु सहचाररूपा सामानाधिकरण्यरूपा भवति। सहचारज्ञानं तु आदो सपक्षे गृहीतं भवति। गृहीतव्याप्तेः स्मरणं पक्षे हेतुदर्शनानन्तरं भवति। अतः ईश्वरस्य अप्रत्यक्षतया तस्य केनचिल्लिङ्गेन सामानाधिकरण्यदर्शनाभावेन व्याप्तिग्रहस्य असम्भवात् ईश्वरः न अनुमानप्रमाणेन सिद्धः। व्याप्तिग्रहे तु सामानाधिकरण्यात्मकसहचारज्ञानस्य हेतुत्वं विद्यते। तथाहि –

**व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा।**
**हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्तकः ॥[9]**

अर्थात् व्यभिचाराग्रहः सहचारग्रहस्य व्याप्तिग्रहे कारणं भवतीति सहचारज्ञानाभावात् अनुमानेन ईश्वरस्य सिद्धिः कर्तुं नैव शक्यते। उपमितौ सादृश्यज्ञानस्य करणत्वात् ईश्वरसदृशवस्त्वन्तरतत्त्वस्याभावात् ईश्वरः न उपमानप्रमाणवेद्यः। "यः सर्वज्ञः सर्ववित्, द्यावाभूमी जनयन्" इत्यादिश्रुतिवाक्यानामीश्वरोच्चरितत्वात् ईश्वरस्य सन्दिग्धत्वात् च तदुक्तश्रुतीनां प्रामाण्ये सन्देहस्य विद्यमानत्वात् ईश्वरः न श्रुतिप्रमाणवेद्य इति न्यायोक्तप्रमाणचतुष्टयस्य ईश्वरसाधकाप्रमाणत्वात् ईश्वर एव नास्तीति अवैदिकानां मतापकरणाय उदयनाचार्यैः नवविधानुमानं प्रदर्शितम्।

अर्थात् कार्यात् कार्यं दृष्ट्वा कारणमनुमेयं, सृष्टिकार्यस्य निमित्तकारणं परमात्मा एव। कार्यत्वहेतुकानुमानं प्रदर्शयति आचार्यः – "क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात्, घटवत्" इति। कार्यं तु प्रागभावप्रतियोगिरूपम्। पृथिव्यादिकार्य-

---

[7] न्या.कुसु.पृ.१९९

[8] न्या. कु. प.स्त.का. १

[9] कारिकावली १३७

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

द्रव्याणां कर्तृत्वं जीवात्मनि स्वल्पज्ञे न सम्भवतीति उपादानगोचराऽपरोक्षज्ञानचिकीर्षाकृति-मज्जन्यत्वरूपं सकर्तृकत्वं साध्यं ग्राह्यम्। उक्तानुमाने क्षित्यङ्कुरादिकं पक्षः, प्रागभावप्रतियोगित्वरूपं कार्यत्वं हेतुः, सकर्तृकत्वं च साध्यं भवति। यथा घटस्य उपादानं समवायिकारणं कपालद्वयं भवति, तद्विषयकाऽपरोक्षं यत् ज्ञानेच्छाकृतिमान् कुम्भकारः एव, स च घटस्य कर्ता निमित्तकारणं च भवति। तथैव क्षित्यङ्कुरादीनामुपादानकारणं परमाण्वादयः, तद्विषयकाऽपरोक्षज्ञानेच्छाकृतिमान् ईश्वर एव। उक्तं च उदयनाचार्येण– **"सकर्तृत्वं च उपादानगोचराऽपरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम्"।**[10] अर्थात् एतादृशापरोक्षज्ञानचिकीर्षादीनां जीवात्मन्यभावात् नेश्वराऽसिद्धिरिति।

इदमपि बोध्यं यत् – निरुक्तानुमाने क्षितित्वस्य अङ्कुरत्वस्य तद्घटत्वस्य मेघत्वादेर्वा पक्षतावच्छेदकत्वम्। क्षितिः सकर्तृका कार्यत्वाद् घटवदित्यनुमाने क्षितिः जन्या पृथिवी पक्षो भवति। यदि पक्षतावच्छेदकं क्षितित्वं स्वीक्रियते तर्हि क्षितित्वसामानाधिकरण्येन घटादौ पूर्वमेव सकर्तृकत्वस्य सिद्धत्वात् दृष्टान्ते सिद्धसाधनापत्तिः। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे क्षितित्वावच्छिन्ने नित्ये परमाणौ सकर्तृकत्वस्य साध्यस्य अभावात् बाधो भवतीति उपर्युक्तानुमानं परित्यज्य अङ्कुरः सकर्तृकः कार्यत्वादित्यनुमानं स्वीक्रियते। अत्र अङ्कुरशब्देन परमाणुभ्यामुत्पन्नस्य संसारवृक्षप्रयोजकस्य द्व्यणुकस्य अङ्कुरसाम्यात् अङ्कुरशब्देन द्व्यणुकं गृह्यते। तथा च द्व्यणुकं सकर्तृकं कार्यत्वात् घटवदित्यनुमानं फलितम्। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात्। सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वेऽपि अङ्कुरे जीवीयकृतिसाध्यत्वाभावात् नांशतः सिद्धसाधनं, नित्याङ्कुरस्य अभावाच्च न बाध इति उपर्युक्तानुमानेन ईश्वरस्य सिद्धिः।

पुनः आशंका उदेति – उपर्युक्तानुमानेन सकर्तृकत्वस्य साध्यस्य सिद्धिर्भवति न तु ईश्वरस्य इति। अस्याः शंकायाः समाधानार्थमित्थं वक्तुं शक्यते – **"न च तत्कर्तृत्वमस्मदादीनां सम्भवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः"**[11] इति। एवञ्च कर्तृत्वेन कार्यत्वेन कार्यकारणभावरूपानुकूल-तर्कमभ्युपेत्यापि ईश्वरस्य सिद्धिर्भवति इति।

आयोजनं सूक्ष्मपरमाणूनां संयोजनेन एषा सृष्टिः निष्पद्यत अतः कश्चन आयोजक अनुमेयः। अर्थात् आयुज्यते संयुज्यतेऽनेनेति व्युत्पत्त्या आयोजनं कर्म। तथा चानुमानाकारः सर्गाद्यकालीनद्व्यणुकारम्भक-परमाणुद्वयसंयोगजनकं कर्म चेतनप्रयत्नपूर्वकम् कार्यत्वात् अस्मदादिकर्मवत्।

**धृतिः** – धृतिः गुरुत्ववतां पतनाभावः। तथा च ब्रह्माण्डादिपतन-प्रतिबन्धकीभूत-प्रयत्नवदधिष्ठितं धृतिमत्त्वात्। वियति विहङ्गमधृतकाष्ठवत्। अत्र एतादृशप्रयत्नः वैशेषिकैः विधारकप्रयत्न इत्युच्यते। तस्य च अचेतने ब्रह्माण्डेऽसम्भवात् परम्परया तद्वत्त्वं वाच्यमिति ईश्वरः सिद्ध्यति। अस्या सृष्टेः आकर्षणधारणनियमेन प्रतीयते, अस्ति खलु कश्चन सर्वज्ञः सर्वशक्तिमान् यः सम्पूर्ण चराचरं जगत् सुनियन्त्रितं सुव्यवस्थितं करोति, सः परमेश्वर एव नान्यः।

**"एतस्य वा अक्षरस्य प्रशासने गार्गि**

[10] न्या.कु.पृ.१९९ स्त.५

[11] न्या.सि.मु.,पृ.२१

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**सूर्याचन्द्रमसौ तिष्ठतः"** ।[12]

धृत्यादेरित्यादिपदात् नाशपरिग्रहः। तथा च ब्रह्माण्डादिप्रयत्नवद्विनाश्यम् विनाशित्वात् पाट्यमान-पटवत्।

**पदात्-** पद्यते अनेनेति पदम् व्यवहारः। पटादिसम्प्रदायव्यवहारः स्वतन्त्र-पुरुषप्रयोज्यः व्यवहारत्वात्, आधुनिकलिप्यादिव्यवहारवत् इति।

अभिप्रायस्तु - पदात् इत्यतः त्रयः अर्थाः गम्यन्ते। प्रथमस्तावत् वेदेषु ईश्वरादि पदात् परमात्मा ईश्वरः अनुमेयः। द्वितीय:- पदनाम शब्दः अर्थात् शब्दव्यवहारात् सर्वेषां कार्याणां निमित्तं वाग्व्यवहारः शब्दव्यवहारः स शब्दः सर्वप्रथमं परमात्मा एव प्रदत्तवान्। तृतीय:- पदनाम ज्ञानम् **पद्यते ज्ञायते अनेन इति पदम्** अर्थात् व्यवहारज्ञानं तात्पर्यमिदं जगति प्रवर्तमानाः विविधाः कला - कौशलो येन जगति व्यवहारः प्रचलति तद्यथा - गृहनिर्माणं शिक्षणादिकम् एतेषां कश्चन आदिः व्यवहारप्रवर्तकः शिक्षक : अनुमेयः " **सः पूर्वेषामपिगुरुः कालेनानवच्छेदात्**"[13] परमात्मा एव।

**प्रत्ययतः**- प्रत्ययतः प्रामाण्यात् प्रमात्वात् इति। प्रमा चात्र शाब्दी विवक्षिता, अत एव तज्जनकगुणवत्त्वेनेतरबाधात् ईश्वरसिद्धिः। एवञ्च तथा चानुमानाकारः – वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात्, प्रत्यक्षादिप्रमावत्।

प्रत्ययशब्देनात्र समाश्वासविषयः प्रामाण्यमुच्यते। धर्मधर्मयोः धर्मनिश्चयः कर्त्तव्याकर्त्तव्ययोः कर्त्तव्यनिश्चयः पापपुण्ययोः पुण्यनिश्चयोऽपि नास्ति मनुष्यस्य स्वाभाविकी शक्तिः अतः एतद् विषयकं प्रामाण्यं विश्वासश्च परमेश्वरमाध्यमेन भवति।

**श्रुतेः**- श्रुतिशब्दस्यार्थो भवति वेदः। तत्र चत्वारो वेदाः खलु सर्वाः परापराः विद्याः विद्यन्ते न तेषां रचयिता कश्चन अल्पज्ञः पुरुषः भवितुं शक्नोति अतः अपौरुषेयाः वेदा कश्चन सर्वज्ञाद् उपदिष्टाः स उपदेष्टा परमात्मा एव। अत्र परमात्मकर्तृत्वेन वेदस्य पौरुषेयत्वमामनन्ति न्यायवैशेषिकाः। तथा चानुमानाकारः – वेदः पौरुषेयः वेदत्वात्, आयुर्वेदवत्।

**वाक्यात्-** वाक्यार्थज्ञानमन्तरा वाक्यरचना नैव सम्भवति, तथाविधं ज्ञानम् अस्माकं न प्रामाणिकम् इति तदाश्रयत्वेन नित्य-सर्वज्ञेश्वरसिद्धिरिति। तथा चानुमानाकारः – वेदः अपौरुषेयः वाक्यत्वात्, भारतादिवत्। वेदवाक्यानि पौरुषेयाणि वाक्यत्वात्, अस्मदादिवाक्यवत् इति।

**सङ्ख्याविशेषात्-** द्व्यणुकपरिमाणं संख्याजन्यम्, परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणवत्, तुल्यपरिमाणककपालद्वयारब्दघटपरिमाणात् प्रकृष्टतादृशकपालत्रयारब्ध-घटपरिमाणवत्। अर्थात् द्व्यणुकपरिमाणे संख्याजन्यत्वं प्रसाध्य तस्याः संख्यायाः निमित्तकारणीभूतापेक्षाबुद्धेः तत्समवायि-कारण-परमाणुद्वयाऽद्रष्टरि साधारणे जीवे सादौ योगिनि च बाधात् नित्य-सर्वज्ञेश्वरस्य सिद्धिः।

द्व्यणुकत्र्यणुकाद्यन्तर्गतपरिमाणरूपसंख्यापेक्षाबुद्धिजन्या सापेक्षाबुद्धिः सर्व प्रथमं परमेश्वरजन्यः एव अतः अस्मात् संख्या विशेषात् परमात्मा अनुमेयः एवम् अन्येऽपि हेतवः ईश्वरसिद्धौ ये सन्ति येन परमेश्वरसिद्धिर्भवति। एवं प्रमुखतया अष्टाभिर्युक्तिभि: जगत्-कर्तृत्वरूपेण वेदोपवेदादिकर्तृत्वरूपेण परमेश्वरस्य सिद्धिः सर्वथा वेदानूकूला विद्वांसः दार्शनिकाश्च ईश्वरसिद्धये इमाः युक्तीः आश्रयन्ति।

---

[12] बृ. उ., ३.८.९

[13] यो. द., १/२६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

परमात्मा जगतः निमित्तकारणं भवतीति न्यायवैशेषिकाणामाशयः। तथाहि -

**"ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्"[14] ।**

अस्य व्याख्यायां वात्स्यायनः- पुरुषोऽयं समीहमानः नावश्यं समीहाफलं प्राप्नोति तेनानुमीयते पराधीनं पुरुषस्य कर्मफलपराधीनमिति यदधीनं स ईश्वरः। तस्मादीश्वरः कारणमिति। किञ्च सृष्टेः मूलोपादानानि प्रकृतिपरमाणवः येषां संघातेन सृष्टिरुत्पत्तिः परं तेषां संघातं न स्वयमेव भवितुं क्षमः परमाणूनामचेतनत्वात् अतो अवश्यं कोऽपि तस्य संयोजक : यः संयोजकः स परमेश्वरः[15]।

एवञ्च स्रष्टा संहर्ता च ईश्वरो भवतीति न्यायवैशेषिकाचार्याणामाशयः। तथाहि - वैशेषिकदर्शने सर्वप्रथमं प्रशस्तपादाचार्येण निःश्रेयसाधनप्रतिपादनतृतीयसूत्रस्य व्याख्यानावसरे पदार्थधर्मसंग्रहे प्रतिपादितं यत् -

**"तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव"** ।[16]

अर्थात् न केवलं द्रव्यादिपदार्थानां तत्त्वज्ञानान्मुक्तिर्भवति अपि तु तस्य निःश्रेयसः प्राप्तिः ईश्वरस्य विशेषप्रकारिका या चोदना इच्छा तथा कार्य कर्तुं प्रवृत्ताय धर्माद् भवति। अत्र ईश्वरशब्दस्योल्लेखः अतीव सहजरूपेण अतः तथा च सृष्टिसंहारप्रक्रियायाम्[17] ईश्वरस्य नाम निर्देशः कृतः परं न पृथक् रूपेण किञ्चिद् स्वरूपं लक्षणं विवेचितम्। अतः एवं मन्यते ईश्वरं प्रति आचार्यः न केवलं दार्शनिकदृष्ट्या आस्थां स्थापयति अपितु वैज्ञानिक-धार्मिकाध्यात्मिकदृष्ट्या एव आस्थां धारयति। अतः तस्य दार्शनिकीदृष्टिः ईश्वरः स्रष्टा संहर्ता च ईश्वर एव, यश्च अपवर्गकाले संसारखिन्नानां निशि विश्रामार्थं विनाशयति संहरति तथा च प्राणिनां भोगभूतये रचनां करोति। ईश्वरस्य अपेक्षा बुद्धिरेव परमाणुषु द्वित्वादीन् क्रमेणोत्पादयति तथा च चतुर्णां महाभूतानामुत्पत्त्यनन्तरं तस्यैवाभिध्यानमात्रादेव हिरण्यमयः अण्डो जायते येन सृष्टिः प्रादुर्भवति। अत: प्रशस्तपादानुसारं परमात्मा एव महेश्वरः सकलभुवनपति: यस्य सिसृक्षासंजिहीर्षे एव जगत: सृष्टिसंहारहेतुः, तथा च प्राणिनामदृष्टवशात् सृष्टिं सृजति संहरति च।

स च ईश्वरः जगतः अधिष्ठाता भवति। तथा चोच्यते श्रीधराचार्येण - ईश्वरः सृष्टेः रचयिता, जीवाद् भिन्नः स्वाभाविकज्ञानेन युक्तः कर्तृत्वस्वभावः जगदधिष्ठाता। जीवाद् व्यतिरिक्तः सर्वार्थदर्शिसहजज्ञानमयः कर्तृत्वस्वभावः जगदधिष्ठाता सृष्टिकर्ता शक्तिरेव ईश्वरः-

**"चेतनमधिष्ठातारमन्तरेण अचेतनानां प्रवृत्त्यभावात्। स च ईश्वरः एक एव।"**[18]

पुनश्च स ईश्वरः नित्यज्ञानाधारो भवतीति ईश्वरलक्षणम्[19] इति प्रतिपादितं मानमनोहरकारैः। तर्कसंग्रहकारः अन्नभट्टोऽपि नित्यज्ञानाधिकरणत्व-मीश्वरत्वम्[20] इति ईश्वरः नित्यज्ञानस्याधारो भवति। कर्तृमात्रसिद्धावपि ईश्वरे कथं नित्यसर्वज्ञत्व-सिद्धिरितिचेत् न पक्षधर्मताबलेन तत्सिद्धेः द्व्यणुकादारभ्य भूगोलपर्यन्तं क्षित्युपादानभिज्ञः सर्वज्ञ एव स्यात्[21] इति शङ्करमिश्रः कणादरहस्ये ईश्वरं जगतः कर्ता नित्यः सर्वज्ञश्च इति प्रतिपादितवान्। जयन्तभट्टोऽपि निगदति -

---

14 न्या. सू., ४/१/१९

15 न्या. भा., पृ. - ४७८

16 प्र.पा. भा., पृ- १८

17 प्र.पा. भा., पृ. १२१

18 न्या.क.,पृ० १४१

19 मा. मनो., पृ. २-९

20 त. सं., पृ. १२

21 क. र., पृ. ४०

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**" स देवः परमो ज्ञाता नित्यानन्दः कृपान्वितः। क्लेशकर्मविपाकादिपरामर्शविवर्जितः" ॥**[22]

अर्थात् सः दिव्यगुणयुक्तः परमेश्वरः सर्वज्ञत्वात् वेदानां ज्ञाता त्रैलोक्यनिर्माता, नित्यानन्दस्वरूपः क्लेशकर्मविपाकाशयैरपरामृष्टः ईश्वरः।

भासर्वज्ञस्तु अनुवदति - ईश्वरः जगत्स्रष्टा सर्वज्ञाता अष्टविधैश्वर्ययुक्तः वर्तते। तथाहि –

"**तत्रैश्वर्यादिविशिष्टः संसारधर्मैरीषदप्यसंसृष्टः परो भगवान् महेश्वरः सर्वज्ञः सकलजगद्विधाता।**"[23] स च ईश्वरः एक एव **"एको रुद्रो न द्वितीयाय"**[24] एवञ्च शब्दप्रमाणेनापि ईश्वरस्य सिद्धिर्भवति। तथा हि – **"द्यावाभूमी जनयन् देव एकः"**[25], **"विश्वस्य कर्ता भुवनस्य गोप्ता"**[26] इति श्रुतिः।

न्यायवैशेषिकसम्प्रदायविद्वांसः परमात्मनः अस्तित्वविषये स्वरूपविषये ऐकमत्यमाभजन्तोऽपि गुणानां विषये वैमत्यं प्रदर्शयन्ति। तेषु पञ्च तु सामान्यगुणाः सर्वेषु मूर्तामूर्तेषु द्रव्येषु सद्भावात् संख्यापरिमाणपृथक्त्वसंयोगविभागाः परमात्मन्यपि स्वीकृताः। त्रयश्च ज्ञानेच्छा-प्रयत्नाः विशेषगुणा अपि नित्यज्ञानस्य समवायिकारणत्वात् अतीतानागत-वर्त्तमानस्य प्रत्यक्षत्वात् ज्ञानं साक्षात्कारवान् सामान्यानां जीवात्मनां ज्ञानेन सर्वथा भिन्नं भिन्नं यस्य प्रमाणार्थं प्रत्यक्षानुमानागमप्रमाणानां नास्त्यावश्यकता तज्ज्ञानम् अनिन्द्रियाश्रितम् वर्त्तते। तथा च अष्टौ गुणाः ईश्वरे वर्तन्ते संख्यादयः पञ्च सामान्यगुणाः ज्ञानमिच्छाप्रयत्नाश्चेति त्रयः विशेषगुणाः इति।

तत्रेदमवधातव्यं यत् परमात्मा जीवात्मनः भिन्नो भवति, यतः परमात्मा नित्यस्य ज्ञानस्य अधिकरणस्वरूपः जीवात्मा अनित्यस्य ज्ञानस्यधिकरणस्वरूपश्च भवति। परमात्मनि पञ्च सामान्यगुणाः भवन्तीति सम्मिल्य अष्टौ गुणाः वर्तन्ते। जीवात्मनि पञ्च सामान्यगुणाः नव च विशेषगुणाः एवं सम्मिल्य चतुर्दश गुणाः। जीवात्मनि अधर्मः अज्ञानम्, अनैश्वर्य चोपलभ्यते परमात्मा तु अष्टविधैश्वर्ययुक्तः नित्यज्ञानवान् च भवति। जीवात्मनि सुखदुःखे उपलभ्येते न तु परमात्मनि स तु सच्चिदानन्दस्वरूपः, क्लेशादिविमुक्तः, आनन्द-घनस्वरूपश्च भवति। जीवात्मा प्रतिशरीरं भिन्नः व्यवस्थावशाद् नाना, परमात्मा तु एक एव। जीवात्मा परमात्मा च विभु परिमाणवान् भवति। जीवात्मा शरीरधारी परमात्मा तु न कदाचिदपि शरीरं धारयति। जीवात्मा अल्पज्ञो भवति परमात्मा सर्वज्ञो भवतीति न्यायवैशेषिकाणां सिद्धान्त इत्यलमतिविस्तरेण।

**संकेताक्षरसूची**

| | |
|---|---|
| ❖ त.सं | तर्कसंग्रहः |
| ❖ प.द. | पञ्चदशी |
| ❖ न्या.क. | न्याकन्दली |
| ❖ न्या. कु. | न्यायकुसुमाञ्जलिः |
| ❖ न्या.स. | न्यायसूत्रम् |
| ❖ न्या.म. | न्यायमञ्जरी |
| ❖ न्या.भा. | न्यायभाष्यम् |
| ❖ न्या.वा.ता.टी. | न्यायवर्तिकतात्पर्यटीका |
| ❖ प्र.पा.भा. | प्रशस्तपादभाष्यम् |
| ❖ मा.मन. | मानमनोहरः |
| ❖ वै.द. | वैशेषिकदर्शनम् |

[22] न्या. म., पृ.१७५, भाग - १

[23] न्या. सा., पृ. - ४४७

[24] श्वेता. ३.२

[25] श्वेता. ३.३

[26] मु.उ. १.१.१

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

- वै.सू.वृ. वैशेषिकसूत्रवृत्तिः
- वृ.उ. वृहदारण्यकोपनिषद्
- यो.द. योगदर्शनम्

## सहायकग्रन्थसूची


१. ***उपनिषत् /*** गीताप्रेस, गोरखपुर।

२. उदयनाचार्यः। ***न्यायकुसुमाञ्जलिः***। गोस्वामी, महाप्रभुलालः (सम्पा.)। मिथिला विद्यापीठ ग्रन्थमाला, सं-२८, १९७२।

३. उदयनाचार्यः। ***कारिकावली***। द्विवेदी, विन्ध्येश्वरीप्रसाद (सम्पा.)। चौखम्बा संस्कृत सीरीज। वाराणसी, १८९७।

४. विश्वनाथपञ्चाननभट्टाचार्यः। ***न्यायसिद्धान्तमुक्तावली***। आचार्यः, कृष्णवल्लभः (सम्पा.)। वाराणसी : चौखम्बा संस्कृतसंस्थानम्। षष्ठसंस्करणम् , २००३।

५. भट्टाचार्यः, विश्वनाथन्यायपञ्चाननः। ***न्यायसिद्धान्तमुक्तावली***। शुक्लः, हरिरामः (सम्पा.)। वाराणसी : चौखम्भा प्रकाशन्। २०१८।

६. तर्कालङ्कारः, जगदीशः। ***तर्कामृतम्***। मिश्रः, रामचन्द्रः (सम्पा.)। वाराणसी : चौखम्बा विद्याभवन, १९७३।

७. धर्मराजाध्वरीन्द्रः। ***वेदान्तपरिभाषा***। वाराणसी : चौखम्बाविद्याभवनम्, ।१९९९

८. प्रशास्तपादः। ***प्रशास्तपादभाष्यम्***। . दण्डिस्वामिदामोदराश्रमः (सम्पा.)। कोलकाता: आद्यापीठः बालकाश्रमः। द्वितीयसंस्करणम्।

९. वात्स्यायनमुनिः। ***न्यायभाष्यम्***। शास्त्री, द्वारिकादासः (सम्पा.)। वाराणसी : बौद्धभारतीग्रन्थमाला। १९९८।

१०. वादिवागीश्वरः। ***मानमनोहरः***। योगीन्द्रानन्दः (सम्पा.)। चौखम्बाविद्याभवनम्, वाराणसी, १९७३

११. विद्यारण्यस्वामी। ***पञ्चदशी***। *चौखम्बाप्रकाशनम्, २०१७*

१२. भट्टः, जयन्तः। ***न्यायमञ्जरी***। शास्त्री, गौरीनाथः (सम्पा.)। वाराणसी : सं सं वि वि। १९८३।

१३. भट्टः, जयन्तः। ***न्यायमञ्जरी***। तैलंगः, गंगाधरशास्त्री (सम्पा.)। वाराणसी : चौखम्बा संस्कृतसीरीज, १९८५।

१४. भासर्वज्ञः । ***न्यायभुषणम्*** । वाराणसी: षड्दर्शन प्रकाशन प्रतिष्ठानम्, १९६८ ।

१५. महर्षिकणादः। ***वैशेषिकसूत्रम्***। मिश्रः, नारायणः (सम्पा.)। वाराणसी : बौद्धभारती, १९६८।

१६. महर्षिगौतमः। ***न्यायदर्शनम्***। सम्पा. ठक्कुरः, अनन्तलालः (सम्पा.)। दरभंगा : मिथिलाशोधसंस्थानम्, १९६७।

१७. मिश्रः, शङ्करः । ***वैशेषिकसूत्रोपस्कारः*** । आलिः, सेखसाविरः (सम्पा.)। कोलकाता : संस्कृतवुकडिपो, २०१०।

१८. मिश्रः, शिवादित्यः। ***सप्तपदार्थी***। तर्कतीर्थः, अमरेन्द्रमोहनः (सम्पा.)। कोलकाता : मेट्रोपलिटन् प्रिन्टिं एण्ड पाब्लिशार्स हाउस। १९३४।

१९. मिश्रः, वाचस्पतिः। ***न्यायवार्तिकतात्पर्यटीका***। .द्रविडः, राजेश्वरशास्त्री (सम्पा.)। वाराणसी : चौखम्बासंस्कृतसंस्थानम्। द्वितीयसंस्करणम् , १९८९।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# नासदीयसूक्तदिशा महाविस्फोटतत्त्वदिशा च सृष्टिविज्ञानम् - एका पर्यालोचना

**रिया-व्यापारी**
**शोधच्छात्रा, संस्कृतपालिप्राकृतप्राच्यभाषाविभागः, इलाहाबादविश्वविद्यालयः**
**उत्तरप्रदेशः**

**प्रबन्धसारः**

*मनुष्यैः परिदृश्यमानं जगदिदमतीव विचित्रम् । परन्तु वैचित्र्यमयस्याऽस्य जगतः कः स्रष्टा ? इत्यस्य प्रश्नस्य निश्चितमुत्तरं दातुं कोऽपि न समर्थः । अस्माभिर्दृश्यमानमिदं नक्षत्रमण्डलं, चन्द्रः, सूर्यः धरित्री चेत्यादयः किं स्वयमेवोत्पन्नाः? एतान् प्रश्नसमूहान् एकत्रीकृत्य मनुष्यजिज्ञासुमनः अनुसन्धानसमुद्रे स्वनावः अवतारणम् अकरोत् एवञ्च प्राप्नोत् विविधतत्त्वरूपं मणिरत्नादिकम् । मणिः यथा मनुष्यं सुशोभितं करोति तथा तत्त्वरूपमणिरपि एकैकां सभ्यतां सुसज्जितां करोति ।*

*प्रजापतेः परमेष्ठिनः ऋषेः अमृतमयः मणिः तावत् नासदीयसूक्तं, यत् ऋषिप्रजापतये यथा ऋग्वैदिकयुगे उच्चासने प्रतिष्ठाप्रदानमकरोत् तथा भारतीयज्ञानपरम्परामपि समृद्धिमकरोत् । सभ्यतायाः परिवर्तनेन सह चिन्तनशक्त्याः अपि परिवर्तनं जातम् । तदर्थं सृष्टिविज्ञानं प्रति कौतूहलवशतः जर्जलेमैत्रेमहोदयः जगत्सृष्टेः कारणरूपेण यस्य महाविस्फोटतत्त्वस्योद्भावनं कृतवान् तत् पाश्चात्यज्ञानपरम्परां समृद्धिमकरोत् ।*

**कुञ्चीशब्दाः :–ब्रह्माण्डं, सृष्टिः, ऋग्वेदः, नासदीयसूक्तम्, Big Bang Theory चेत्यादयः**

**************************************************************************

## उपोद्घातः

मानवसभ्यतायाः उद्भवात् विकाशाच्च परं मनुष्याणां बौद्धिकसत्तायाः अपि विकाशः साधितः । स्वमेधया मनुष्याः जगत्संसारेऽस्मिन् सर्वोत्कृष्टप्राणि-रूपेण परिगण्यन्ते । द्रुततया बुद्ध्याः विकाशे साधिते सति मनुष्याणां मनसि इतरेषां जिज्ञासानामपि आविर्भावोऽभवत् । जिज्ञासुमनसैव ते विविधशास्त्राणि प्रणेतुं प्रयासिनोऽभवत् । ततः शास्त्रप्रणयनस्य सूत्रपातः जातः जिज्ञासया –

"अथातो ब्रह्मजिज्ञासा ।"[1] "अथातो धर्मजिज्ञासा ।"[2]

मनुष्याणाम् ईदृशी निरन्तरजिज्ञासा मनुष्यान् स्वीयम् अस्तित्वं ज्ञातुं प्रवर्तयति । मनुष्यप्रज्ञानस्य सर्वापेक्षया विकाशसाधनम् ऋग्वैदिककालादेव अभूत् । उत्कृष्टा चिन्तनमनीषा मनुष्यान् स्वीयास्तित्वस्य समीपं प्रापयति । अस्तित्वस्य अनुसन्धानं कुर्वन्तः ऋषयः स्वेषां चिन्तनपरम्परायां यदुद्भासितं तत्त्वमाविष्कृतवन्तः, तदेव ब्रह्माण्डमिति ।

ऋग्वैदिककालादारभ्य अद्यावधि मनुष्याणां मनसि ब्रह्माण्डस्य उत्पत्तिविषये बहुशः कुतूहलानि जातानि । ब्रह्माण्डविषये ज्ञानप्राप्तये मनुष्याः अतीव उत्सुकाः बभूवुः । फलतः तेषां चिन्तनस्य प्रभावेण ऋग्वेदस्य नासदीयसूक्तस्य तथा आधुनिकयुगस्य महाविस्फोटतत्त्वस्यैव **(Big Bang Theory)** उच्चावचानि तत्त्वानि भूभागे प्रचलितानि सन्ति, तान्येव संक्षेपेणालोच्यन्तेऽत्र ।

➢ **ब्रह्माण्डस्य परिभाषा :–**

ब्रह्माण्डशब्दः नपुंसकलिङ्गे प्रयुज्यते । राजराधाकान्तदेववाहादुरविरचिते शब्दकल्पद्रुमनामके

---

[1] ब्रह्मसूत्रम् १/१/१

[2] मीमांसादर्शनम् १/१/१

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

कोशग्रन्थे ब्रह्माण्डस्य परिभाषा तावत् – "ब्रह्मणो जगत्स्रष्टुरण्डम् । चतुर्दशभवनगोलकः । यद्वा, ब्रह्मणा विश्वसृजा कृतमण्डम्"[3] इति । किञ्च मनुसंहितायाम् आचार्यमनुराचष्टे –

"तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।

तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥"[4]

अर्थात् , यस्मिन् अण्डे सहस्रशः ज्योतिपुञ्जाः तथा सृष्टियज्ञसम्पाद्यमानः सर्वलोकपितामहः ब्रह्मा विद्यते तदेव ब्रह्माण्डमिति ।

भुवनकोशविमर्शग्रन्थे देवीप्रसादत्रिपाठीमहोदयः सुपरिमितेन वाक्येन ब्रह्माण्डस्य लक्षणमाह –
"यस्मिन् भाण्डे ग्रहनक्षत्रताराकाशगङ्गोल्काधूमकेतु-दैत्यमानवदेवादयः समस्ता जीवादयो भूर्भुवादिचतुर्दशलोकाश्च समन्विताः सन्ति तदेव ब्रह्माण्डम्"[5] इति । एवम्प्रकारेण बहुषु शास्त्रेषु ब्रह्माण्डस्य बह्व्यः परिभाषाः उपदिष्टाः सन्ति, तदत्राऽलं विस्तरेण वक्तुम् ।

➢ **ब्रह्माण्डस्योत्पत्तिः :-**

कथं वाऽस्य ब्रह्माण्डस्योत्पत्तिरभूदित्येवं-विषयमवलम्ब्य पण्डितेषु मतानैक्यं सृष्टम् । तत्र प्राधान्येन ब्रह्माण्डसृष्टिविषये मतद्वयमेव प्रचलितमस्ति, प्राचीनमतम् आधुनिकमतञ्च । वयमग्रे एतन्मतद्वयं पश्यामः ।

**(क) प्राचीनमतानुसारेण ब्रह्माण्डस्योत्पत्तिः –**

वैदिकयुगस्य मन्त्रद्रष्टृमुनिभ्यः आरभ्य अधुनिकयुगस्य वैज्ञानिकान् यावत् सर्वे प्रतिभापूर्णया स्वस्वमेधया ब्रह्माण्डोत्पत्तिविषये विविधानि मतानि व्यक्तीकृतवन्तः ।

ऋग्वेदस्य दशममण्डलस्य पुरुषसूक्ते मन्त्रद्रष्ट्रा ऋषिणा सृष्टिविषयकमन्त्रः उद्यते –

"तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒ ऋच॑ः सामा॑नि जज्ञिरे ।

छन्दा॑सि जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत ॥"[6]

तैत्तिरियोपनिषदि अपि सृष्टिवर्णनं दृश्यते –
"एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः"[7] इति । अर्थात्, परमेश्वरादात्मनः आकाशस्य सृष्टिरभूत्, आकाशात् वायुरजायत, वायोः अग्निरसृजत् , अग्नेरपां जलस्योत्पत्तिरभूत्, जलात् पृथिवी जाता, पृथिव्याः ओषधयः सृष्टाः, ओषधीभ्यः अन्नं सृष्टम्, अन्नात् पुरुषस्य सृष्टिरभूदित्येवमेव क्रमानुसारेण ब्रह्माण्डम् सृष्टमिति ।

प्राचीनधर्मशास्त्रे मनुस्मृतौ भगवता मनुना प्रथमेऽध्याये जगत्सृष्टेः कारणम् उद्यते –

"सोऽभिध्याय शरीरात्स्यात्सिसृक्षुर्विविधाः प्रजाः ।

अप एव ससर्जाऽऽदौ तासु बीजमवासृजत् ॥"[8]

**१. सृष्टिसमुत्पत्तिः नासदीयसूक्तञ्च :-**

सृष्टिसमुत्पत्तिविषयकाणि यानि सूक्तानि ऋग्वेदे प्राप्यन्ते, तेषु 'नासदीयसूक्तम्' त्वन्यतमं प्रधानसूक्तम् । उत्पत्तेः प्राक् जगत् कीदृश्यामवस्थायाम् आसीत् ? केन प्रकारेण जगता प्रादुर्भूतम्? एवंप्रकारेण ऋषिणा प्रजापतिना विविधायाः जिज्ञासायाः अवतारणा कृता । ततः मन्त्रद्रष्ट्रा ऋषिणा

[3] शब्दकल्पद्रुमः (तृतीयं काण्डम)

[4] मनुस्मृतिः १/९

[5] भुवनकोशविमर्शः, पृष्टम् ३१

[6] ऋग्वेदः १०/९०/९

[7] तैत्तिरीयोपनिषद् २/१

[8] मनुस्मृतिः १/८

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

सत्कार्यवादस्यासत्कार्यवादस्य च समन्वयसाधनपूर्वकं समाधानमप्युपदिष्टम्। अस्ति इति सद्, न असद् इति नासद्, नासतो भावः नासदीयः।

सृष्टेः प्राक् सर्वत्र जलमासीत्। “अप एव ससर्जाऽऽदौ”[9] इत्यादिना महर्षिः मनुः मनुस्मृतौ तदेवोद्घोषयति। अर्थात् जगतः आद्या सृष्टिः हि जलम्। महाकविना कालिदासेन अभिज्ञानशकुन्तलमिति नाटकस्य मंगालाचरणे उद्यते “या सृष्टिः स्रष्टुराद्या”[10] अर्थात्, प्रजापतेः ब्रह्मणः प्रथमा सृष्टिः जलम् आसीत्। राघवभट्टमहोदयेन अर्थद्योतनिकाटीकायाम् अस्मिन् प्रसङ्गे उक्तं –

“या सृष्टिरिति। या तनुः स्रष्टुर्ब्रह्मण आद्या सृष्टिः। जलमित्यर्थः। ‘अप एव ससर्जादौ तासु बीजमवाऽसृजत्’ इति स्मरणात्, सर्वादौ सर्गात् सर्गोत्पत्तिहेतुत्वाच्चातिशयो ध्वन्यते।”[11]

ऋग्वेदस्य नासदीयसूक्ते ऋषिणा स्वस्य गहनया चिन्तया सृष्टेः प्राग्दशायाः वर्णनापूर्वकमुद्यते –

“नास॑दासी॒न्नो सदा॑सीत्त॒दानीं॒ नासी॒द्रजो॒ नो व्यो॑मा प॒रो यत्।”[12]

अर्थात्, तस्मिन् काले यदा अस्याः सृष्टेः प्रादुर्भावः अभवत् , यदा चेयं धरित्री उत्पाद्यमाना आसीत्, तस्मिन् समये न असदासीत्, सदपि नासीत्। लोकाः नासन् अन्तरीक्षश्चापि नासीत्। अन्तरीक्षस्योपरि किमपि वस्तु नासीत्। सृष्टेः प्राक् मृत्युः, अमृतं, रात्रिः, दिवसः च नासन्। दिवसरात्र्योः अभावे सति सर्वत्र प्रकाशस्य अभावः आसीत्। ब्रह्मणः भिन्नं किञ्चन नासीत्। सर्वं जगत् ब्रह्मणि समाहितम्।[13]

जगदुत्पत्तेः प्राक् सर्वत्र तमसाच्छादितोऽन्धकारः सलिलं चासीत्। कारणेन सह कार्यम् एकीकृत्य ईश्वरस्य सिसृक्षावशतः जगत् उत्पद्यमानमभवत्।

“तम॑ आसी॒त्तम॑सा गू॒ळ्हमग्रे॑ऽप्रके॒तं स॑लि॒लं सर्व॑मा इ॒दम् ।
तु॒च्छ्येना॒भ्वपि॑हितं॒
यदासी॒त्तप॑स॒स्तन्म॑हि॒नाजा॑य॒तैक॑म् ॥”[14]

तमसः गूढता कीदृशीति विषये आचार्यसायणः वदति, “अग्रे सृष्टेः प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत् तमसा **गूळ्हम्**। यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत्”[15] इति। सृष्टेः बीजं मनसि निधाय ब्रह्मणि जगत्स्रष्टुं तत्परे सति परमात्मनः प्रज्ञानरूपः प्रकाशः चतुर्दिक्षु व्याप्तोऽभवत्। परमात्मनः किरणं प्राथम्येन क्षुद्ररूपेण विराजमानमासीत्, परन्तु सृष्टिकाले तत् प्रसारितम् अभूत्। सृष्टिकाले केचित् पदार्थाः साधारणाः केचित् असाधारणाः (Powerful) चासन्। भोग्यपदार्थाः निम्नतराः भोक्तृपदार्थाः च उच्चतराः आसन्।

“ति॒र॒श्चीनो॒ वित॑तो र॒श्मिरे॑षाम॒धः स्वि॑दा॒सी३दु॒परि॑ स्विदासी३त्।
रे॒तो॒धा आ॑सन्महि॒मान॑ आसन्त्स्व॒धा
अ॒वस्ता॒त्प्रय॑तिः प॒रस्ता॑त् ॥”[16]

[9] तदेव

[10] अभिज्ञानशकुन्तलम् १/१

[11] तत्रैव (राघवभट्टीया अर्थद्योतनिका)

[12] नासदीयसूक्तम् १०/१२९/१

[13] तत्रैव १०/१२९/२

[14] तत्रैव १०/१२९/३

[15] सायणभाष्यम्

[16] नासदीयसूक्तम् १०/१२९/५

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**(ख) आधुनिकमतानुसारेण ब्रह्माण्डस्योत्पत्तिः –**

आधुनिकमतानुसारेण जीवजगद्ग्रहताराधरित्री-नक्षत्रैस्माकं ब्रह्माण्डं परिव्याप्तम्। आधुनिकवैज्ञानिकाः मन्यन्ते यत् आनुमानिके प्रायेण अष्टार्बुदाधिकत्रयोदशाब्जवर्षेभ्यः (13.8 Billion Years) प्राक् ब्रह्माण्डस्य उत्पत्तिः बभूव।[17] महाविश्वः एव विश्वब्रह्माण्डमित्यभिधीयते। महाकाशस्य उत्पत्तेः परं हि जीवजगत् प्रादुर्भूतमासीत्। आधुनिकसमये प्राप्यन्ते बहूनि तत्त्वानि ब्रह्माण्डस्योत्पत्तिविषयकाणि, तेषु महाविस्फोटतत्त्वमेव सुप्रसिद्धमस्ति, तदेवाश्रित्य आलोचनायाः अग्रे गच्छामः।

**१. महाविस्फोटतत्त्वम् (Big Bang Theory)**


भारतीयज्ञानपरम्परायाम् ऋषयः कौतूहलवशतः येन प्रकारेण जगत्संसारस्य रचनां सूचितवन्तः तथैव आधुनिकवैज्ञानिकाः अपि जगत्सृष्टेः कारणमवगन्तुं प्रयत्नं कुर्वन्ति। कालस्य प्रवहमानायां गतौ मनुष्याणां चिन्ताशक्तिः न समाना, परन्तु मानवचित्तस्य जिज्ञासा पूर्ववदेवास्ति। ऋग्वैदिग्कालादारभ्य इदानीन्तसमयं यावत् मानवानां चिन्तनक्षमतायां विविधानि परिवर्तनानि जायन्ते। आधुनिकतायाः स्पर्शं जनजीवने परिवर्तनस्य दिशां दर्शयति। ब्रह्माण्डोत्पत्तिं प्रति क्षुद्रातिक्षुद्रा जिज्ञासाऽपि बृहत्तरमहीरुहस्य रूपं धृत्वा वर्तमानकालस्य विज्ञानस्य उन्नत्याः शिखरमवाप्नोति। फलतः आधुनिकवैज्ञानिकाः अपि जगत् किम् ? जगत्सृष्टेः कारणं किम् ? इत्यादीनां विविधप्रश्नानां सदुत्तरसमूहं ज्ञातुं ज्ञापयितुं तथा व्याख्यातुं समर्थाः भवन्ति ।

१९२७ ईशवीयाब्दे सर्वप्रथमं बेलजियामदेशस्य वैज्ञानिकः जर्जलेमैत्रेमहोदयः (Georges Edward Lemaitre) जगत्सृष्टेः कारणरूपेण एकं प्रकाण्डं विस्फोटं सूचयति। तस्य मतानुसारेण, तस्मादेव महाविस्फोरणात् जगतः उत्पत्तिः अभवत्। लेमैत्रेमहोदयेन मन्यते यत् सृष्टेः प्राक् एकः आदिपरमाणुः (The primeval atom) आसीत् इति। सुदीर्घकालं यावत् तस्मिन् परमाणौ लिथियामहिलियामादिवायवीयपदार्थानां सञ्चयोऽभूत्। क्रमशः वायौ लिथियामादिपदार्थानां समृद्धिवशतः तस्मिन् परमाणौ प्रबलः उत्तापः उत्पन्नोऽभूत् एवञ्च एकदा तस्य परमाणोः विस्फोरणम् अभवत्। प्रचण्डोत्तापः चतुर्दिक्षु श्लाखितः आसीत्। परवर्तिनि समये उत्तापे स्थितिशीले सति क्रमेण जगतोत्पत्तिः अभवत्। महाविस्फोटस्य अष्टादशकोटिवर्षेभ्यः (180 million years) अनन्तरं प्राथमिकानि नक्षत्राणि उद्भूतानि, ततः परं सप्तकोटिवर्षेभ्यः (70 million years) परं कृष्णविवराणि (Black Holes) च अजायन्। ब्रह्माण्डं क्रमशः स्फीतत्वं प्राप्नुवदस्ति। ततः आरभ्य अद्य पर्यन्तं प्रायः सार्धत्रयोदशाब्जवर्षाः (13.5 Billion Years) अतिवाहिताः इत्याधुनिकमतम्। मतमिदं चित्रेण अवगन्तुं प्रयासं कुर्मः –

---

[17] महाकाश पृथिवी विज्ञान, पृ.२९

ISSN : 2583-2271
Vol. - 5, No. 1: 2025




(चित्रम् - १)[18]

## ➢ उपसंहृतिः-

सृष्टिविज्ञानं प्रति मानवजातेः अतीव कौतूहलम् अस्ति। प्राचीनकालात्प्रभृति सृष्टिविज्ञानस्य रहस्यस्य अनुसन्धानं कुर्वद्भिः मनुष्यैः बहुयोजनम् अतिक्रान्तम्। प्रवाहमानेऽस्मिन् अनुसन्धानात्मके पथि मानवाः विविधानि तत्त्वानि आविष्कुर्वन्ति। ऋग्वेदस्य दशममण्डलस्य नासदीयसूक्तं भवतु अथवा आधुनिकविज्ञानस्य महाविस्फोटतत्त्वं वा भवतु, तत्तु सर्वं मानवानां चिन्तनमनीषायाः फलमेव।

वेदः हि अखिलब्रह्माण्डस्य मूलम्। ऋग्वेदे नासदीयसूक्ते येन प्रकारेण जगत्सृष्टेः वर्णना प्राप्यते तथैव वर्णनायाः प्रकाशः महाविस्फोटतत्त्वे दृश्यते। यथा नासदीयसूक्ते सृष्टेः प्राक् परमात्मनः तेजोमयेन किरणेन चतुर्दिशः परिव्याप्ताः आसन् तथैव प्रकाशस्योत्पत्तिः लेमैत्रेमहोदयेनापि महाविस्फोटतत्त्वे प्रतिपादिता। ऋग्वेदस्य नासदीयसूक्ते ऋषिणा सृष्टिविज्ञानं येन प्रकारेण व्याख्यातम् आधुनिककालिकस्य बहुविधसिद्धान्ते नासदीयसूक्तस्य प्रभावः दरीदृश्यते।

भारतीयज्ञानपरम्परायाम् एकेन शास्त्रेण सह अपरशास्त्रस्य यन्मेलबन्धनं तत्तु मल्लप्रतिघातविरोधवत्। एकः मल्लः यथा क्षणिकसमयस्य कृते स्वप्रतिपक्षेण प्रतिद्वन्द्विना मल्लेन सह विरोधं करोति किन्तु तं कदापि समूलेन न विनाशयति, तद्वत् अस्माकं भारतीयज्ञानपरम्परायाम् एकेन तत्त्वेन सह बहूनां तत्त्वानां विरोधे सत्यपि अपेक्षतया दुर्बलानि तानि सर्वाणि तत्त्वानि स्वमहिम्ना स्वस्वस्थाने विराजन्ते, न लुप्यन्ते। परन्तु पाश्चात्त्यज्ञानपरम्परायाम् एकेन तत्त्वेन सह बहूनां तत्त्वानां विरोधे सति अपेक्षतया दुर्बलं तत्त्वं चिरेण निश्चिह्नं भवति। अनेनैव कारणेन भारतीयज्ञानपरम्परायाम् अद्यावधि नासदीयसूक्तं स्वमहिम्ना दीप्यमानमस्ति, परन्तु पाश्चात्त्ये महाविस्फोटतत्त्वात् प्राक् विद्यमानानि तत्त्वानि चिरात् विलुप्ता अभवन्।

अनुसन्धानप्रियाः मनुष्याः साधारणतः एकेनैव सूत्रेण महत्याः समस्यायाः समाधानं कुर्वन्ति। कठोपनिषदः मन्त्रः प्रसङ्गेऽस्मिन् यथार्थतया प्रयोज्यते –

"उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत।"[19]

अनुसन्धानप्रबला मानवमेधा प्रतिनियतं नवनवतत्त्वानाम् अनुसन्धानं करिष्यतीति नास्त्यत्र सन्देहः।

---

[18] ब्रह्माण्डस्य समयरेखा, यत्र प्राथमिकानि नक्षत्राणि महाविस्फोटस्य अष्टादशकोटिवर्षेभ्यः (180 million years) अनन्तरम् उद्भूताः, ततः परं सप्तकोटिवर्षेभ्यः (70 million years) परं कृष्णविवराणि च अजायन्त। (चित्रश्रेयः - एन्. आर्. फुलर, राष्ट्रीयविज्ञानप्रतिष्ठानम्, आमेरिका)

[19] कठोपनिषद् १/३/१४

## सहायकग्रन्थसूची


- (१९९७)। *कठोपनिषद्*। स्वामी जुष्टानन्दः (सम्पा.)। कलकाता : उद्बोधनकार्यालयः।
- (२००४)। *भुवनकोशविमर्शः*। त्रिपाठी, देवीप्रसादः (सम्पा.)। दिल्ली : अमरग्रन्थपब्लिकेशन्स्।
- (२०१२सं)। *वेदान्त दर्शन*। गोयन्दका, हरिकृष्णदासः (सम्पा.)। गोरखपुरम् : गीताप्रेस्।
- (२०७४ सं)। *ईशादि नौ उपनिषद्*। गोयन्दका, हरिकृष्णदासः (सम्पा.)। गोरखपुरम् : गीताप्रेस्।
- कालिदासः। (२०१३)। *अभिज्ञान-शकुन्तलम्*। चक्रवर्ती, सत्यनारायणः (सम्पा.)। कलिकाता : संस्कृतपुस्तकभाण्डारः।
- जैमिनिः। (२०१७)। *मीमांसादर्शनम्*। सप्ततीर्थः, भूतनाथः (सम्पा.)। कलिकाता : संस्कृतबुक्-डिपो।
- बाहादुरः, राधाकान्तदेवः। (१९६७)। *शब्दकल्पद्रुमः (तृतीयकाण्डम्)*। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस्
- भट्टाचार्यः, सुबोधः। (२०१७)। *महाकाश पृथिवी प्राण*। कलकाता : बङ्गीयविज्ञानपरिषद्।
- मनुः। (२०२१)। *मनुस्मृतिः*। कौण्डिन्न्यायनः, शिवराजः (सम्पा.)। वाराणसी : चौखम्बा विद्याभवन।
- Mukhopadhyaya, Gobindagopal. (2018). A New Tri-Lingual Dictionary. Kolkata : Sanskrit Book Depot.

➢ **आन्तर्जालिकसूची : -**

१. https://vedicheritage.gov.in/

२. https://www.learnsanskrit.cc/

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# अद्वैतवेदान्ते ईश्वरस्वरूपम्

**डा. एस्.पि.तेजस्वि**
**सहायकाध्यापिका, श्रीसत्यसाइमानवाभ्युदयविश्वविद्यालयः**
**कर्णाटकः**

**प्रबन्धसारः**

*समस्तेऽस्मिन् प्रपञ्चे आध्यात्मिकाधिभौतिकाधिदैविकानि दुःखानि अनुभवन्तः प्राणिनः, अस्मात् दुःखरूपसंसारात् विमोचनाय प्रवृत्ताः । अस्य दुःखस्य अपाकरणसाधनम् अन्विष्यमाणा मार्गान्वेषणं कुर्वन्ति । तदा प्रत्यक्षादिप्रमाणपुरस्सरं क्रियमाणे अन्वेषणे "ज्ञानादेव तु कैवल्यं" इति श्रुत्या ज्ञानादेव दुःखस्य अपाकरणमिति ज्ञात्वा, तद्ब्रह्मज्ञानं दर्शनानां साहाय्येन प्राप्तुं शक्यमिति दर्शनानां विचारं कुर्वन्ति ।*

*तर्हि दर्शनस्य अर्थः कः इति प्रश्नस्य शान्तिः अनया व्युत्पत्या क्रियते यथा दृश्यते अनेन इति दर्शनम् । अर्थात् दर्शनस्य साधनम् । यत्र प्रमाण-प्रमेय-प्रमित्यादिव्यवहारः / विचारः भवति तद् दर्शनशास्त्रमिति औपनिषत्तत्त्वज्ञानरहिताः व्याख्यान्ति । परं औपनिषदां मते तु यच्छास्त्रं मोक्षं प्रतिपादयति, यत्र आत्यन्तिकदुःखनिवृत्तेः साधनम् उपदिष्टमिति तद्दर्शितपन्थानमनुसरद् विद्यमानं शास्त्रमेव दर्शनमिति शब्देन वाच्यम् । तथा चेत् वेदान्तशास्त्रस्यैव मोक्षप्रतिपादकत्वात् दर्शनमिति निश्चयेन वक्तुं प्रभवामः ।*

*पुरुषेण अर्थ्यते इति पुरुषार्थः । चत्वारः पुरुषार्थाः यथा धर्मः, अर्थः, कामः, मोक्षः चेति । एतेषु चतुर्विधपुरुषार्थेषु "मोक्षः" एव परमपुरुषार्थः, नित्यत्वात् । "न स पुनरावर्तते" इति श्रुत्या तस्य कैवल्यस्य नित्यत्वमवगम्यते । परिशिष्टानाम् अनित्यत्वात् न परमपुरुषार्थता । स च मोक्षः कीदृशः? केन साधनेन आप्तुं शक्यः? इत्यादिविचिकित्सा-दूरीकरणाय शास्त्रोऽयं प्रवर्तते । तस्मिन् विचारे मतभेदः विद्यते । ते एव दर्शनाख्याः यथा चार्वाक-बौद्ध-जैन-नैयायिक-सांख्य-मीमांसकाः । एतेषु श्रुति-स्मृतिसम्मततया आनन्दाख्यमोक्षस्वरूपविचारः वेदान्तदर्शने प्रस्थानत्रयेण प्रपञ्चितः । स विचारः सामान्यतया आनन्दमयाधिकरणस्थपुच्छब्रह्मादिशा यथामति विचार्यते ।*

**कुञ्चीशब्दाः- आनन्दः, दुःखमार्गः, ब्रह्म, जीवः, ईश्वरः. प्रकृतिः, अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयः, मोक्षः, पुच्छब्रह्म चेत्यादयः ।**

**************************************************************************

अद्वैतवेदान्ते ब्रह्मैव परमतत्त्वरूपेण प्रतिपाद्यते। ब्रह्मैव समस्तचराचरजगतः अधिष्ठानभूतम् । सिद्धान्ते अस्मिन् **"एकमेवाद्वितीयं ब्रह्म", "नेह नानास्ति किञ्चन"**[1], **"इदं सर्वं यदयमात्मा"**[2] इत्यादि-श्रुतिसाहाय्येन ब्रह्मणः सजातीय-विजातीय-स्वगतभेदत्रयराहित्यं, देशतः, कालतः, वस्तुतः परिच्छेदत्रयशून्यत्वं च बोध्यते। श्रुतिषु सगुण-निर्गुणरूपेण ब्रह्मणः स्वरूपम् उपवर्णितम् । तथा च दृश्यते - "**द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च**"[3] इति । तत्र "यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति"[4] इत्यादीनि सृष्टि-स्थिति-

[1] बृ.उ.- ४/४/१

[2] बृ.उ.- २/४/६

[3] बृ.उ.- २/३/१

[4] तै.उ. - ३/२

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

लयप्रतिपादकानि वाक्यानि, **"सत्यं ज्ञानमनन्तं ब्रह्म"**[5], **"यो वै भूमा तत्सुखम्"**[6], **"विज्ञानमानन्दं ब्रह्म"**[7] इत्यादिस्वरूपबोधकपराणि वाक्यानि ब्रह्मणः सगुणरूपत्वे प्रमाणानि। एवं च **"अस्थूलमनण्वह्रस्वमदीर्घमलोहितम्"**[8], **"अशब्दम-स्पर्शमरूपमव्ययम्"**[9] इत्यादि निषेधप्रतिपादनपराणि वचनानि ब्रह्मणः निर्गुणरूपं प्रमाणयन्ति।

**ब्रह्मणः लक्षणम् :-**

ब्रह्मणः स्वरूप-तटस्थभेदेन लक्षणद्वयं सङ्गिरन्ति अद्वैतिनः। तत्र स्वरूपं सद् व्यावर्तकं स्वरूपलक्षणं, कादाचित्कत्वे सति व्यावर्तकं तटस्थलक्षणम् इति उभयोः लक्षणयोः लक्षणम्। उक्तलक्षणानुसारेण सच्चिदानन्दरूपत्वं ब्रह्मणः स्वरूपलक्षणं सृष्टि-स्थिति-लयकर्तृत्वं च तटस्थलक्षणम् इति सिध्यति।

**अज्ञानस्वरूपम् :-**

अपरिच्छिन्ने ब्रह्मणि अनादिकल्पिता मूलप्रकृतिः तादात्म्यसम्बन्धेन तिष्ठति। त्रिगुणात्मिका च सा प्रकृतिः। अस्याः प्रकृतेः नामान्तराणि माया, अविद्या, अज्ञानं, शक्तिः, प्रधानम् इत्यादि।
यथा नैयायिकादयः ज्ञानाभावरूपेण नञोऽभावरूपत्वं लक्षयन्ति तदद्वैतिनां नेष्टम्। अज्ञानस्य निर्वचनम् एवं सङ्गिरन्ति आवरणविक्षेपशक्तिमदनादिभावरूपम-ज्ञानम् इति। चित्सुखाचार्याणां वचनमपि श्रूयते –

**"अनादिभावरूपं यद्विज्ञानेन विलीयते।**
**तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते॥"**[10] **इति**

अज्ञानस्य विद्यया निवर्त्यमानत्वात् अविद्या इति, जगतः उपादानत्वात् प्रकृतिः/प्रधानमिति, दुर्घटकार्यसम्पादकत्वात् माया इति, स्वातन्त्र्याभावात् शक्तिरिति च ख्यातिः। अज्ञानस्वरूपविषये भाष्यकाराणाम् अयमभिप्रायः -

**"सन्नाप्यसन्नाप्युभयात्मिका नो**
**भिन्नाप्यभिन्नाप्युभयात्मिका नो।**
**साङ्गाप्यनङ्गाप्युभयात्मिका नो**
**महाद्भुता अनिर्वचनीयरूपा॥"**[11]

आपाततया सदसद्भ्यां विलक्षणमनिर्वचनीय-रूपमज्ञानमिति सिद्धान्तेऽस्मिन् व्यवहारः। न ज्ञानमज्ञानम् इत्यत्र नञः अभावाऽनङ्गीकारे, सांशत्वाङ्गीकारे च एतानि कारणानि दरीदृश्यन्ते, यथा - विरुद्धार्थकत्वात् भावरूपत्वम्, उत्पत्तिराहित्याच्च अनादित्वं, प्रकाशेनान्धकारवत् ज्ञानेन निवर्त्यमानत्वात् च सांशत्वम् अङ्गीक्रियते।

**अज्ञानस्य शक्तिद्वयम् :-**

अज्ञानस्य आवरणविक्षेपाख्ये शक्ती स्तः। आवरणशक्तिः ब्रह्मस्वरूपमावृणोति, विक्षेपशक्तिः ब्रह्मणि समस्तसृष्टिं कल्पयति। तदुक्तं भगवत्पादैः -

**"शक्तिद्वयं हि मायाया विक्षेपाऽऽवृत्तिरूपकम्।**
**विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत्॥"**
**"अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः।**
**आवृणोत्यपराशक्तिः सा संसारस्य कारणम्॥"**[12]

परिच्छिन्नाज्ञानेन अपरिच्छिन्नं ब्रह्म कथम् आवृणोति इति शङ्कां निवारयति सदानन्दयतिः –

---

[5] तै.उ. – २/१/१
[6] छा.उ
[7] बृ.उ
[8] बृ.उ. – ३/८/८
[9] क.उ. – २/३/१४
[10] तत्त्व.प्र., पृ. -९७
[11] वि.चू., श्लोकः-२२२
[12] वा.सू. १३, १४

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**"घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः ।**
**तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥"**[13] इति ।

यदाशङ्कितं तत्सत्यम्। न हि अज्ञानं वस्तुतः ब्रह्माणमावृणोति, अथापि यथा मेघः द्रष्टृनयन-मार्गपिधायकतया नैकयोजनायतम् अर्कमण्डलम् आच्छादयन्निव प्रतिभाति, तद्वत्परिच्छिन्नम् अप्यज्ञानम् अपरिच्छिन्नमसंसारिणं द्रष्टृबुध्यावरकतया आच्छादयन्निव ज्ञायते इति ।

**अज्ञानस्य आश्रयत्वविषयत्वविचारः -**

अज्ञानस्याश्रयविषयत्वविचारे अद्वैतवेदान्ते अभिप्रायभेदाः दरीदृश्यन्ते। तेष्वादौ सर्वज्ञात्ममुनिभिः सङ्क्षेपशारीरके उक्तम् -

**"आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला ।**
**पूर्वसिद्धतमसो हि पश्चिमो नाऽऽश्रयो भवति नापि गोचरः ॥"**[14] इति ।

अनेन ज्ञायते शुद्धचैतन्यमेव अज्ञानस्य आश्रयो विषयश्चेति एतेषामभिप्रायः। यस्मात् अज्ञानसिध्यनन्तरं जीवसिद्धिः तस्मादज्ञानाश्रयविषयौ जीवे न सम्भवतः इति संक्षेपशारीरककाराणाम् अभिमतः। **"अहमज्ञः"** इति जीवे प्रतीयमानाज्ञानस्य न अहङ्कारविशिष्टचैतन्यमाश्रयः किन्तु अहङ्कारोपहितचैतन्यमेवेति ज्ञेयः। उपाधेः प्रतिबिम्बपक्षपातित्वात्, शुद्धचैतन्याश्रितमप्यज्ञानं स्वकृतसंसारबन्धनं जीवमुत्पादयति।
संक्षेपशारीरके दृश्यते -

**"सुकृतदुष्कृतकर्माणि कर्तृतां मतिगतात्मचिति प्रतिबिम्बकम् ।**
**व्रजतितद्वदधः परमात्मनो जगति याति तमः प्रतिबिम्बकम् ॥"**[15] इति ।

**विषयेऽस्मिन् वाचस्पतिमिश्राणां पक्षः -**

नाविद्या ब्रह्माश्रया किन्तु जीवे **"सा तु अनिर्वचनीया"**[16], **"विद्यास्वभावे ब्रह्मणि तदनुपपत्तेः"**[17] इत्यादिस्थलेषु अज्ञानस्य जीवाश्रितं ब्रह्मविषयत्वं च दरीदृश्यते। अध्यासिकसम्बन्धेन ब्रह्मणि विद्यमानमपि अज्ञानम् आच्छाद्यतासम्बन्धेन जीवे भवति, न ब्रह्मणि। **"नास्ति ब्रह्म, न भाति ब्रह्म"** इति असत्त्वाऽऽपादकाऽभानाऽपादकयोराव-रणयोर्जीव एव सम्भवात् जीवाश्रया अविद्या इति श्रीमिश्रमहाभागानामभिप्रायः।

**अज्ञानस्य द्वैविध्यम् :-**

माया चाविद्या च स्वयमेव भवति इति श्रुत्या माया, अविद्या चेति अज्ञानस्य द्वे रूपे। तत्र रजस्तमोभ्यामसंसृष्टशुद्धसत्त्वगुणप्रधानतया माया इति, रजस्तमोभ्यां संसृष्टाऽशुद्धसत्त्वगुणप्रधानतया च अविद्येति माया चाविद्या च स्वयमेव भवति इति श्रुत्या माया, अविद्या चेति अज्ञानस्य द्वे रूपे। तत्र रजस्तमोभ्यामसंसृष्टशुद्धसत्त्वगुणप्रधानतया माया इति व्यवहारः। इमे एव मायाऽविद्ये समष्ट्यज्ञानं - व्यष्ट्यज्ञानमिति कथ्येते। तत्र अज्ञानस्य विक्षेपांशप्रधाना भवति समष्ट्यज्ञानरूपा माया ततश्च आवरणांशप्रधाना भवति व्यष्ट्यज्ञानरूपा अविद्येति प्रतिपाद्यते। इमौ एव जीवेश्वरयोः उपाधी। तथाहि

[13] वे.सा, .पृ. १४

[14] सङ्क्षेपशारीरकम्

[15] सङ्क्षेपशारीरकम्

[16] ब्र.सू.भा, १/२/४

[17] ब्र.सू.भा., १/४/३

शुद्धसत्त्वप्रधानमायोपाधिः ईश्वरस्य, मलिनसत्त्व-प्रधानाविद्योपाधिः जीवः इति आख्यायते। मायोपाधेः शुद्धत्वात् तत्राभिमानिकब्रह्मचैतन्यस्य ईश्वरस्य सर्वज्ञत्वादिगुणाः, अविद्योपाधेः अशुद्धत्वात् तत्राभिमानिकजीवस्याल्पज्ञत्वादिगुणाः सम्भवन्ति। तदुक्तं सदानन्दयतिभिः – **"इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना एतदुपहितं चैतन्यं सर्वज्ञत्व-सर्वेश्वरत्व-सर्वनियन्तृत्वादिगुणकम-व्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते, सकलाज्ञानावभासकत्वात् इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना, एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञः"**[18] इत्युच्यते**, एकाज्ञानावभासकत्वात्** इति।[19]

**ईश्वरविषये अद्वैताचार्याणां पक्षाः -**

जीवेश्वरस्वरूपविषये अद्वैतनये त्रयः पक्षाः। ते यथा आभासवादः, प्रतिबिम्बवादः, अवच्छेदवादः। तत्र पञ्चदशीकाराणाम् आभासवादः। **"एते जीवेशावभासेन करोति माया चाविद्या च स्वयमेव भवति"**[20] इति श्रुत्या शुद्धसत्त्वप्रधानमायायां यः ब्रह्मचैतन्यस्य आभासः सः ईश्वरः इति अङ्गीकुर्वन्ति। तदुक्त -

**"मायाभासेन जीवेशौ करोतीति श्रुतौ श्रुतम्।**
**मेघाकाशजलाकाशाविव तौ सुव्यवस्थितौ।"**
**"मेघवद् वर्तते माया मेघस्थिततुषारवत्।**
**धीवासना श्चिदाभासस्तुषारस्थखवत् स्थितः"॥**
**"अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः।**
**ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरितः"॥[21]**

इति ईश्वरस्य सर्वज्ञत्वं सम्पादितं। उच्यते ईश्वरलक्षणं - जीवानां बुद्धिवासनाविशिष्टमायायां यः आभासः सः ईश्वरः इति।

यः आभासपक्षः श्रीविद्यारण्यस्वामिभिः प्रोक्तः सः न युक्तः इति श्रीनिश्चलदासाः विवेचयन्ति। एतेषाम अयमभिप्रायः - पूर्वोक्त ईश्वरलक्षणस्वीकारे, सर्वबुद्धिवासनाविशिष्टमायाद्याः प्रलयकाले एव सम्भवात् तदानीमेव ईश्वरः सर्वज्ञः भवेत्, न सर्वदा।केवल बुद्धिवासनानामाभासः ईश्वरः इति पक्षे किं वासनाभेदेन प्रतिबिम्बभेदः? आहोस्वित् सर्ववासानास्वेक एव प्रतिबिम्बः? वासनानन्त्यग्राह्ये ईश्वरानन्त्यप्रसक्तिः, द्वितीये सर्ववासनापक्षस्वीकारे तु प्रलयकालं विना ईश्वरस्य सर्वज्ञत्वाभावः इति पूर्वोक्तदोषाः एव आपतति। किञ्च उपाधिभूतवासनानामनेकत्वात् अनेका एव प्रतिबिम्बाः भवेयुरिति अनेकेश्वरत्व प्रसङ्गः। अतः मायायाः शुद्धसत्वांशेनैव निर्दुष्टसर्वज्ञत्वप्राप्तिः न तु मायायाः बुद्धिवासनाविशिष्टत्व स्वीकारे इति पर्यवसितम्।

प्रतिबिम्बपक्षे पुनः द्वौ पक्षौ स्तः। जीवेश्वरयोः उभयोरपि प्रतिबिम्बात्मकः इत्येकः पक्षः, जीवस्य प्रतिबिम्बत्वं ईश्वरस्य च बिम्बत्वमित्यपरः। तत्र जाबालश्रुतिबलेन विवरणानुसारिणाः एवमुच्यते - बिम्बस्थानीयः ईश्वरः प्रतिबिम्बस्थानीयः जीवः इति। ईश्वरस्यापि प्रतिबिम्बत्वाङ्गीकारे स्वातन्त्र्य हानिः भवेदिति एतेषामभिप्रायः। श्रुतिस्तु –

**"विभेदजनकेऽज्ञाने नष्टे ज्ञानबलान्मुने ।**
**आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति"॥**

[18] वेदान्तसारः, विद्वन्मनोरञ्जनी, पृ. ९४

[19] जाबालदर्शनोपनिषत्, पृ. ४२५-४२७

[20] नृसिंहोत्तरतापिन्युपनिषत्

[21] पञ्चदशी, ६/१५५-१५६-१६१

**संक्षेपशारीरककाराः -**

“**कार्योपाधिरयं जीवः, कारणोपाधिरीश्वरः**”[22] इति श्रुत्या कार्यकारणयोः प्रतिबिम्बत्वं प्रतिपादयन्ति। तथा हि कारणस्थानीभूतमायायां चित्प्रतिबिम्बः ईश्वरः, कार्यस्थानीये अन्तःकरणे चित्प्रतिबिम्बः जीवः इति। बिम्बस्थानीयः शुद्धचैतन्यमिति कथयन्ति तथा च संक्षेपशारीरके दृश्यते **“मायोपाधेरद्वयस्येश्वरत्वं कार्योपाधेर्जीवता च प्रतीचः”[23]।**

**अवच्छेदवादिनः वाचस्पतिमिश्राः -**

बिम्बप्रतिबिम्बाद्यवस्था चैतन्ये न सिध्यति, नीरूपत्वात्। तस्मात् अवच्छेदवादं रोचन्ते वाचस्पतिमिश्राः। न अविद्या ब्रह्माश्रया, किन्तु जीवे, सात्वनिर्वचनीया इत्यादि स्थलेषु अज्ञानस्य जीवाश्रितत्वं ब्रह्मविषयत्वं च दृश्यते। अतः अविद्यावच्छिन्नं चैतन्यं जीवः, तदनवच्छिन्नं चैतन्यम् ईश्वरः इति पर्यवस्य,अनवच्छिन्नपक्षे ईश्वरस्य सर्वज्ञत्वहानिः इति धिया श्रीनिश्चलदासः वदति- अविद्यया/ अन्तःकरणअनवच्छिन्नः ईश्वरः इति कथने उपाध्यभाववान् ईश्वरः इति ज्ञायते। ईश्वरस्य सर्वज्ञत्वादि गुणाः औपाधिकत्वात्, तदभावे सर्वज्ञत्वाभावः सम्भवति। अतः तल्लाभार्थं ईश्वरस्य मायोपाधिं कथयन्ति। तेन मायावच्छिन्नं चैतन्यम् ईश्वरः इति ईश्वरलक्षणम् ज्ञायते। तथा सति मायायाः सर्वदेशगतत्वात् ईश्वरस्य सर्वज्ञत्वादिगुणाः सिध्यन्ति।

एतावता ईश्वरस्वरूपं आभास-प्रतिबिम्ब अवच्छिन्न प्रक्रियाभेदेन निरूपितम्। यद्यपि ईश्वरस्वरूपे अभिप्रायभेदाः तथापि सर्वत्र सर्वज्ञत्व सर्वकर्तृत्वादि युक्तः एव ईश्वरः इति ज्ञातव्यम्। तस्मात् अद्वैतवेदान्ते ईश्वरपदेन सगुणं ब्रह्म बोध्यते। अयं च ईश्वरः नव्यायिकाभिमत ईश्वरवन्न केवलं जगतोर्निमित्तकारणम् अपि तु “यथोर्णनाभिः सृजते गृह्णते”[24] च इति श्रुत्या अभिन्ननिमित्तोपादानकारणम्। अत्र उपाधिभूता माया उपादानकारणम्, चेतनांशः निमित्तकारणम्।

**ईश्वरास्तित्वे प्रमाणम् -**

ईश्वरविषये श्रुति-स्मृति-सूत्रप्रमाणानि प्रदर्श्यन्ते-

१. यः सर्वेषु भूतेषु तिष्ठन्
२. यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः
३. य इमान् लोकानीशत ईश्वरः
४. ईश्वरः सर्वभूतानां हृद्देशेऽर्जुनतिष्ठति
५. जन्माद्यस्य यतः[25]
६. शास्त्रयोनित्वात्[26]

**ईश्वराङ्गीकारे प्रयोजनम् -**

दर्शनान्तरेष्विव अद्वैतवेदान्ते शुद्धचैतन्यस्य कर्तृत्वस्रष्टृत्वाद्यसंभवात् मायाविशिष्टस्येश्वरत्वम् अभ्युपगतम्। ईश्वरादेव सृष्टिः जाता इत्यत्र श्रुतिं प्रमाणयन्ति - **“यतो वा इमानि भूतानि जायन्ते[27]** इति। तथाहि भाष्यकाराः सूत्रभाष्ये “अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणात् भवति तद्ब्रह्म इति निरूपितवन्तः। एवमेव “अस्य महतो भूतस्य

[22] संक्षेपशारीरकम्

[23] संक्षेपशारीरकम्

[24] मुण्डकोपनिषत् ७

[25] ब्र.सू. - १/१/२

[26] ब्र.सू. - १/१/३

[27] तै.उ. - ३/१

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि"[28] इति श्रुत्यन्तरप्रमाणं प्रदर्शयन्ति। वेदकर्तृत्वमपि शबलब्रह्मणि प्रतिपादयन्ति- "महतः ऋग्वेदादेः शास्त्रस्यानेक-विद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म"[29] इति।

**सृष्टेः लीलास्वरूपम् -**

शबलब्रह्मणि स्रष्टृत्वाद्यङ्गीकारे जगतः सत्यत्वमापाततः अङ्गीकृतमिति अद्वैतहानिः पुनः ईश्वरप्रयोजनसत्त्वे नित्यतृप्तभङ्गः, प्रयोजनाभावे उन्मत्तप्रवृत्तिप्रसङ्गः आयाति। एतादृशान् आक्षेपान् सूत्रकाराः परिहृतवन्तः - **"लोकवत्तु लीलाकैवल्यम्"**[30] इति। ननु महदिदं विश्वरचनं कथं लीलावादेन वक्तुं शक्यते इति चेत्- सत्यम्, अल्पज्ञानानामल्पशक्तीनां महदिव भाति, न तु सर्वज्ञसर्वशक्तिसमन्वितेश्वरस्य। अत एव सर्वमिदं जगत् ईश्वरस्य लीलेत्युच्यते। अस्तु तर्हि का नाम लीला इति जिज्ञासायां समाधीयते लक्षणेन –"या प्रवृत्तिरल्पायाससाध्या, विधेयनिष्पत्तिमात्रफलका, लीलाकर्तुरुद्देश्यसाधिका सा एव लीला" इति। अल्पायाससाधनत्वं शबलब्रह्मणि उच्यते वाचस्पतिमिश्रैः-

**"निश्वसितमस्य वेदा वीक्षितमेतस्य पञ्चभूतानि।
स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः"** ॥[31]

इति।

**"आप्तकामस्य का स्पृहा"** इति श्रुत्या ईश्वरस्य न किञ्चिदपि प्रयोजनमुत्प्रेक्षितुं शक्यते। एवञ्च **"यतो वा इमानि भूतानि जायन्ते"**[32], **"यः सर्वज्ञः सर्ववित्"**[33] इत्यादिना सर्वज्ञत्वसर्वशक्तित्वप्रतिपादनात् नोन्मत्तप्रवृत्तिः। तेन ईश्वरस्य सृष्टिः लीलैवेति निरवद्यम्।

तदेवमद्वैतवेदान्ते मायाशबलितब्रह्मचैतन्यस्य ईश्वरस्य स्वरूपमुपवर्णितम्। ईश्वरोपाधिभूतमायायाम् आवरणशक्तेरभावात् जीववत् न ईश्वरस्वरूपावरणमिति स नित्यमुक्तः। स च जगन्निर्माणे उपाध्यंशेनोपादानकारणं, चेतनांशेन च निमित्तकारणमिति ऊर्णनाभिवत् अभिन्ननिमित्तोपा-दानकारणत्वेन अभ्युपगम्यते। किन्तु इदमप्यव-गन्तव्यं यदत्रेश्वरः न पारमार्थिकः किन्तु मायोपहितः इति मायावत्तस्यापि मिथ्यात्वमेव अङ्गीक्रियते।

## सहायकग्रन्थसूची


- Brahma Sutra Sankara Bhashya With Hindi Tika Satyananda Saraswati, Chaukhamba-2021-03-13. https://archive.org/details/brahma-sutra-sankara-bhashyawith-hindi-tika-satyananda-saraswati-chaukha
- Taittiriya Upanishad Gita Press Gorakhpur by eGangotri. https://archive.org/details/TaittiriyaUpanishadGitaPressGorakhpur


[28] बृ.उ. - २/४/१०

[29] ब्र.सू. - १/१/३

[30] ब्र.सू.- २/१/३३

[31] ब्र.सू.भा. मङ्गलश्लोकः

[32] तै.उ. - ३/२

[33] मु.उ. -१/१/१

- https://archive.org/details/in.ernet.dli.2015.408311. Sankshepa Sariraka 1st Adhyaya Vol.-1 by Muni, Sarvajnatma
- https://archive.org/details/BrihadaranyakUpanishadGitaPressGorakhpur_201905 Brihadaranyak Upanishad Gita Press Gorakhpur By narad- 2019-05-06.
- https://archive.org/details/mundaka-upanishad-gita-pressgorakhpur - Mundaka Upanishad Gita Press Gorakhpur by Gita Press Gorakhpur.
- https://archive.org/details/Vedanta.Panchadasi.with.Kalyana.Piyusa.Vyakhya Vedanta Panchadasi of Vidyaranya Swami with Kalyana Piyusa Vyakhya [Sanskrit] By Vidyaranya Swami.
- https://archive.org/details/zeNQ_vedanta-sara-by-sadanandawith-bhava-bodhini-sanskrit-hindi-commentory-by-ram-sh Vedanta Sara By Sadananda With Bhava Bodhini Sanskrit Hindi Commentory By Ram Sharan Tripathi Chaukhamba Vidyabhavan, Varanasi By Chaukhamba Vidyabhavan, Varanasi
- https://archive.org/details/vivekachudamanio00sankrich Vivekachudamani of Sri Sankaracharya [microform] : text, with English translation, notes and an index By Sankaracarya; Madhavananda, Swami.

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# "अथातो ब्रह्मजिज्ञासा" इत्यस्मिन् सूत्रे अथशब्दार्थविमर्शः

**दिवाकर-चक्रवर्ती**
**सहायकाध्यापकः, संस्कृतविभागः, श्रीसत्यसाइमानवाभ्युदयविश्वविद्यालयः**
**कर्णाटकः**

**प्रबन्धसारः**

*ब्रह्मसूत्रस्य "**अथातो ब्रह्मजिज्ञासा**" इति प्रथमसूत्रस्य "अथ"-शब्दस्य अर्थविमर्शः अत्र प्रस्तूयते। अथ-शब्दस्य बहवः अर्थाः सन्ति शास्त्रेषु यथा, अधिकारार्थः, आनन्तर्यार्थः, मङ्गलार्थश्चेति। परन्तु अस्मिन् सूत्रे अथशब्दस्य कोऽर्थः इति प्रश्ने सति अत्र अथ-शब्दः आनन्तर्यार्थः एव इति निश्चीयते।*

*साधनचतुष्टयसम्पत्तेः (नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिसाधनसम्पत्तिः, मुमुक्षुत्वम्) अनन्तरं ब्रह्मजिज्ञासा कर्तव्या इति भावः "अथ" इति पदेन सूच्यते। धर्मजिज्ञासाया अनन्तरमेव ब्रह्मजिज्ञासा कर्तव्या इति कश्चन क्रम-नियमः न स्वीक्रियते; यतः धर्मजिज्ञासायाः फलम् अभ्युदयः, ब्रह्मजिज्ञासाया फलं मोक्षः, उभयोः फलभेदात् च अधिकारभेदः सिद्धः।*

*धर्मः विधिलक्षणः, अनुष्ठानसापेक्षः च; ब्रह्मज्ञानं तु न विधिविषयः, न च क्रियासाध्यम् अपि तु स्वरूपबोधरूपं मोक्षहेतुः। अतः "अथ" इत्यस्य अर्थः साधनचतुष्टयसम्पत्त्यानन्तर्यसूचकः इति निष्कर्षः।*

*तस्मात् अस्मिन् सूत्रे "अथ" शब्दः आनन्तर्यार्थः, न तु अधिकारार्थः; साधनचतुष्टयसम्पत्तेः अनन्तरं ब्रह्मजिज्ञासा अवश्यं कर्तव्या इति सिद्धान्तः प्रतिपादितः।*

**कुञ्चीशब्दाः - आनन्तर्यार्थः, अधिकारार्थः, साधनचतुष्टयसंपत्तेः, ब्रह्मजिज्ञासा, कर्तव्या , पूजितविचारः चेत्यादयः।**

*************************************************************************

**भूमिका**

वेदान्तमीमांसाशास्त्रस्य नाम वेदान्तानां या मीमांसा, मीमांसा नाम पूजितविचारः, तस्याः वेदान्तमीमांसायाः सम्बद्धं यत् शास्त्रं तस्य वेदान्तमीमांसाशास्त्रस्य व्याख्यातुमिष्टस्य शास्त्रस्य इदमादिमं सूत्रम्। किमिति? '**अथातो ब्रहाजिज्ञासा**' इति मोक्षकामेन कर्तव्या इति सूत्रे अध्याहारः भवति। त्रिपदात्मकं सूत्रमिदम् – 'अथ', 'अतः' 'ब्रहाजिज्ञासा' इति पदच्छेदः। ब्रह्मणः जिज्ञासा ब्रह्मजिज्ञासा इति षष्ठीतत्पुरुषसमासः। अथ इति शब्दस्य आनन्तर्यमिति अर्थः। तेन साधनचतुष्टयसम्पत्यनन्तरम् इति तात्पर्यम् आयाति। अतः नाम कर्मफलस्य अनित्यत्वात् ज्ञानफलस्य मोक्षस्य च नित्यत्वात्, मोक्षकामेन ब्रह्मज्ञानाय वेदान्तवाक्यानां विचारः कर्तव्यः। ब्रहाजिज्ञासा नाम ब्रह्मणः जिज्ञासा कर्तव्या।

**अथ शब्दार्थविमर्शः**

"**मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ**"[1] इति अमरकोशेऽव्ययवर्गे अथशब्दस्य बहवोऽर्थाः सन्ति। अस्मिन् सूत्रे अथशब्दः कस्मिन् अर्थे विद्यते? श्रीमच्छङ्कराचार्याः भाष्ये उक्तवन्तः यत्- "**तत्र अथशब्दः आनन्तर्यार्थः परिगृह्यते, नाधिकारार्थः**"[2](ब्रह्मसूत्रशाङ्करभाष्यम्) इति अर्थात् अथशब्दः आनन्तर्यमित्यर्थे वर्तते। आरम्भार्थकः अथशब्दः अत्र न विद्यते ब्रह्मजिज्ञासायाः

[1] अमरकोशः अवयववर्गः-२८२९, पृ.स.- २३९

[2] वेदान्तदर्शनम्- १/१/१ पृ.स. ६६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

अनधिकार्यत्वात्। माङ्गल्यमित्यर्थे अपि अथशब्दः प्रसिद्ध अस्ति-

"**ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।**
**कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥**"[3]

इति स्मृतिः ।

मङ्गलार्थः अथशब्दस्य स्वभावसिद्धः अस्ति। तर्हि मङ्गलार्थत्वम् अथशब्दस्य कुतो न उच्यते? उच्यते समन्वयाभावात्। स्वभावतः अथशब्दस्य मङ्गलार्थत्वमस्ति एव अतः स्वभावतः माङ्गल्ये सिद्धे सति पुनः आनन्तर्यमित्यर्थः तत्र गृह्यते। तर्हि माङ्गल्यमिति अर्थः न भवति वा? उच्यते मङ्गलार्थकस्य अथशब्दस्य श्रवणादेव मङ्गलं भवति। भाष्यकाराः वदन्ति –"**अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति**"[4](ब्रह्मसूत्रशाङ्करभाष्यम्) इति। कदाचित् अथशब्दस्य पूर्वप्रकृतापेक्षत्वमिति अर्थः भवतु इत्युच्यते। तत्र उच्यते पूर्वप्रकृतापेक्षत्वमिति स्वीक्रियते आनन्तर्यार्थत्वमिति वा उच्यते उभयोः व्यतिरेक एव नास्ति, उभयोः समानता विद्यते। आनन्तयार्थत्वमिति अर्थः भवति चेत् "अथातो धर्मजिज्ञासा" इति जिज्ञासाया: पूर्ववृत्तमथशब्देन उक्तमस्ति। वेदाध्ययनमिति आनन्तर्यमिति अर्थः अथशब्दस्य तत्रापि स्वीकृतः अस्ति। अतः वेदाध्ययनं नियमेन अपेक्षते। जिज्ञासायाः प्राक् वेदाध्यायनं नियमेन भवेत्। अतः ब्रह्मजिज्ञासायामपि किं वक्तव्यम्? उच्यते यत् नियमेन अपेक्षते तत् वक्तव्यम्। स्वाध्यायात् परमेव ब्रह्मजिज्ञासा कर्तव्या इति तु उभयत्र समानता विद्यते। इदं सर्वं पूर्वपक्षी पृच्छन् अस्ति। कर्मज्ञानात्परं धर्मजिज्ञासा कर्तव्या। धर्म- जिज्ञासायाः परं ब्रह्मजिज्ञासा कर्तव्या इति उच्यते चेत् तत्र विशेषः भवति वा? उच्यते न, अयं नियमो न भवति। कुतः? धर्मजिज्ञासाया: प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः। अर्थात् धर्मजिज्ञासायाः प्रागपि केनचित् वेदान्तानामध्ययनं कृतश्चेत् ब्रहाजिज्ञासा उपपद्यते। धर्मानुष्ठानं कथं करणीयम्? इत्यादिज्ञानं नास्ति चेदपि यदि वेदान्ताः अधीताः स्युः तर्हि ब्रह्मजिज्ञासा तेन कर्तुं शक्या अस्ति, एतेन भाष्यकारः किं सूचयति? इदं सूचयति यत् धर्मजिज्ञासा कर्तव्या तदनन्तरमेव ब्रह्मज्ञानं प्राप्तुं ब्रह्मजिज्ञासा कर्तव्या इति नियमो न भवति। यथा च हृदयाद्यवदानानामानन्तर्यनियमः क्रमस्य विवक्षितत्वात्, न तथेह क्रमो विवक्षितः। अर्थात् अवदानानामानन्तर्यनियमः क्रमो यथाशब्दार्थस्य विवक्षितत्वात् न तथेह धर्मजिज्ञासयोः क्रमः विवक्षितः, एककर्तृकत्वाभावेन तयोः क्रमानपेक्षणात्। अतः न क्रमार्थोऽथशब्द इत्यर्थः। ननु तयोरेककर्तृकत्वं कुतो नास्ति? उच्यते शेषशेषित्वे अधिकारे वा प्रामाण्याभावात्। अर्थात् शेषशेषित्वं नाम यत्र एकप्रधानशेषता भवति अवदानामामथवा प्रयाजादीनां तत्र प्रयाजादयः शेषभूताः यागाः, दर्शयागः शेषी इति दर्शयागस्य शेषित्वमस्ति, प्रयाजादीनां शेषत्वमस्ति। अथवा अधिकृताधिकारत्वम्। दर्शपूर्णमासाङ्गमाश्रित्य अपां प्रणयनं भवति "गोदोहनेन पशुकामस्य" इतिः गोदोहनस्य दर्शपूर्णमासाङ्गत्वं स्वीकृतमस्ति। अथवा "**दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत्**"[5] (तै.ब्रा.) इति श्रुतिः। दर्शपूर्णमासयागं कृत्वा तदनन्तरं सोमयागः कर्तव्यः भवति, एवं दर्शादि-अधिकृताधिकारित्वं

[3] चतुःसुत्री- भूमिका

[4] वेदान्तदर्शनम्-१/१/१ पृ.स. ६७

[5] तैत्तिरीयब्राह्मणम्

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

दर्शयागे यः अधिकृतः स एव सोमयागे अधिकृतो भवति। तदा एव तत्र एककर्तृकत्वं भवति। अतः शेषशोषितं वा अधिकृताधिकारित्वं वा अत्र सम्भवति वा? उच्यते न, तादृशं किमपि प्रमाणं नास्ति। ब्रह्मचर्यात् साक्षादपि सन्न्यासं कर्तुं शक्यते। अतः "**ब्रह्मचर्यादेव प्रव्रजेत्**"[6] (जाबालोपनिषद्) इति शास्त्रमस्ति। तत्र प्रामाणं स्वीक्रियते। तस्मात् शेषशेषित्वे अधिकृताधिकारे वा प्रमाणं नास्ति, "**गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेदिति**"[7] क्रमः श्रुतौ उक्तः अस्ति। किन्तु तेनैव क्रमेण गच्छेदिति श्रुतिः नाग्रहं करोति। "धर्मजिज्ञासयो: फलं जिज्ञास्यभेदाच्च" अर्थात् धर्मजिज्ञासायाः फलं भिन्नं किञ्च ब्रह्मजिज्ञासायाः फलं भिन्नम् । धर्मजिज्ञासायाः फलम् अभ्युदयप्राप्तिः। ब्रह्मजिज्ञासायाः फालं मोक्षप्राप्तिः। धर्मज्ञानम् अभ्युदयफलमस्ति तच्च अनुष्ठानसापेक्षं भवति। निःश्रेयसफलं तु ब्रह्मविज्ञानं तथा मोक्षगं भवति। अनुष्ठानेन तत् लब्धुं न शक्यते। भविष्यत्काले यः उत्पत्स्यमानः भवति यः धर्मः सः धर्मः जिज्ञास्यः न तु ज्ञानकाले। ज्ञानं यदा प्राप्यते यथा, अस्माभिः यदा अध्ययनं क्रियते तदा यागादिकं न क्रियते। यदा यागादिकं क्रियते तदा अधीतमेव यागं वयं कुर्मः। अत: ज्ञानकाले क्रिया नास्ति क्रियाकाले ज्ञानं स्वभावतः सिद्धमस्ति ।

अत्र ब्रह्मजिज्ञासा कर्तव्या इति उक्तं तत्र ब्रह्मणः स्वरूपं किम्? नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मणः स्वरूपम्। न पुरुषव्यापारतन्त्रं चोदनाप्रवृत्तिभेदाच्च अर्थात् चौदना प्रवृत्तिः अपि अत्र भिद्यते । तस्मात् धर्मब्रह्मजिज्ञासयोः फलभेदः अस्ति। "**चोदनालक्षणोऽर्थो धर्मः**"[8] इति जैमिनीयसूत्रम्। चोदना नाम विधिः। विधिलक्षणः धर्मः। चोदना एव धर्मस्य लक्षणमिति उक्तं, सा किदृशी भवति ? उच्यते सा स्वविषये विधानं कुर्वती एव इयं पुरुषमवबोधयति। ब्रह्मचोदना पुरुषमवबोधयति तथा पुरुषस्य केवलं ज्ञानं जनयति। अतो बोधः चोदनाजन्यः न भवति अर्थात् क्रिया ज्ञानोत्पत्तेः कारणं न भवति इति। या कापि क्रिया भवतु सा ज्ञानोत्तरं भवति न तु ज्ञानोत्पत्तिं प्रति कारणत्वम्। अतः अवबोधस्तु चोदनाजन्य: तस्मात् पुरुषस्य अवबोधे नियोगः न भवति। अवबोधे विधिः न भवति। ज्ञाने विधिः भवितुं नार्हति। यथा चक्षुरिन्द्रियेण सह अर्थस्य घटादेः यदा सन्निकर्षः भवति तदा अयं घट: इति ज्ञानं भवति इति अर्थबोधः एव फलं तद्वत्। अथपदस्य तादृशः कश्चित् अर्थः वक्तव्य एव भवति यस्य अनन्तरं ब्रह्मजिज्ञासा उपदिश्यते इति। भाष्यकाराः शङ्कराचार्याः वदन्ति – "**नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमादिसाधनसम्पत्, मुमुक्षुत्वं च**"[9] इति (ब्रह्मसूत्रशाङ्करभाष्यम्)। तेषां साधनचतुष्टयरूपाणां सत्त्वे एव धर्मजिज्ञासायाः पूर्वं परमपि ब्रह्मजिज्ञासा कर्तुं शक्या। साधन-चतुष्टयस्य सत्त्वे एव ब्रह्मजिज्ञासा भवितुमर्हति न विपर्यये। अथार्त् यः असमाहितचित्तः वर्तते, यस्य आत्मसंयमः नास्ति, विवेकः नास्ति, वैराग्यं नास्ति, लोभयुक्तं चित्तं यस्य तस्य तु 'ब्रहाजिज्ञासा' इति शब्द-प्रयोगः व्यर्थ एव। अतः अथशब्देन किमुपदिश्यते? साधनचतुष्टयरूपा सम्पत्तिः उक्ता तदनन्तरं ब्रहाजिज्ञासा कर्तव्या इति। अतशब्दः कस्मिन् अर्थ वर्तते?, अतः इति शब्दः हेत्वर्थे वर्तते। वेदः अग्निहोत्रादीनां श्रेयःसाधनानां

[6] जाबालोपनिषद्- ४/१

[7] जाबालोपनिषद्- ४/१

[8] जैमिनीयसूत्रम्

[9] वेदान्तदर्शनम्- पृ.स. ८०

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

तथा स्वर्गादीनाम् अनित्यफलतां दर्शयति। वेदे साक्षात् दृश्यते – "**तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते**"[10] (छा. उ .८-१-६) इति। अर्थात् कर्मचितो लोकः यथा क्षीयते एवमेव पुण्यचितो लोकः क्षीयते इति। ब्रह्मविज्ञानं परमं पुरुषार्थं मोक्षं प्रयच्छति –"**ब्रह्मविदाप्नोति परम्**"[11] (तै. उ. २-१-१) इत्यादिः। ब्रह्मविद् ब्रह्म एव भविष्यति तस्मात् परं प्राप्नोति ब्रह्मवित्। यत् परमं यत् श्रेष्ठं यदुत्तमं स्यात् यन्मोक्षाख्यं तत्त्वं तत् ब्रह्मविदा प्राप्यते इत्यादिः। अतः वेदः नित्यानित्यत्वं तत्र नित्यं ब्रह्म अनित्यः ब्रह्मव्यतिरिक्तः सार इति बोधयति। अतः किम् ? यस्य विवेकः जातः अस्ति स एव ब्रह्म-जिज्ञासां कुर्यात्। अन्यथा स्वाश्रमविहितं कर्म कुर्यादित्यर्थः।

इदानीं प्रश्नो भवति यत् ब्रह्म प्रसिद्धमुत अप्रसिद्धमिति? यदि उच्यते ब्रह्म अप्रसिद्धमस्ति तर्हि अप्रसिद्धस्य ब्रह्मणः जिज्ञासा निरर्था एव स्यात् काकदन्तपरिगणनावत्। यदि उच्यते ब्रह्म प्रसिद्धमस्ति तर्हि प्रसिद्धस्य तथा ज्ञातवस्तुनः जिज्ञासा न भवति इति चेत् न। तस्य यः विशेषः विद्यते ब्रह्मणः तद्विषये विप्रतिपत्तिः अस्ति। का विप्रतिपत्तिः चैतन्यविशिष्टः देह एव आत्मा, देहस्य एव आत्मत्वमिति प्राकृतजनाः तथा लोकायतिकाः नाम चार्वाकाः प्रतिपादयन्ति, चेतनानि इन्द्रियाणि एव आत्मा तथा आत्मस्वरूपेण भवन्ति इति अन्ये चार्वाकाः प्रतिपादयन्ति। मनः इति अन्ये चार्वाकाः वदन्ति। विज्ञानमात्रमात्मा इति बौद्धाः प्रतिपादयन्ति। शून्यमात्मस्वरूपमिति केचित् वदन्ति। देहादिव्यतिरिक्तः संसारी कर्ता भोक्ता कश्चिदस्ति इति तार्किकाः वदन्ति। केवलं भोक्ता न कर्ता, कर्तृ-अचेतन-वस्तु इति सांख्यमतमिदम्। देहादिव्यतिरिक्तः तथा देहेन्द्रियमनोबुद्ध्याद्यतिरिक्तः अचेतनात् व्यावृत्तः चेतनः कश्चिदस्ति, स एव ईश्वरः सर्वज्ञः सर्वशक्तिरिति योगिनः वदन्ति। आत्मा स भोक्तुरिति वेदान्तिनः वदन्ति । एवं बहूनां विप्रतिपत्तिः आत्मनः विषये विद्यते। आत्मा अस्ति देहेन्द्रियादिव्यतिरिक्तः तस्मात् आत्मसाक्षात्कारः अपेक्षते । अतः ब्रह्मजिज्ञासा कर्तव्या।

**उपसंहारः-**

तस्मात् अथशब्देन साधनचतुष्टयरूपा सम्पत्तिः उक्ता तदनन्तरं ब्रह्मजिज्ञासा कर्तव्या। तस्मात् अथशब्दः आनन्तर्यार्थः न तु अधिकारार्थः।

## सहायकग्रन्थसूची


- शङ्कराचार्यः। (२०१३)। ब्रह्मसूत्र-शाङ्करभाष्यम्। दयानन्द-सरस्वती (अनुवादकः)। वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान। वाराणसी
- अमरसिंहः। (१९३७)। *अमरकोशः*। श्रीमान्नालालः अभिमन्युः। वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।
- (२००५)। *उपनिषद्*। शर्मा, आचार्यः, श्रीरामः। मथुरा : युग निर्माण योजना।
- जैमिनिः। (१९४३)। *जैमिनिसूत्रम्*। अच्युतानन्दः । वाराणसी : विद्या विलास प्रेस।


[10] छान्दाग्योपनिषद्- ८/१/६

[11] तै. उ. – २/१/१

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# सांख्यशास्त्रे भ्रमज्ञानघटितसिद्धान्ताः

**डॉ. देवाशिष-मिश्रः**
**सहायकाचार्यः, संस्कृतविभागः, विवेकानन्दशतवार्षिकीमहाविद्यालयः**
**पश्चिमबङ्गः**

**प्रबन्धसारः**

*भारतीयदर्शने प्रमेयतत्त्वप्रतिष्ठार्थं प्रमाणतत्त्वस्य विश्लेषणं भवति। यतः 'प्रमेयसिद्धिः प्रमाणाद्धि' अथवा 'मानाधीना मेयसिद्धिः' इति। यद्यपि प्रमाणतत्त्वस्य ज्ञानं स्वस्य उत्पत्तौ स्वयमेव अपेक्ष्यते तथापि उत्पन्नज्ञानेन प्रमाणतत्त्वस्यैव सिद्धिः भवति, विषयेऽस्मिन् भारतीयदार्शनिकेषु मतसाम्यं दृश्यते। परन्तु तत्र किं यथार्थज्ञानं किञ्च अयथार्थज्ञानं, किं प्रमाणं, कश्च प्रमाणाभासः इत्येतेषु विषयेषु भारतीयदार्शनिकेषु मतवैमत्यं दरीदृश्यते। सर्वेषु दर्शनेषु प्रमाविश्लेषणेन सह अप्रमाविश्लेषणमपि परिलक्ष्यते। प्रमेयशास्त्रत्वाद् यद्यपि सांख्यशास्त्रे साक्षाद्रूपेण अप्रमाविश्लेषणं नास्ति तथापि विभिन्नविषयाणामालोचनावसरे यत्किञ्चिदप्रमाज्ञानविश्लेषणं प्राप्तं तस्य विन्यासः यथामति क्रियते अस्मिन् प्रबन्धे।*

**कुञ्चीशब्दाः - सदसत्ख्यातिः, अव्यक्तकारणं, द्वैतवादः, प्रतिविम्बितपुरुषः, बौद्धिकसमाहारः चेत्यादयः।**

****************************************************************************

## भूमिका

सांख्यदर्शनं प्राचीनतमदर्शनं भारतीयदर्शनेषु इति पण्डिताः निगदन्ति। दर्शनस्यास्य प्रतिष्ठाता महर्षिकपिलः।[1] शास्त्रमिदं यद्यपि प्रमेयशास्त्रं तथापि तत्र ज्ञानतात्त्विकालोचनं समानरूपेण विद्यते।[2] सूत्रकारेण आचार्येण कपिलेन ज्ञानतात्त्विकालोचनावसरे भ्रमज्ञानविषये पञ्च सूत्राणि कृतानि। एतैः सूत्रैः भ्रमज्ञानविषये अपरेषां दार्शनिकानां मतखण्डनपूर्वकं युक्त्या स्वमतस्थापनं तेन कृतम्। ईश्वरकृष्णस्य संख्यकारिकायां भ्रमज्ञानविषये यद्यपि विस्तरेण आलोचनं न प्राप्यते, तथापि प्रमालक्षणावसरे तेन संशयाद्यप्रमाणानाम् उल्लेखः क्रियते। योगदार्शनिकैः अपि भ्रमज्ञानविषये उच्यते विपरीतज्ञानमेव मिथ्याज्ञानम् अविद्या वा।[3] सांख्ययोगनये विपर्ययः बन्धनस्य कारणम्।[4] अत्र विपर्ययशब्देन अविद्या एव बोध्या।[5] सांख्ययोगनये विपर्ययः पञ्चविधः, ते च अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशश्च। तेषां मते एते रागादयः अपि विपर्ययस्वरूपत्वात् विपर्ययादभिन्नाः।[6] अविद्या अप्रमा विपर्ययः वा एतेषां निमित्तकारणम्। तथाहि खलु यद्वस्तु विपर्ययस्य विषयः तद्वस्तु एव अस्मितादेः विषयः, तस्मात् रागादयः अविद्यास्वरूपाः। सांख्यशास्त्रे केचन सिद्धान्ताः प्राप्यन्ते ये खलु अविद्यया, मिथ्याज्ञानेन वा गृह्यन्ते तेषामुपस्थापनम् अत्र क्रियते यथामति।

## १.सदसत्ख्यातिः

सांख्ययोगदार्शनिकैः सत्कार्यवादः स्वीकृतः। अर्थात् कार्यम् उत्पत्तेः प्रागेव स्वकारणे विद्यते।

---

[1] ''ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्विभर्त्ति जायमानञ्च पश्येद्।'' सां द. कालिवरवेदान्तवागीशः- पृ.१०

[2] ''प्रमेयसिद्धि प्रमाणाद्धिः।'' सां.का.४

[3] "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्म-ख्यातिरविद्या।" यो.सू.२/५

[4] "ज्ञानेन चापवर्गो, विपर्ययादिष्यते बन्धः।" सां.त.कौ., पृ. २८७

[5] "तत्र विपर्ययः अज्ञानमविद्या।" सां.त.कौ. .२९१

[6] "विपर्ययप्रभवाणामप्यस्मितादीनां विपर्ययस्वभावत्वात्।" तदेव-२९४

उत्पत्तिः नाम स्वकारणे विद्यमानस्य कार्यस्य केवलं बहिःप्रकाशः। यथा तिलमध्ये तैलं तिष्ठति, यत्नेन केवलं बहिःप्रकाशः भवति। परन्तु वालुकायां तैलं कदापि न तिष्ठति, तस्मात् यथासाध्यं चेष्टया अपि कदापि वालुकातः तैलस्य प्रकाशः न सम्भवः। अतः कार्यं कारणमध्ये प्रागेव सद्रूपेण विद्यते। तथाहि चाकचिक्यादिसादृश्यवशात् शुक्तिकायां रजतस्य ज्ञानम् उत्पद्यते ततः पुरुषस्यापि प्रवृत्तिः भवति। परन्तु प्रयोजनसिद्धेः अभावात् तत्र असद्बुद्धिः प्रतीयते। अर्थात् भ्रमस्थले प्राग् सद्बुद्धिः तदनन्तरम् असद्बुद्धिः, तस्मात् भ्रमविषये तेषां मतवादः सदसत्ख्यातिवादः इति नाम्ना दार्शनिकसमाजे परिचितः।[7] विज्ञानभिक्षुणापि अस्य व्याख्यायाम् उक्तं यद्यपि वस्तु स्वरूपेण सत् तथापि अध्यस्तरूपेण असत्, अतः तेषां भ्रमविषयकसिद्धान्तः सदसत्ख्यातिः इति।[8]

सांख्ययोगदार्शनिकाः सदसत्ख्यातिवादस्य आलोचनाप्रसङ्गे माध्यमिकानाम् असत्ख्यातिवादस्य खण्डनं कृतवन्तः। शून्यवादिमाध्यमिकबौद्धानां मते यत्किञ्चिद् वस्तु दृश्यते तत् सर्वं न सत् नापि असत्। माध्यमिकानां मते शून्यमेव आत्मा। न केवलम् आत्मा परन्तु दृश्यमानः जगत्प्रपञ्चः अपि शून्यः।[9] अस्य खण्डनार्थं सांख्यदार्शनिकाः भणन्ति असद्वस्तुनः ज्ञानं कदापि न सम्भवेत्।[10] अर्थात् नृशृङ्गरूपासद्वस्तुनः ज्ञानं यथा न भवति तथैव कस्यापि असद्वस्तुनः ज्ञानं न भवति इति तु सूत्रकारस्य मतम्। यदि असद्वस्तुनः ज्ञानं स्वीक्रियते तर्हि नरगर्धवशशानां शिरसि शृङ्गज्ञानस्य आपत्तिः स्यात्।

योगाचारमते ज्ञानं सर्वदा सद्वस्तु। भ्रमस्थले सर्पादेः या प्रतीतिः तस्य कारणं खलु सर्पादेः सत्ता। अर्थात् भ्रमस्थले अपि सर्पः ज्ञाने सन्। सत्तया एव तस्य ज्ञानं भवति इति तु आत्मख्यातिः। यदि सदा सद्वस्तूनामेव प्रतीतिः भवति तर्हि कदापि तेषां बाधः न सम्भवः,[11] परन्तु तेषां बाधः भवति। रज्जौ प्रतीतः सर्पः न सत्पदार्थः यतः आलोकेन रज्जोः प्रतीतिः भवति, तथा सर्पस्य प्रतीतिः विनश्यति। तथाहि अत्यन्तरूपेणासद्गुणादेः यद्यपि प्रतीतिः भवति, तथापि विनाशकाले तेषामपि बाधः भवति।[12] तथा चैतन्ये भासमानस्य जगतः बाधः चैतन्ये एव भवति।[13] वृत्तिकारमते अनेन सूत्रेण प्रभाकरमतस्य अर्थात् अख्यातिवादस्य खण्डनमपि भवति। प्रभाकरमते ज्ञानमात्रं सत्। भ्रमस्थले ग्रहणात्मकस्मरणात्मक-ज्ञानद्वयं तिष्ठति। तत्र ज्ञानद्वयस्य भेदः न गृह्यते। तस्मादियम् अख्यातिः। परन्तु एतदपि न यथार्थं यतः यदि ज्ञानमात्रं यथार्थं भवेत् तर्हि तेषां बाधः न सम्भवति, यतः यथार्थस्य कदापि बाधः न भवति, परन्तु कालादिभिः सर्वेषां बाधः भवति, अतः ज्ञानमात्रं सत् इति प्रभाकरमतं न यथार्थम्।

भ्रमस्थले प्रतीयमानं वस्तु न सत्, नापि असत्, न सदसच्च। अतः तत् अनिर्वचनीयम् इति तु अद्वैतवादिनां मतम्। परन्तु यत् वस्तु न सत् नापि

---

7 ''सदसत्ख्यातिर्बाधाबाधात्।'' सां सू. ५/५६

8 ''स्वरूपेण स्वतः संस्वर्गतः अवस्थारूपेण अध्यस्तरूपेण वा असतः वस्तुनः प्रतीतिः सदसत्ख्यातिः।''

9 ''न सन्नासन्न सदसत् सदा लोकं प्रपश्यति।
तदा व्यार्त्तते चित्तं नैरात्म्यं चाधिगच्छति॥'' ल.सू.-३/२२

10 ''नासतख्यानं नृशृङ्गवत्।'' सां. सू.-५/५२

11 ''न सतो बाधदर्शनात्।'' तदेव-५/५३

12 ''अत्यन्तसतोऽपि गुणादेर्भाणं न युक्तम् विनाशकाले बाधदर्शनात्।'' सां.प्र.भा. सू-५/५३

13 ''नेह नानास्ति किञ्च॥''बृ.उ.-४/४/१६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

असत्, एवं वस्तु अस्मिन् विश्वे नास्ति। यतः एतादृशं वस्तु नास्ति अतः एतादृशस्य अनिर्वचनीयवस्तुनः कल्पनायाः आधारः अपि नास्ति। कल्पना सर्वदा दृष्टानुसारेण भवति।[14] विवरणप्रमेयग्रन्थकारेणापि भणितम् "अविद्या नाम काचित् अनिर्वचनीयभावरूपा नास्तीति वादिनः पक्षं .......।"[15] अतः अनिर्वचनीयतत्त्वस्य कल्पनाधारेण सृष्टेः मूलकारणस्य अनुमानम् अनुचितम्। अतः अनिर्वचनीयख्यातिः तन्मते परित्यज्या।

न्यायवैशेषिकाः भ्रमस्थले अन्यथाख्यातिम् अङ्गीकुर्वन्ति। अन्यथा अन्यधर्मप्रकारेण अन्यस्य ख्यातिः एव अन्यथाख्यातिः। तेषां मते भ्रमस्थले अलौकिकसन्निकर्षेण एकस्मिन् वस्तुनि अपरवस्तुनः आरोपः भवति। तत्र वस्तुद्वयमेव सद्वस्तु। एकम् अत्र सत् अपरम् अन्यत्र सत्। अतः भ्रमज्ञानम् अन्यथाख्यातिः इति।

अस्य न्यायवैशेषिकाङ्गीकृतस्य अन्यथाख्यातिवादस्य खण्डनावसरे तेन उच्यते स्ववचनविरोधवशात् अन्यथाख्यातिः न युक्तियुक्ता। यदा शुक्तिकायां रजतज्ञानं भवति, अर्थात् सम्मुखे दृश्यमानशुक्तिकायां रजतस्य ज्ञानं भवति तदा यदि केनापि एवम् उच्यते अन्यवस्तुनि अन्यवस्तुनः ज्ञानं भवति तर्हि तदा स्ववचनविरोधदोषः आयाति।[16] अर्थात् शुक्तिकायां रजतज्ञानं भवितुं न शक्यते परन्तु अत्र भवति, अर्थात् स्ववचनस्य विरोधः दृश्यते। अन्यत्र अन्यरूपेण ज्ञानं नृशृङ्गज्ञानवत्। यतः शब्दानुसारं ज्ञानं न भूत्वा अपरस्य ज्ञानं जायते अर्थात् स्ववचनविरोधः भवति। ज्ञानं सर्वदा ज्ञेयानुसारं भवति। यदि अन्यस्मिन् वस्तुनि अन्यस्य ज्ञानं स्वीक्रियते तर्हि एवं स्वीकर्तव्यं, ज्ञानं ज्ञेयस्यानुरूपं न भवति। अतः भ्रमस्थले नैयायिकैः अङ्गीकृता अन्यथाख्यातिः न सम्भवति।

अनेन रूपेण सर्वेषां मतं निराकृत्य सांख्याचार्यः भ्रमस्थले स्वमतानुसारं सदसत्ख्यातिवादं प्रवर्त्तयति। तन्मते भ्रमस्थले बाधवद् अबाधोऽपि दृश्यते। यथा शुक्तिकायां यदा रजतज्ञानं भवति तदा इदमित्यंशे अबाधज्ञानम् अर्थात् सत्ख्यातिः तथा रजतांशे बाधज्ञानम् अर्थात् असत्ख्यातिः। तथाहि गुणादीनां सर्वेषां वस्तूनां सदसत्ख्यातिः भवति। यतः एतेषां सर्वेषाम् अबाधोऽपि बाधवत् अस्ति। अत्र वस्तु स्वरूपतया न बाधते यतः सर्वाणि वस्तूनि नित्यानि सांख्यनये। परन्तु चैतन्ये संसर्गेण तानि बाधन्ते।[17] बाधस्य किं स्वरूपम् इति जिज्ञासायाम् उच्यते अवगतधर्मिणि निषेधबुद्धेः विषयत्वम् एव बाधः।[18] असत्त्वस्यार्थः अभावः, सः अभावः अधिकरणस्वरूपः। अत्र यदि कोऽपि एवं भणति सत्तासत्ते विरुद्धस्वभावविशिष्टे। परन्तु अयं विरोधः न यथार्थः, यतः भेदवशात् कोऽपि विरोधः नास्ति। यथा लौहित्यं विम्बरूपेण सत् परन्तु स्फटिकगतप्रतिविम्बरूपेण तदसत् एतत्तु सर्वेषां मतम्। तथाहि आपणस्थितरजतं सत् परन्तु तत् रजतं शुक्तिकायाम् अध्यस्तरूपेण असत्।[19] एवं च समग्रजगत् स्वरूपतया सत् परन्तु चैतन्ये

---

[14]"न सत् नासन् नापि सदसत् परस्परविरोधात् इति अनिर्वाच्यमेव आरोपणीयं मरीचितोयमास्थेयम्' नहि ब्रह्मवादिनो नीलाद्याकारां वृत्तिमभ्युपगच्छन्ति, किन्तु अनिर्वचनीयं नीलादिति।" भा.२/२/२८

[15] सां.द., गजाननशास्त्रीमुसलगाँवकारः, पृ.६२२

[16]''नान्यथाख्यातिः स्ववचोव्याघातात्।'' सां सू-५/५५

[17] "स्वरूपेणाबाधः सर्व्ववस्तूनां नित्यत्वात् संसर्गतस्तु बाधः।" सा.प्र.भा.भा.द.को. पृ.(वेदान्त) २७

[18] "प्रतिपन्नबुद्धिविषयत्वं बाधत्वम्।"

[19] "रजतं वणिग्वीथीस्थरूपेण सत् शुक्त्यध्यस्तरूपेण चासत्।" सा.प्र.भा. भा.द.को.पृ.(वेदान्त)२७

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

अध्यस्तरूपेण तदसत्।[20] अतः अवस्थाभेदेन सत्तासत्ताद्वयं न विरुध्यते। यथा वृक्षादिपदार्थाः परिणतरूपेण यद्यपि सत्पदार्थाः तथापि अङ्कुरावस्थायां ते असत्पदार्थाः। तथा सांख्यस्वीकृताः प्रकृत्यादिपदार्थाः सद्रूपेणापि विद्यमानाः तथा असद्रूपेणापि विद्यमानाः। अर्थात् अव्यक्तकारणं सर्वदा सदसदात्मकं भवति। पण्डिताः तां प्रकृतिनाम्ना प्रधाननाम्ना च अभिधीयन्ते।[21]

भ्रमस्थले यदा शुक्तिकायां रजतस्य भानं भवति तदा इदमिति शब्देन सम्मुखस्थितवस्तु एव बोध्यते। तस्य वस्तुनः चाकचिक्यादिसामान्यधर्मः आपणस्थितरजतस्य स्मृतिम् उत्पादयति। तस्मात् स्मृतेः लोभादिः जायते। सम्मुखभागे भासितेन रजतेन सह आपणस्थितरजतस्य कोऽपि सम्बन्धः नास्ति। परन्तु लोभादिवशादेव तयोः असम्बन्धः न गृह्यते। तथा च पुरोवर्तिशुक्तिकया सह आपणस्थितरजतस्य संसर्गः गृह्यते। अर्थात् भासमानवस्तुना सह वर्तमानवस्तुनः असम्बन्धः न बोध्यते। तस्मात् वस्तुद्वयम् एकरूपेण प्रतिभाति। परन्तु यदा द्वयोः असंसर्गस्य ज्ञानं जायते तदा रजतभ्रमः विनश्यति। परन्तु तत् रजतं स्वरूपेण कदापि न बाधते। यतः तत् रजतं पूर्वं यथा आपणे विद्यमानम् आसीत् अधुना अपि अस्ति। तथा च तस्य ज्ञानं पूर्ववत् अधुनापि उत्पद्यते। केवलं पुरोवर्तिशुक्तिकया सह तस्य संसर्गः बाधते। अनेन रूपेण संसर्गस्य बाधेऽपि स्वरूपतया अबाधे भ्रमस्थले बाधवत् अबाधः अपि भवति। तस्मात् सांख्यनये भ्रमज्ञानं सदसत्ख्यातिः।

जगद्विषये व्याख्या अपि अनेन रूपेण सांख्यदार्शनिकैः कृता। इदं जगत् कर्मरूपम्। कालान्तरे कार्यरूपजगतः बाधः भवति परन्तु कारणरूपेण तस्य अस्तित्वं विद्यते सर्वदा। यदि कारणं बाधते तर्हि कार्यस्य उत्पत्तिः न सम्भवति यतः अनाधारे कार्यस्योत्पत्तिः न सम्भवति। तस्मात् सांख्यदार्शनिकाः चिन्तयन्ति सर्वाणि कार्यवस्तूनि तेषां कारणे सूक्ष्मरूपेण विद्यन्ते, अतः कार्यं सत्। यदा कस्यापि कार्यस्य परिवर्तनं दृश्यते तदा केवलम् एकं रूपं परिवृत्य अन्यरूपम् आयाति। तात्पर्योऽयं कस्यापि रूपस्य तात्कालिकरूपेण अविद्यमानता एव बाधः। यथा सुवर्णरजतादिद्वारा विभिन्नेषु समयेषु विविधालङ्काराणां निर्माणं भवति। यद्यपि एतेषाम् आकृतेः परिवर्तनं भवति तथापि सुवर्णादिः तत्र तिष्ठति। प्रत्येकम् आकृतिः सर्वदा स्वकारणे तिष्ठति। निमित्तवशादेव तेषां प्रकाशः भवति। तथाहि संसारे सुखदुःखमोहादीनां या अनुभूतिः भवति तेन जगत्कारणरूपेण प्रकृतेः ज्ञानं भवति। अनेन रूपेण यद्यपि कार्यरूपजगत्प्रपञ्चः बाधते तथापि कारणरूपेण न बाधते। तथा च संसर्गे बाधेऽपि स्वरूपेण विद्यते अतः सदसत्ख्यातिः अवश्यं स्वीकर्तव्या।[22] अर्थात् सांख्ययोगनये भ्रमघटितसिद्धान्तरूपेण सदसत्ख्यातिः एव स्वीक्रियते।

### २. पुरुषस्य कर्तृत्वं भोक्तृत्वं बन्धनञ्च

द्वैतवादिसांख्ययोगदर्शनस्य मूलतत्त्वद्वयं खलु प्रकृतिः पुरुषश्च। तत्र आत्मा पारमार्थिकपुरुषः वा पुरुषशब्देन बोध्यते। पुरुषः देहेन्द्रियादिभ्यः

---

[20] "अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते।
ध्यायतो विषयानस्य स्वप्नोऽनर्थागमे यथा॥" सां.द. (सां.प्र.भा.५/५६), पृ.-६२४

[21] "नित्यदा ह्यङ्ग भूतानि भवन्ति च भवन्ति च।
कालेनाऽलक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते॥" भागवत ११/१२/४२

[22] "अतो न सन्नाऽसदिदं जगत् सदसदात्मकम्।" सां सा. अशोकवन्द्योपाध्यायः,पृ.९९

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

पृथक्।[23] पुरुषः स्वप्रकाशः विशुद्धचैतन्यस्वरूपः, निरवयवः, सर्वव्यापी, अजडः, निष्क्रियः, चेतनः, नित्यः, गुणातीतश्च।[24] पुरुषः अनादिः कारणाभावात्, पुरुषः अपरिणामी कार्याभावाच्च।[25] पुरुषः न खलु कर्ता भोक्ता च। यतः क्रियां विना कर्तृत्वं भोक्तृत्वञ्च न सम्भवतः। यदि पुरुषः क्रियाशीलः स्यात् तर्हि सः परिणामी इति। यतः क्रिया सदा परिवर्तनमेव सूचयति। सांख्यशास्त्रे मनोबुद्ध्यहङ्काराणां मेलनमेव अन्तःकरणम्। कर्तृत्वं भोक्तृत्वञ्च अस्य अन्तःकरणास्य धर्मौ।[26] पुरुषस्य कर्तृत्वं वास्तविकतया अन्तःकरणस्य कर्तृत्वम्।[27] पुरुषस्य कर्तृत्वं भ्रममात्रम्। विषयसन्निकृष्टान्तःकरणे यदा पुरुषः प्रतिविम्बितः भवति तदा अन्तःकरणस्य क्रियासुखदुःखादयः पुरुषे आरोपिताः भवन्ति।[28] तदा पुरुषस्य कर्तृत्वस्य भोक्तृत्वस्य च भ्रमः भवति। वस्तुतस्तु पुरुषः निष्क्रियः तथा बुद्धिः अचेतना। परन्तु अचेतनबुद्धिः पुरुषस्य सान्निध्यवशात् चेतनरूपेण प्रतीयमाना भवति तथा च कर्तृत्वविशिष्टबुद्धौ प्रतिविम्बितोऽकर्तृपुरुषः कर्तृरूपेण प्रतीयते।[29] अर्थात् बुद्धेः उपरागवशात् पुरुषस्य कर्तृत्वं न खलु पारमार्थिककर्तृत्वम्। विज्ञानभिक्षोः मते अहङ्कारविशिष्टशुद्धपुरुषः व्यवहारिकदशायां जीवः इति नाम्ना अभिधीयते सः खलु कर्ता भोक्ता च। शुद्धपुरुषस्य कर्तृत्वं भोक्तृत्वञ्च न स्तः।

वास्तविकतया क्रियादिः खलु शरीरस्य धर्मः न तु पुरुषस्य।[30] पुरुषस्य किमपि वृत्तिज्ञानं नास्ति। यतः वृत्तिज्ञानमपि अन्तःकरणस्य धर्मः। तस्मिन् अन्तःकरणे प्रतिविम्बितपुरुषे वृत्तिज्ञानस्य आरोपः भवति। पारमार्थिकदृष्ट्या पुरुषः कदापि वृत्तिज्ञानविशिष्टप्रमाता भवितुं नार्हति। प्रमाता खलु अन्तःकरणे प्रतिविम्बितपुरुषः, तस्य प्रतिविम्बितपुरुषस्यैव विकारः भवति। पुरुषः सुखदुःखरागद्वेषमोहशून्यः। एते सर्वे एव बुद्धेः गुणाः।[31] विज्ञानभिक्षोः मते अन्तःकरणस्य वृत्तिः पुरुषे प्रतिविम्बिता, तथा पुरुषः अन्तःकरणे प्रतिविम्बितः। तस्मिन् प्रतिविम्बितपुरुषे तादात्म्यवशात् वृत्तिज्ञानसुखदुःखादीनाञ्च कर्तृत्वम् आरोप्यते। अर्थात् भ्रमवशादेव इयमुपलब्धिः जायते।[32] तथा च यदि पुरुषस्य कर्म नास्ति तर्हि तस्य बन्धनमपि न सम्भवति। यतः कर्म एव बन्धनस्य कारणम्। अभिसम्बन्धवशात् अन्तकरणस्य सुखदुःखमोहादिधर्माः पुरुषे आरोपिताः भवन्ति। पुरुषस्य अस्याः अवस्थायाः नाम बन्धनम्। इदं बन्धनं भ्रमादतिरिक्तरूपेण किमपि न।

**३. पुरुषबहुत्वप्रतिपादकाः हेतवः**

[23] “देहादिव्यतिरिक्तोऽसौ वैचित्र्यात्॥” सां.प्र.सू., ६/१

[24] “न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते॥” सां.सू.-१/१९

[25] “ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्याऽपरिणामित्वात्।” यो.सू.-४/१८

[26] “वस्तुनो ज्ञाताज्ञातस्वरूपत्वात् परिणामि चित्तम्।” व्या.भा., यो.सू.-४/१७

[27] “अन्तःकरणस्य तदुज्ज्वलितत्वाल्लोहवदधिष्ठातृत्वम्।” सां.प्र.सू.१/९१

[28] “सुखादिप्रतिविम्बात्मा भोगोऽप्यस्य न वस्तुतः।” सां सा. अशोकवन्द्योपाध्यायः ,पृ. -९९

[29] “उपरागात्कर्तृत्वं चित्सान्निध्याच्चित्सान्निध्यात्।” सां.प्र.सू., १/१६४

[30] “न कर्मणान्यधर्मत्वादतिप्रसक्तेश्च।” सां.सू., १/१६

[31] “बुद्धितः परं पुरुषमाकारशीलविद्यादिभिर्विभक्तमपश्यन् कुर्यात्तत्रात्मबुद्धिं मोहेन इति।” व्या.भा., यो.सू.२/६

[32] “पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु॥” गीता-१३/२१

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

सांख्यनये पुरुषः न खलु एकः परन्तु बहुः।[33] ईश्वरकृष्णेन हेतुत्रयेण पुरुषस्य बहुत्वं प्रतिपादितम्। अत्र प्रथमहेतुः खलु जननमरणकरणानां भेदवशात् पुरुषः न खलु एकः। यदि पुरुषः एकः स्यात् तर्हि एकस्य जन्मनः सर्वे जायन्ते एकस्य मरणेन सर्वे म्रियन्ते, तथा एकस्य इन्द्रियवैकल्येन सर्वेषां इन्द्रियवैकल्यं जायते। परन्तु तन्न दृश्यते अतः पुरुषस्य बहुत्वं स्वीकर्तव्यम्। अत्र एवं वक्तव्यम् एतेन हेतुना पुरुषस्य बहुत्वं न सिध्यति। यतः सांख्यमते पुरुषः नित्यः अपरिणामी च, अतः जन्ममृत्युकरणादयः न खलु पुरुषस्य धर्माः।[34] एते सर्वे खलु प्रकृतेः धर्माः। अर्थात् अन्तःकरणे प्रतिविम्बितपुरुषे जन्ममृत्युकरणादयः तिष्ठन्ति परन्तु शुद्धपुरुषस्य एते धर्माः न सन्ति।[35] अत्र यदि तैः कथ्यते जन्ममृत्युशब्दस्यार्थः खलु देहेन्द्रियमनःबुद्ध्यादिभिः सह पुरुषस्य अभिसम्बन्धः एव बोध्यते, तदा वक्तव्यम् अभिसम्बन्धस्यार्थः खलु अभिमानरूपसम्बन्धः। असङ्गनिर्विकारित्वाद् देहेन्द्रियैः सह पुरुषस्य सम्बन्धः खलु आरोपितः न तु स्वाभाविकः। तथा च प्रवृत्तिवशाद् आत्मनः बहुत्वं तैः प्रतिपादितम्। प्रवृत्तिः नाम प्रयत्नः। सांख्ययोगमते प्रवृत्तिः खलु अन्तःकरणस्य धर्मः किन्तु पुरुषे आरोपितः भवति। अतः प्रवृत्तिरूपधर्मः आत्मनि नास्ति।[36] अर्थात् एवं दृश्यते पुरुषबहुत्वप्रतिपादनार्थं ये हेतवः सांख्यदार्शनिकैः उपस्थापिताः ते सर्वे हेतवः पुरुषे न विद्यन्ते। हेतुः यदि यथार्थो न स्यात् तर्हि तेन हेतुना उपस्थापितम् अनुमानमपि न यथार्थं भवति। तथा च तेन अनुमानेन गृहीतः सिद्धान्तः अपि न यथार्थः। एवं वक्तुं शक्यते व्यवहारिकदशायाम् अनेन हेतुद्वयेन जीवस्य बहुत्वं सम्भवति परन्तु पारमार्थिकपुरुषस्य बहुत्वम् एतैः हेतुभिः न सम्भवति।

**४. गुणानां मुख्यगौणभावाः**

जगति सर्वेषु वस्तुषु गुणत्रयं विद्यते यतः सर्वाणि वस्तूनि प्रकृतेः जायन्ते। गुणानां स्वरूपालोचनावसरे तैः उच्यते गुणत्रयं परस्परविरुद्धस्वभावविशिष्टम्।[37] परन्तु एते विरुद्धस्वभावविशिष्टगुणाः मुख्यगौणरूपेण परस्परस्य सहायकाः भवन्ति।[38] अर्थात् कदाचित् सत्त्वगुणः प्रधानः भवति रजस्तमगुणौ तस्य सहायकौ। कदाचित् तमगुणः प्रधानः सत्त्वतमगुणौ तस्य सहायकौ इति। परन्तु कथं ते एवम् आचरन्ति इति जिज्ञासायां तैः उच्यते पुरुषार्थसिद्धिरेव अस्य कारणम्।[39] पुरुषार्थशब्दस्यार्थः खलु पुरुषस्य प्रयोजनम्। भोगः अपवर्गश्च पुरुषस्य प्रयोजने। परन्तु सांख्यनये पुरुषः नित्यः अपरिणामी निर्विकारः। अतः तस्य भोगापवर्गयोः प्रयोजनं नास्ति। प्रयोजनं खलु अन्तःकरणस्य। तस्मिन् अन्तःकरणे प्रतिविम्बितपुरुषे प्रयोजनम् आरोपितं भवति। तथा प्रकृतेः जगतः उत्पत्तिः कथं भवति? इत्यत्र सांख्यदार्शनिकाः भणन्ति पुरुषस्य दर्शनार्थम् अर्थात् भोगार्थं तथा कैवल्यार्थं प्रकृतिः जगद्रूपेण आत्मानं प्रकाशयति। भोगेन पुरुषस्य बन्धनं तथा बन्धनात्

[33] सां.का.१८

[34] "न तु पुरुषस्य परिणामः, तस्याऽपरिणामित्वात्।" सा.त.कौ., नारायणचन्द्रगोस्वामी, पृ.-१८४

[35] "धर्म्माधर्म्मौ जन्ममृत्यू सुखदुःखादि चाखिलम्।
जाग्रत्यपि मृषा स्वप्न इव जन्मादिकं मम॥" सां.सा.अशोककुमारवन्द्योपाध्यायः, पृ.-१८१

[36] "प्रवृत्तिः प्रयत्नलक्षणा यद्यप्यन्तःकरणवर्तिनी तथाऽपि पुरुष उपचर्यते।" सा.त.कौ. नारायणचन्द्रगोस्वामी, पृ.-१८७

[37] "ननु एते परस्परविरोधशीला गुणाः।" सां.कौ., नारायणचन्द्रगोस्वामी, पृ. -१३९

[38] श्रीमद्भगवद्गीता, ३/२८

[39] "अर्थतः इति। पुरुषार्थत इति यावत्।" तदेव, पृ.-१४२

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

परं पुनः पुरुषस्य मुक्तेः इच्छा जायते।[40] परन्तु अत्रापि वक्तव्यं पुरुषः निष्क्रियः अतः तेन पुरुषेण दर्शनं न सम्भवति, यतः दर्शनं खलु क्रिया। तथाहि पुरुषः स्वरूपतया मुक्तः अतः पुनः तस्य कैवल्यार्थं प्रकृतेः जगत्सृष्टिः एकः भ्रमः।

**५. वृत्तिज्ञानरूपानुमितिशाब्दयोः स्वरूपम्**

यद्यपि सांख्यशास्त्रं प्रमेयशास्त्रं तथापि तत्र प्रमाणस्य आलोचना दृश्यते। वाचस्पतिना उच्यते प्रमा खलु संशयविपर्ययस्मृतिभ्यः भिन्ना।[41] अस्मात् ज्ञायते स्मृतिः सांख्यनये प्रमाणरूपेण न गृह्यते। स्मृतिः अप्रमा अधिगतविषयत्वाद्। अनुभवेन यज्ज्ञानं प्रागेव अभवत् तस्य संस्कारः तिष्ठति तस्मात् संस्काराद् उत्पन्नं ज्ञानं खलु स्मृतिः।[42] परन्तु सांख्यदर्शने यथार्थज्ञानेषु अन्यतमं खलु अनुमितिज्ञानम्।[43] सा अनुमितिः व्याप्तिपक्षधर्मताज्ञानाभ्याम् उत्पद्यते। परन्तु अस्मिन् ज्ञाने स्मृतेः प्रयोजनमस्ति यतः व्याप्तिस्मरणादृते परामर्शज्ञानं न सम्भवेत् तथा च परामर्शज्ञानादृते अनुमितिज्ञानमपि नोत्पद्यते। अतः अनुमितिज्ञाने व्याप्तिस्मरणम् आवश्यकम्।[44] सांख्ययोगदर्शने अपरम् अन्यतमयथार्थज्ञानं खलु शाब्दज्ञानम्। आप्तस्य वचनं खलु शब्दज्ञानम्। शब्दार्थबोधः तस्य एव सम्भवति यस्य शब्दार्थज्ञानं प्रागेव अभवत्। शब्दश्रवणेन तस्य अर्थस्य स्मृतिः भवति, ततः तस्यैव शब्दार्थबोधः भवति। अतः शब्दज्ञानार्थमपि स्मृतेः प्रयोजनमस्ति।[45]

**६. कालस्वरूपम्**

सांख्ययोगदर्शने कालस्वरूपस्य चर्चा सम्यग्रूपेण नोपलभ्यते। तेषां मते एकः परमाणुः यदा पूर्वस्थानं परित्यज्य उत्तरदेशं प्राप्नोति तदा क्षणः इति नाम्ना उच्यते। तस्य क्षणस्य निरन्तरप्रवाहः खलु क्रमः।[46] परन्तु क्षणस्य समाहारः कदापि न सम्भवेत् यौगपद्याभावात्। अतः तस्य बौद्धिकसमाहारवशादेव मुहूर्तदिवसादिव्यवहारः सम्भवति।[47] अर्थात् एवं वक्तुं शक्यते यद्यपि मुहूर्तदिवसादिरूपकालः वस्तुशून्यः बुद्धिनिर्मितः शब्दज्ञानानुपातिविकल्प-स्वरूपः तथापि वस्तुरूपेण प्रतिभाति भ्रमवशादेव। वाक्यपदीयकारेण उक्तञ्च -

"बुद्ध्यवग्रहभेदाच्च व्यवहारात्मनि स्थितेः।
तावानेव क्षणः कालो युगमन्वन्तराणि च॥"[48]

आलोचनया एवं दृश्यते सांख्यदर्शने शुद्धपुरुषस्य भ्रमज्ञानं कदापि न जायते कर्तृत्वाभावात्। भ्रमज्ञानमात्रं खलु वृत्तिज्ञानं, यत् खलु अन्तःकरणप्रतिविम्बितजीवस्य अस्मिन् जगति

---

[40] "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।" सां.का.२१

[41] "असन्दिग्धा अविपरीता अनधिगतविषया चित्तवृत्तिः प्रमाणम्॥" सां.त.कौ., नारायणचन्द्रगोस्वामी, पृ. -४१

[42] "अनुभूतविषयासम्प्रमोषः स्मृतिः।" यो.सू.-११

[43] "तल्लिङ्गलिङ्गिपूर्वकम्।" सां.का.-५

[44] "धूमदर्शनाच्चोद्बुद्धसंस्कारो व्याप्तिं स्मरति।" त.भा., गङ्गाधरकर. (प्र.ख.) पृ.-१६३

[45]"प्रतिपन्नश्चासौ शब्दश्रवणमात्रेण गृहीतसम्बन्धार्थं सन्नर्थेन्द्रियसन्निकर्षव्याप्तिप्रतिसन्धानविरहेऽप्यपूर्वमन्वयबोध-मासादयति सोऽयमुद्भास्यमानः शाब्दबोधः फलमित्यनुद्भास्यमानश्च वृत्तिरूपः शब्दप्रमाणमित्याप्त-वचनमिति चाख्यायते।" पूर्णिमाटीका, सा.का.-५

[46] "यावता वा समयेन चलितः परमाणुः पूर्वदेशं जह्याद्युत्तरदेशमुपसम्पद्येत स कालः क्षणः, तत्प्रवाहाविच्छेदस्तु क्रमः" यो.भा. यो.सू.-३/५२

[47] "स खल्वयं कालो वस्तुशून्यो बुद्धिनिर्माणः शब्दज्ञानानुपाती लौकिकानां व्युत्थितदर्शनानां वस्तुस्वरूप इव अवभासते।" तदेव।

[48] वा.प.पदकाण्ड,कालसमुद्देशः का.६९

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

भवति। यद्यपि कार्यरूपेण वस्तु असत् परन्तु कारणरूपेण सत् अर्थात् वस्तुमात्रं सदसत्। भ्रमज्ञानेन कार्यरूपवस्तु बाध्यते न खलु कारणरूपवस्तु। यद्यपि बुद्धिसुखदुःखादिः प्रकृतौ विद्यते तथापि पुरुषे तेषां सम्बन्धः मिथ्या।[49] अर्थात् अत्रापि सर्वं वस्तु सदसत्।

## सहायकग्रन्थसूची


• अन्नंभट्टः। (२००६)। *तर्कसंग्रहः* [तृतीयसंस्करणस्य पुनर्मुद्रणम्]। गोस्वामी, नारायणचन्द्रः (सम्पा.)। कलिकाता : संस्कृतपुस्तकभाण्डार।

• अमरसिंहः। (२०१०)। *अमरकोषः (सटीकानुवादः)*। भट्टाचार्यः, श्रीमद्गुरुनाथविद्यानिधिः (सम्पा.) कलिकाता : संस्कृतपुस्तकभाण्डार।

• ईश्वरकृष्णः। (१४११ वङ्गाब्दः)। *युक्तिदीपिका*। त्रिपाठी, यदुपतिः (सम्पा.)। कलिकाता : संस्कृतपुस्तकभाण्डार।

• ईश्वरकृष्णः। (१९९९)। *सांख्यतत्त्वकौमुदी (अध्यापनासहिता),* गोस्वामी, नारायणचन्द्रः (सम्पा.)। कलिकाता : संस्कृतपुस्तकभाण्डार।

• उदयनः। (१९९५)। *न्यायकुसुमाञ्जलिः*। सम्पा. भट्टाचार्यः, श्रीमोहनः (तर्कतीर्थः)। कलिकाता: पश्चिमवङ्गराज्यपुस्तकपर्षद्।

• उदयनाचार्यः। (२०११)। *आत्मतत्त्वविवेकः* (तृतीयसंस्करणम्)। शास्त्री, ढुण्ढिराजः (सम्पा.)। वाराणसी : चौखम्बासंस्कृतसिरिज-अफिस।

• *उपनिषद्*। (२००४)। स्वामी लोकेश्वरानन्द (सम्पा.). कलकाता: आनन्द पावलिशार्स्।

• गौडपादः। (१९८४)। *माण्डूक्यकारिका*। दुर्गाचरणसांख्यवेदान्ततीर्थः (सम्पा.)। कलिकाता : देवसाहित्यकुटीर।

• घटकः, पञ्चाननः। (२०००)। *सांख्यदर्शन-१* (प्रथमसंस्करणम्), कलकाता: प्रग्रेसिभ पावलिशार्स्।

• चट्टोपाध्यायः, देवीप्रसादः। (२०१२)। *भारतीयदर्शन,* कलिकाता: न्याशनालवुकएजेन्सि प्राइभेट-लिमिटेड।

• त्रिपाठी, यदुपतिः। (२०१०)। *भारतीयदर्शनपरिचय,* कलिकाता : वि. एन्. पाब्लिकेशन्।

• पतञ्जलिः। (२०१५)। *पातञ्जलयोगदर्शनम्* (योगभाष्यटीकासहितम्)। हरिहरानन्द-आरण्यः (सम्पा.)। कलकाता: पश्चिमवङ्गराज्यपुस्तकपर्षत्।

• बलदेवः, उपाध्यायः। (२०१४)। *बौद्धदर्शनमीमांसा*। वाराणसी : चौखम्बाविद्याभवन।

• भट्टः, कमलाकरः। (१६०६ शकाब्दः)। *मीमांसाकुतूहलम्*। शास्त्री, पट्टाभिरामः (सम्पा.)। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

• भट्टः, कुमारिलः। (१९७८)। *श्लोकवार्तिक*। शास्त्री, द्वारिकादासः (सम्पा.)। वाराणसी : तारा पावलिकेशन्स्।

• भट्टाचार्यः, मृदुला। (२०१५)। *ख्यातिवादेर दिग्दर्शन*। कलिकाता : महाबोधी वुक एजेन्सि।

• भट्टाचार्यः, सुखमयः। (२००६)। *पूर्वमीमांसादर्शन*। कलिकाता : पश्चिमवङ्गराज्यपुस्तक पर्षद्।

• भर्तृहरिः। (१३९२ बङ्गाब्दः)। *वाक्यपदीयम् (ब्रह्मकाण्डम्)*। भट्टाचार्यः, विष्णुपदः (सम्पा.)। कलिकाता : पश्चिमवङ्गराज्यपुस्तकपर्षत्।

• मिश्रः, केशवः। (२०१३)। *तर्कभाषा (प्रथमखण्डः)* [द्वितीयप्रकाशनम्]। करः, गङ्गाधरः [न्यायाचार्यः] (सम्पा.)। कलिकाता : यादवपुरविश्वविद्यालयः।


[49] सा.प्र.भा. ५/५६

# न्यायनये निग्रहस्थानपदार्थस्वरूपविमर्शः

**मिन्टु-दे**
**शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**नवदेहली**

**प्रबन्धसारः**

*महर्षिणा गौतमेन न्यायदर्शनस्य प्रथमसूत्रे प्रमाणादीनां षोडशपदार्थानां मध्ये अन्तिमपदार्थरूपेण निग्रहस्थानपदार्थस्योल्लेखः कृतः। तत्र निग्रहस्थानपदार्थस्य स्वीकारे किं मानमिति जिज्ञासायां न्यायभाष्यकारः निगदति- 'छलजातिनिग्रहस्थानानां पृथगुपदेश उपलक्षणार्थः' इति। उपलक्षितानां स्ववाक्यपरिवर्जनं छलजातिनिग्रहस्थानानां परवाक्ये पर्यनुयोगः। सूत्रकारैः–* ***'विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्'***[1] *इति यदुक्तं तमर्थं स्वीकृत्य अपि विपरीता वा कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः इति विप्रतिपत्तिशब्दस्यार्थः कर्तुं शक्यते। यतो हि विचाराङ्गसंशयजननी भवति विप्रतिपत्तिः। तत्र विचाराङ्गः संशयो भवति। संशयस्य अङ्गत्वेन जनकत्वेन अस्माभिः तु विप्रतिपत्तिवाक्यस्य ग्रहणं क्रियते। तर्हि विप्रतिपत्तिः विपरीतविषयिणी प्रतिपत्तिः, अप्रतिपत्तिः अज्ञानम् अनुमीयते येन तद् इत्यादि प्रतिज्ञाद्यान्यतमत्वं निग्रहस्थानत्वं इति वक्तुं शक्यते। एवञ्च ग्रन्थान्तरे अस्माभिः प्राप्यते पराजयनिमित्तको यत् भवति तत् निग्रहस्थानम्। एवं रीत्या तु तत्र भाष्यकारैः अपि यत् प्रपञ्चितं तमेव अर्थमुररीकृत्य अस्माभिः प्राप्यते विशेषतः उदयनाचार्यस्य न्यायपरिशुद्धिग्रन्थे, तथापि आचार्यैः तथैवोक्तं - यतो विप्रतिपद्यमानः प्राप्तः पराजयो भवति। अर्थात् पराजयहेतुः निग्रहस्थानं यत् ग्रन्थान्तरे अस्माभिः लक्षणम् अवलोक्यते, तदेव लक्षणमत्रापि आचार्यैः उदयनाचार्यैः अत्र प्रदर्शितम्। अतः अस्मिन्नेव शोधपत्रे न्यायदर्शनस्वीकृतनिग्रहस्थानपदार्थस्य किं स्वरूपं विद्यते तस्य रहस्योद्घाटनमेव मुख्यलक्ष्यम्।*

**कुञ्चीशब्दाः - निःश्रेयसं, जल्पः, वितण्डा, छलम्, जातिः, निग्रहस्थानं चेत्यादयः।**

**************************************************************************

महर्षिगौतमोक्तं षोडशपदार्थतत्त्वज्ञानं मुक्तिकारणं, तत्र गौतमोक्तेषु षोडशपदार्थेषु चरमपदार्थो भवति निग्रहस्थानम्। अतः जातेः निरूपणानन्तरम् आचार्यैः अवशिष्टपदार्थस्य निग्रहस्थानस्वरूपस्य निरूपणं तु प्रथमाध्यायस्य द्वितीयाह्निके कृतमेव। यतो हि प्रथमाध्यायः लक्षणपरकः अध्यायो भवति। सर्वेषां पदार्थानामेव लक्षणनिर्देशः विद्यते। एतदनन्तरं द्वितीयाध्यायाद् आरभ्य विशेषतः चतुर्थाध्यायस्य अन्तिमं यावद् परीक्षाप्रकरणं विद्यते। पुनश्च तत्र पञ्चमाध्यायस्य प्रथमाह्निके तु जातेः भेदानां निर्देशः। अपि च पञ्चमाध्यायस्य द्वितीयाह्निके निग्रहस्थानस्य ये भेदाः सन्ति तेषामेव तत्र निर्देशः भवति। अतः न्यायस्वीकृतः अन्तिमपदार्थो भवति निग्रहस्थानम्। निग्रहस्थानस्यापि तत्र लक्षणं सूत्रकारैः– **'विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्'**[2] इति यदुक्तं तमर्थं स्वीकृत्य विपरीता वा कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः इति विप्रतिपत्तिशब्दस्यार्थः कर्तुं शक्यते। यतो हि विचाराङ्गसंशयजननी भवति विप्रतिपत्तिः। तथा चोक्तं रघुनाथशिरोमणिना- 'विचाराङ्गसंशयजननी विप्रतिपत्तिः'[3]। अस्याः पङ्क्तेः

[1] न्या.सू १/२/१९

[2] न्या.सू १/२/१९

[3] दीधिति. प्र.वा., पृ-६४

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

स्वारस्यं प्रकाशयति गदाधरः 'विचारो जल्पः, विपरीतोद्भावकपरविजिगीषया न्यायप्रयोगरूपः, जिज्ञासासम्पादनेन तदङ्गस्य तदुपयोगिनो मध्यस्थसंशयजननीरित्यर्थः' ।[4] तत्र विचाराङ्गः संशयो भवति। संशयस्य अङ्गत्वेन जनकत्वेन अस्माभिः तु विप्रतिपत्तिवाक्यस्य ग्रहणं क्रियते। तर्हि विप्रतिपत्तिः विपरीतविषयिणी प्रतिपत्तिः अप्रतिपत्तिः अज्ञानम् अनुमीयते येन तद् इत्यादि प्रतिज्ञाद्यान्यतमत्वं निग्रहस्थानत्वम् इति वक्तुं शक्यते। एवञ्च ग्रन्थान्तरे अस्माभिः प्राप्यते पराजयनिमित्तको यत् भवति तत् निग्रहस्थानम्। तर्हि पराजयहेतुः इत्यादिकं अस्माभिः वक्तुं शक्यते- 'निग्रहस्थानं खलु पराजयप्राप्तिः। अप्रतिपत्तिस्त्वारम्भविषये अनारम्भः'[5]। एवं रीत्या तु तत्र भाष्यकारैः अपि यत् प्रपञ्चितं तमेव अर्थमुररीकृत्य अस्माभिः प्राप्यते विशेषतः उदयनाचार्यस्य परिशुद्धिग्रन्थे, तथापि आचार्यैः तथैवोक्तं यतो विप्रतिपद्यमानः पराजितो भवति। अर्थात् पराजयहेतुः निग्रहस्थानं यत् ग्रन्थान्तरे अस्माभिः लक्षणम् अवलोक्यते, तदेव लक्षणमत्रापि आचार्यैः उदयनाचार्यैः अत्र प्रदर्शितम्। एवञ्च जातेरपि तत्र चतुर्विंशतिभेदाः अस्माभिः प्राप्यन्ते एवं द्वाविंशतिभेदाः निग्रहस्थानस्य अत्र प्राप्यन्ते। तत्र प्रतिज्ञाहानि-प्रतिज्ञान्तर-प्रतिज्ञासन्न्यास-प्रतिज्ञाविरोधा-दिभेदेन तु निग्रहस्थानस्य द्वाविंशतिभेदा अपि तत्र प्राप्यन्ते। महर्षिगौतमः 'विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्' इति अनेन सूत्रेण 'विप्रतिपत्तिः अप्रतिपत्तिश्च निग्रहस्थानम्' इति प्रतिपादितवान्, अन्तिमसूत्रेण च वादिनां प्रतिवादिनां च विप्रतिपत्तिः अप्रतिपत्तिः इत्यनयोः पदार्थयोः विविधप्रकारतावशादेव निग्रहस्थानमपि अनेकप्रकाराः सन्ति इति संक्षेपेण निरूपितवान्। परन्तु तत्र सर्वेषां निग्रहस्थानानां लक्षणानि न उल्लिखितानि सन्ति। न्यायसूत्रस्य प्रथमाह्निके पूर्वोक्तस्य जातिपदार्थस्य तत्त्वस्य विस्तरधिया लक्षणेन सह परिभाषयित्वा अवसरसङ्गतिवशादेव द्वितीयाह्निके महर्षिः पूर्वोद्दिष्टस्य अन्तिमपदार्थत्वेन निग्रहस्थानस्य विशेषलक्षणमुपस्थाप्य विशिष्टार्थं प्रतिपादितवान्। अतः पूर्वोक्तनिग्रहस्थानस्य सर्वे प्रकाराः अपि च स्वीकृतनिग्रहस्थानानां युक्तिसङ्गतलक्षणकथनं पञ्चमाध्यायस्य प्रयोजनम्। अतः भाष्यकारः प्रथमं ताम् आवश्यकतां व्यनक्ति।

ततः भाष्यकारः प्रथममत्र निग्रहस्थानानां किञ्चित् परिचयं प्रददाति यत् निग्रहस्थानानि पराजयस्य विषयाः अर्थात् वादिनां प्रतिवादिनां च जल्पः, वितण्डा इत्यनयोः कथायां वास्तविकपराजयस्य वास्तविकं स्थानं कारणं वा भवति। भाष्यकारस्याभिप्रायं तात्पर्यटीकाकारेण एवमेवोक्तं- "तत्र य एवमाहुः- सर्वोऽयं साधनदूषणप्रकारो बुद्ध्यारूढो न वास्तव इति, तान् प्रत्याह- पराजयवस्तूनीति। पराजयो वसत्येष्विति पराजयस्थानानीत्यर्थः। काल्पनिकत्वे कल्पनायाः सर्वत्र सुलभत्वात्साधनदूषणव्यवस्था न स्यादिति भावः। निग्रहस्थानानि पर्यायान्तरेण स्पष्टयति अपराधेति"।[6] अर्थात् वादिनां प्रतिवादिनां च विविधसाधनं दूषणप्रकारो वा वास्तविकं नास्ति इति ये मन्यन्ते तेषां मते ते सर्वे काल्पनिकाः एव। तत्र य एवमाहुः- सर्वोऽयं साधनदूषणप्रकारो बुद्ध्यारूढो न

---

[4] गा. ध. प्रा.प्र.पृ-६५

[5] न्या.भा. १/२/१९

[6] न्या.वा.ता.टीका.५/२/१

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

वास्तव इति तान् प्रत्याहः 'पराजयवस्तूनी'ति। पराजयो वसत्येदिति पराजयस्थानानीत्यर्थः। काल्पनिकत्वे कल्पनायाः सर्वत्र सुलभत्वात् साधनदुषणव्यवस्था न स्यादिति भावः। निग्रहस्थानानि पर्य्यायान्तरेण स्पष्टयति 'अपराधे'ति।[7] अतः 'बौद्धसम्प्रदायमुद्दिश्य निग्रहस्थानमेव पराजयस्तु' इति भाष्यकारेणोक्तम्। पुनः भाष्यकारः 'वस्'-धातोरुत्तरं 'तुन्'-इत्यनेन प्रत्ययेन निष्पन्नेन 'वस्तु' इति शब्देन गम्यते यत् वादिप्रतिवादिनोः विविधसाधनानि दूषणानि च विजयः पराजयः च वास्तविकानि सन्ति, न तु काल्पनिकानि। यदि काल्पनिकं भवति तर्हि वादिनां प्रतिवादिनां च दूषणस्य साधनस्य च व्यवस्था नियमाः वा न भवितुमर्हन्ति, अतः जयपराजयव्यवस्था अपि न भवितुमर्हति। यतः कल्पना सर्वत्रैव सुलभा वर्तते। यः जितवान्, तस्य पराजयं कल्पयित्वा पराजयं च घोषयितुं शक्नोति। तस्मिन् सति कुत्रापि विजयः पराजयः वा निर्धारयितुं न शक्यते। अतः तत् स्वीकृत्य वादिनां प्रतिवादिनां च वास्तविकदोषः निग्रहस्थानैः निर्धारितो भवति। भाष्यकारः एतदर्थं मनसि निधाय पुनः अवदत् 'निग्रहस्थानानि खलु पराजयवस्तून्यपराधाधिकरणानि'।[8] अर्थात् उक्तनिग्रहस्थानमेव वादिपक्षस्य प्रतिवादिपक्षस्य वा वास्तविकः अपराधो भवति। 'प्रतिज्ञाहानिः' इत्यादीनि अधिकांशनिग्रहस्थानानि प्रतिज्ञाद्यवयवानामाश्रयेणैव सम्भवन्ति, एतादृशाशयं भाष्यकारः अन्ते अवदत्- 'प्रायेण प्रतिज्ञाद्यवयवाश्रयाणि' इति।[9]

अथ 'निग्रहस्थानम्' इति शब्दान्तर्गते 'निग्रहः' इति शब्दस्य कोऽर्थः? कुतश्च कीदृशः निग्रहः सम्भवति एतत् सर्वमेव स्पष्टतया अवगमनस्यावश्यकता अस्ति। भाष्यकारस्य उपर्युक्तव्याख्यानेन 'निग्रहः' इति शब्दस्यार्थः पराजयः इति अवगम्यते। उदयनाचार्यः उक्तनिग्रहस्थानपदार्थस्वरूपख्यापनावसरे भणितम्- कथास्थाने वादिनां प्रतिवादिनां वा स्वकीयोऽहंकारः न खण्डितः, तदा परपुरुषस्य प्रतिवादिपक्षस्य वा अहङ्कारखण्डनं, तदेव परपुरुषस्य तत्कर्तृकपराभवः तथा च तस्य नाम निग्रहः। वादः, जल्पः, वितण्डा चेति कथायां निग्रहस्थानम् अकथयत्। अन्यत्र 'प्रतिज्ञाहानिः' इत्यादि न निग्रहस्थानम्। उदयनाचार्यस्य व्याख्यानमनुश्रित्य वरदराजः शंकरमिश्रोऽपि च पूर्वोक्तवचनं समर्थितवान्। तद्यथा-

अखण्डिताहङ्कारिणः पराहङ्कारखण्डनम्।
निग्रहस्तन्निमित्तस्य निग्रहस्थानतोच्यते॥[10]

अर्थात् अत्र कथायामित्युपस्कर्तव्यम्। अन्यथा इति प्रसङ्गात्। यथोक्तमाचार्यैः- 'कथायामखण्डिताहङ्कारेण परस्याऽङ्कारखण्डनमिह पराजयो निग्रहः'[11] इति। अखण्डिताहङ्कारिणः पराहङ्कारशातनमिह पराजयः, स एव निग्रहः। स एतेषु प्रतिज्ञाहान्यादिषु वसतीति निग्रहस्य पराजयस्य स्थानमुन्नायकमिति यावत्। अत एव कथा वाह्यानाममीषां न निग्रहस्थानत्वम्[12] इत्यत्र स्वाभाविकतया मनसि प्रश्नः आयाति जिगीषाशून्यशिष्या गुरवश्च केवलमेव तत्त्वनिर्णयोद्देश्यमेव 'वादकथायां' प्रवृत्ताः भवन्ति,

---

[7] न्या.वा.ता.टीका.५/२/१

[8] न्या.भा.५/२/१

[9] न्या.भा.५/२/१

[10] वा.वि. प्रथमोल्लासःपृ -११६

[11] ता.र.

[12] वा.वि. पृ-११६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

तत्र वादिपक्षस्य प्रतिवादिपक्षस्य वा स्वकीयाहंकारः नानुभूयते, तर्हि पूर्वोक्तपराजयरूपनिग्रहः इति केनोपायेन भविष्यति? यदि जिगीषा नास्ति तर्हि विजयः पराजयः वा न भवितुमर्हति। न्यायदर्शनस्य प्रथममेव सूत्रभाष्ये वार्तिककारः 'कः पुनः शिष्याचार्ययोर्निग्रहः[13]?' एतादृशं संशयं प्रकटितवान्। अस्य समुत्तरमपि वार्तिककारेणोक्तं- 'विवक्षितार्थाप्रतिपादकत्वमेव'[14] अर्थात् 'वादकथायाम्' शिष्यस्य आचार्यस्य वा विवक्षितार्थस्य अप्रतिपादकत्वमेव अर्थात् विवक्षितविषयप्रतिपादनासमर्थः एव निग्रहः। अस्य सदुत्तरमपि तात्पर्य्यटीकाकारेण भणितं - 'विवक्षितार्थाप्रतिपादकत्वमेव खलीकारः'[15] इति। वाचस्पतिमिश्रः 'खलीकारः' इति शब्देन तद् निर्दिशति। उद्योतकरः अपि बहुकालादनन्तरमेव स्वकीयग्रन्थे 'खलीकारः' इति शब्दं प्रयोजयति।[16] तत्क्रमेण प्रकाशितं भविष्यति। फलतः 'वादकथायां' कोऽपि पराजितः न भवति चेदपि विवक्षितार्थस्य अप्रतिपादकत्वपरनिग्रहं स्वीकृत्य निग्रहस्थानमित्युच्यते। जल्पः, वितण्डा इति कथाद्वये जिगीषासम्पन्नः वादी प्रतिवादी वा पूर्वोक्तं पराजयरूपनिग्रहं प्राप्स्यति, अपि च यथासम्भवं प्रतिज्ञाहानिः इत्यादयः सर्वे तस्य निग्रहस्य स्थानानि कारणानि वा सन्ति। किन्तु वादकथायां तानि सर्वाणि निग्रहस्थानानि न सन्ति।

गौतमोक्तस्य निग्रहस्थानस्य लक्षणं भवति "विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्" इति। अर्थात् वक्तुः विप्रतिपत्तिः विपरीतज्ञानम् अप्रतिपत्तिः अज्ञानम् च येन वाक्येन प्रकाश्यते, तद्वाक्यं भवति निग्रहस्थानम्। भाष्यकारः कथयति- 'निग्रहस्थानं खलु पराजयप्राप्तिः' इति। निग्रहस्थानं वादिनां प्रतिवादिनां च वास्तविकपराजयस्य वास्तविकं स्थानं कारणं वा जल्प-वितण्डाशब्दयोः। पराजयलाभो न निग्रहस्थानं, तत्तु निग्रहस्थानस्य परमः परिणामः। महर्षिगौतमोक्तषोडशपदार्थेषु अन्तिमपदार्थत्वेन स्वीकृतस्य निग्रहस्थानम् इति शब्दान्तर्गतस्य निग्रहशब्दस्य कः अर्थः? तथा च कुतः कीदृशश्च निग्रहः, एतेषां समेषाम् अवगमनम् आवश्यकम्। उपर्युक्तव्याख्यानेन भाष्यकारस्य निग्रहशब्दस्य अर्थः पराजयः इति दर्शयति। यत्र वादिनां प्रतिवादिनां वा अहङ्कारः न खण्डितः 'वाक्' स्थाने तत्र परपुरुषस्य अहङ्कारस्य खण्डनं परपुरुषस्य पराजयः तस्य च नाम निग्रहः. वादजल्पवितण्डा चेति त्रिगुणभाषणं निग्रहस्थानम् अस्ति। अन्यत् अन्यत्रस्थानं प्रतिज्ञाहानिः इत्यादिरूपेण नास्ति इति उदयनाचार्यः उक्तवान्। सूत्रकारोक्तस्य विप्रतिपत्तिशब्दस्य अर्थः विपरीतज्ञानम् अथवा कुत्सितज्ञानं, 'निग्रह' इति शब्दस्यार्थो भवति पराजयः तथा स्थानशब्दस्यार्थो भवति कारणम्। निग्रहस्थानं वादस्थले पराजयरूपेण खलीकाररूपेण निग्रहस्य स्थानं कारणं वा। वादी प्रतिवादी वा विप्रतिपत्तिः अर्थात् केषुचित् पक्षेषु विपरीतज्ञानस्य भ्रमः तथा 'अप्रतिपत्तिः' अर्थात् केषुचित् क्षेत्रेषु अज्ञानं तेषां निग्रहस्थानस्य कारणम् अस्ति। निग्रहस्थानानि केवलं वादिनं प्रतिवादिनं च पुरुषं कर्षयति। वृत्तिकारस्य विश्वनाथस्य मते येन वादिना प्रतिवादिना च विप्रतिपत्तिः अप्रतिपत्तिश्च अनुमीयते, तदेव निग्रहस्थानं भवति। एतेषु विप्रतिपत्तिमूलकनिग्रहस्थानानि विप्रतिपत्तिः इति

[13] न्या.वा.

[14] न्या.वा.

[15] न्या.वा.ता.टीका

[16] न्या.वा.

शब्देन अप्रतिपत्तिमूलकनिग्रहस्थानानि च अप्रतिपत्तिः इति शब्देन लक्षितानि सन्ति।

निग्रहस्थानानि वादिनः प्रतिवादिनो वा पुरुषस्य निग्रहं जनयन्ति। यतो हि वादी प्रतिवादी च पुरुष एव प्रमादवशादेव यदप्रयोज्यं तदेव प्रयोजयति यत्प्रयोज्यं तन्न प्रयोजयति यन्निग्रहयोग्यो न भवति। अतो भाष्यकारो वदति– 'तत्त्ववादिनमतत्त्ववादिनञ्चाभिसंप्लवन्ते' अर्थात् यथा अपसिद्धान्तस्थापनकारिणम् अतत्त्ववादिपुरुषं निग्रहस्थानानि निगृहीतं कुर्वन्ति तथैव कदाचित् प्रकृतसिद्धान्तस्थापनकारितत्त्ववादिपुरुषमपि निगृहीतं कुर्वन्ति। यतः वादी अपि प्रतिवादिनां कथितं प्रदूषणं काले काले खण्डयितुमसमर्थः आसीत्। वादिनां प्रतिवादिनां च एकस्मिन् स्थाने बहुस्थानानि भवितुमर्हन्ति।

तथाहि- वादी स्वस्य पूर्वोक्तं पक्षं हेतुं दृष्टान्तं तथा साध्यधर्मं, तस्य विशेषणादिकं च यं कमपि पदार्थं परित्यजति चेदपि 'प्रतिज्ञाहानिः' इति निग्रहस्थानं भविष्यति। यथा- वादी 'शब्दः अनित्यः' ईदृशस्य प्रतिज्ञावाक्यस्य प्रयोगं करोति चेत् हेतुवाक्यादिना शब्दे अनित्यत्वं स्थापयति चेत्, प्रतिवादी मीमांसकशब्दस्य नित्यत्वपक्षे प्रमाणं प्रदर्श्य वादिनः बाधदोषं प्रदर्शयति। तदा वादी नैयायिको यदि तद्बाधदोषं खण्डयितुमसमर्थो भवति, यदि वदति 'पर्वतः अनित्यः' अर्थात् शब्दं परित्यज्य पर्वतं पक्षरूपेण गृहीत्वा तस्यैव पर्वतस्य अनित्यत्वं स्थापयति तदा वादिनः प्रतिज्ञाहानिनामकं निग्रहस्थानं भवति।

यदि वादी प्रतिवादी वा केनचित् प्रकारेण स्मृतिभ्रंशात् सहसा मौनः अथवा भूताविशिष्टः सन् प्रमत्तो भवति, अथवा प्रतिवादिकर्तृकात् दोषाविष्करणात् प्रागेव शीघ्रं स्वबुद्ध्या स्ववाक्यम् आच्छाद्य अन्यं निर्दोषं वाक्यं वदति यत् प्रतिवादी उत्तरं दातुं न शक्नोति, अथवा पार्श्वे तृतीया व्यक्तिः प्रतिवादिनः उत्तरं दातुं न शक्नोति तस्मात् पूर्वं स्वस्य वचनस्य उत्तरं ददाति, तत्र निग्रहस्थानस्य ग्रहणं न भविष्यति।

निग्रहस्थानमेव पराजयहेतुकमिति भाति, छलजातिषु च निग्रहस्थानलक्षणस्यैव अतिव्याप्तिर्भवति, यतः छलजातिश्च पराजयहेतुः। परन्तु छलादिषु अपि अर्थान्तरादिवत् पृथक् निग्रहस्थानत्वादेव अतिव्याप्तेः सम्भावना नास्ति इति। छलत्वरूपेण जातित्वरूपेण च ज्ञानमपि पराजयं प्रति कारणं भवति इति अवबोधाय हेत्वाभासवत् छलं जातेश्च पृथगुपादानरूपेण परिगण्यते इति शिवम्।

**संकेताक्षरसूची**

| | |
|---|---|
| अ.न.त. | अन्वीक्षानयतत्त्वबोधः |
| वा.वि. | वादिविनोदः |
| गा.ध. | गादाधरी |
| ता.र. | तार्किकरक्षा |
| न्या.सू. | न्यायसूत्रम् |
| न्या.वृ. | न्यायवृत्तिः |
| न्या.वा.ता.टी. | न्यायवार्तिकतात्पर्यटीका |
| प्रा.वा. | प्रामाण्यवादः |

## सहायकग्रन्थसूची

- उद्योतकरः। (१९६०)। *न्यायवार्त्तिकम्*। द्विवेदी, विन्ध्येश्वरप्रसादः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत सीरीज।
- उदयणाचार्यः। *न्यायवार्तिकतात्पर्यटीका-परिशुद्धिः*। द्विवेदी, विन्ध्येश्वरीप्रसादः (सम्पा.)। कोलकाता : बिब्लोथिका इण्डिका।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025


- भट्टाचार्यः, गदाधरः। (१९७०)। *गादाधरी*। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस्।
- मिश्रः, शङ्करः। (१९९५)। *वादिविनोदः*। गिरिः, विश्वम्भरनाथः (सम्पा.)। प्रयागः : विवेकप्रकाशनम्।
- गौतमः। (१९१८)। *न्यायदर्शनम्* (वात्स्यायनमुनिकृत-भाष्य-विश्वनाथकृत वृत्तिसहितम्)। विद्याभूषणः, आशुतोषः; विद्यारत्नः, नित्यबोधः (सम्पा.)। कलिकाता।
- गौतमः। (१९६१)। *न्यायदर्शनम्*। तर्कवागीशः, फणिभूषणः (सम्पा.)। कलिकाता: पश्चिमवङ्गराज्यपुस्तकपर्षत्।
- मिश्रः, वाचस्पतिः। (१९८९) *न्यायवार्तिकतात्पर्यटीका*। द्रविडः, राजेश्वरशास्त्री (सम्पा.)। वाराणसी : चौखम्बासंस्कृत-संस्थानम्।
- वरदराजः। (१९०३)। *तर्किकरक्षा*। संस्कारकः द्विवेदी, विन्धेश्वरीप्रसादः (संस्कारकः)। वाराणसी।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# न्यायदर्शनदिशा मनस्तत्त्वविवेचनम्

**प्रीति-रायः**

**अनुसन्धात्री, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः**

**नवदेहली**

**प्रबन्धसारः**

*नैयायिकाः षोडशपदार्थवादिनः। षोडशपदार्थाश्च प्रमाणादारभ्य निग्रहस्थानान्ताः। तदर्थमुक्तं महर्षिणा गौतमेन "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णय-वादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति। षोडशपदार्थेषु द्वितीयपदार्थः प्रमेयम्। एतच्च प्रमेयं द्वादशविधम्। अत एव उक्तम् "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" इति। एते द्वादशपदार्थाः साक्षान्मोक्षजनकज्ञानविषयाः। अतोऽत्र प्रमेयत्वं पारिभाषिकम्। अत्र द्वादशपदार्थेषु षष्ठं प्रमेयं मन इति। इदं मनोऽन्तरिन्द्रियम्। महर्षिगौतममते मनसो नामान्तःकरणमिति। अतः करणशब्देन इन्द्रियं बोध्यते।*

*मनस्यति अनेन इति मनः। तर्कसंग्रहकारेणाभिहितं- "सुखाद्युपलब्धिसाधनमिन्द्रियं मनः" इति। तच्च मनः प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च। तर्कदीपिकाकारेणाभिहितं- "स्पर्शरहितत्त्वे सति क्रियावत्त्वं मनसो लक्षणम्" इति। सिद्धान्तचन्द्रोदयकारेणाभिहितं- "सुखादिसाक्षात्कारः करणसाध्यः। जन्यसाक्षात्कारत्वाच्चाक्षुषसाक्षात्कारवत्" इति। महर्षिकणादानुसारेण- "आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम्" इति। मीमांसकाभिहितं मनो विभु। स्पर्शात्यन्ताभाववत्त्वादाकाशवत्, अथवा मनो विभु। विशेषगुणशून्यद्रव्यत्वात् कालवत्, अथवा मनो विभु। "ज्ञानसमवायिकारणसंयोगाधारत्वादात्मवत्" इति। महर्षिगौतमेनोक्तं- "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" इति। अर्थात् स्मृतिर्हि आत्मन आन्तरज्ञानलक्षणा क्रिया सा चेन्द्रियलक्षणं करणं विना न सम्भवति तस्मात् स्मृतेर्यदान्तरमिन्द्रियं करणं तदेव मनः। साध्यस्मृतिश्च सम्मता सा च मनो विना नोपपद्यते इत्यनुमानमपि मनोलिङ्गम्। शब्दप्रमाणं शब्देन पदार्थे प्रमीयमाणे शक्तिग्रहस्मृत्यपेक्षा भवति सा च मनो विना नोपपद्यते इत्यागमोऽपि मनोलिङ्गम्। "स्थाणुर्वा पुरुषो वा" इत्यादिसंशयस्थले स्थाणुपुरुषयोः समानधर्माणां स्मृतिर्भवति तदनन्तरं संशयः स्मृतिश्च मनो विना नोपपद्यते इति संशयोऽपि मनोलिङ्गम्। "श्वो मे भ्राताऽऽगन्ता" इत्यादिरूपं प्रातिभं ज्ञानं तच्च स्वविषयस्य भ्रात्रादेः स्मृतिं विना नोपपद्यते स्मृतिश्च मनो विना नोपपद्यते इति प्रतिभाति मनोलिङ्गम्। स्वप्नज्ञानमपि दृश्यमानेन्द्रिय-सन्निकर्षाद्यभावात् स्मृतिरूपमेवेति मनो विना नोपपद्यते इति स्वप्नज्ञानमपि मनोलिङ्गम्। "यद्यत्र वह्निर्न स्यात्तदा धूमोऽपि न स्यात्" इत्यादिरूपस्तर्कः स च वह्निस्मृतिसापेक्षः स्मृतिश्च मनो विना नोपपद्यते इति ऊहोऽपि मनोलिङ्गम्। एषूदाहरणेषु स्मृतेरेव साक्षाद् मनस्साधकत्वं विज्ञेयं प्रपञ्चस्तु व्युत्पत्त्यर्थः। सुखादिप्रत्यक्षं ह्यात्मनो मनः करणकमेव स्वकीयसुखादौ प्रमाणान्तरप्रसारासम्भवादिति यदेव सुखप्रत्यक्षकरणं तदेव मनः। आदिपदात् दुःखादिकं ग्राह्यम्। इच्छादयोऽप्यात्मव्यापाराः सकरणका एव तत्र बाह्यस्य करणत्वासम्भवाद् यदेवेच्छादिव्यापारकरणं तदेव मनः। मनःशब्दवाच्यमान्तरमिन्द्रियमस्ति तेन विना स्मृत्यादीनामनुपपत्तेः किं वा स्मृत्यादयः सकरणका व्यापारत्वाद् बाह्यव्यापारवद् यदेव स्मृत्यादिकरणं तदेव मन इति स्मृत्यादीनि मनोलिङ्गानि। स्मृत्यादिलक्षणलिङ्गेषु सत्स्वपि इयं युगपज्ज्ञानानुत्पत्तिरपि मनसो लिङ्गम् भवति इति।*

**कुञ्चीशब्दाः – नैयायिकाः, मनः, पदार्थः, प्रमेयः, संशयः, करणं, सुखम्, इन्द्रियं चेत्यादयः।**

***********************************************************************

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

नैयायिकाः षोडशपदार्थवादिनः। षोडशपदार्थाश्च प्रमाणादारभ्य निग्रहस्थानान्ताः। तदर्थमुक्तं महर्षिणा गौतमेन "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"[1] इति। षोडशपदार्थेषु द्वितीयपदार्थः प्रमेयम्। एतच्च प्रमेयं द्वादशविधम्। अत एव उक्तम् "आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्"[2] इति। एते द्वादशपदार्थाः साक्षान्मोक्षजनकज्ञानविषयाः। अतोऽत्र प्रमेयत्वं पारिभाषिकम्। अत्र द्वादशपदार्थेषु षष्ठं प्रमेयं मन इति। इदं मनोऽन्तरिन्द्रियम्। महर्षिगौतममते मनसो नामान्तःकरणमिति। अतः करणशब्देन इन्द्रियं बोध्यते।

"सर्वेषां ज्ञानानां साधारणकारणरूपेण मनसोऽङ्गीकारः। मनस्यति अनेनेति मनः" इति व्युत्पत्त्या "अहं सुखी, अहं दुःखी"ति सुखदुःखादीनां साक्षात्काररूपोपलब्धौ यदिन्द्रियं साधनं तदेव मन इत्युच्यते। सुखदुःखादिप्रत्यक्षज्ञानं करणजन्यं जन्यप्रत्यक्षत्वात् चाक्षुषप्रत्यक्षज्ञानवदित्यनुमानेन सुखादिज्ञानानां करणत्वेन मनःसिद्धिः। न तु तत्र चक्षुरादीनां बाह्येन्द्रियाणां करणत्वं सम्भवति, आत्मनिष्ठगुणानां प्रत्यक्षार्थं तेषां करणत्वासम्भवात्। सुखदुःखादीनामुपलब्धौ मनो भवति करणमिति कारिकावल्ल्यां स्पष्टम्। न च सुखाद्युपलब्धिसाधनं मन इति मनसो लक्षणं वाच्यम्, आत्ममनस्सन्निकर्षे आत्मनि काले दिशि अदृष्टे च अतिव्याप्तेः, सुखदुःखादिसाक्षात्कारं प्रति आत्ममनस्संयोगस्य असमवायिकारणत्वादात्मनश्च समवायिकारणत्वात् कालादीनां च निमित्तकारणत्वात्। अतः "सुखाद्युपलब्धिसाधनमिन्द्रियं मनः" इति लक्षणे इन्द्रियपदमिति आत्ममनस्संयोगादीनामिन्द्रियत्वाभावात् लक्षणस्य नैवातिव्याप्तिः।

यदि लक्षणे उपलब्धिस्थाने ज्ञानपदं स्यात् तर्हि त्वगिन्द्रियेऽतिव्याप्तिः यतो नैयायिकैः सुषुप्त्यवस्थायां ज्ञानस्योत्पत्तिर्नाङ्गीक्रियते, जन्यज्ञानमात्रं प्रति त्वङ्मनःसंयोगस्य कारणत्वाङ्गीकारात्। सुषुप्तौ मनः पुरीततिसंज्ञकनाड्यां प्रविशति। तेन सुषुप्तौ त्वचा सह मनसो नैव संयोगः। न्यायनये मनो यथा सुखादिज्ञानं प्रति कारणं तथा त्वगपि ज्ञानसामान्यं प्रति कारणम्। एवं च सुखादिज्ञानं प्रति अस्या अपि कारणता। अतोऽतिव्याप्तिनिवारणार्थं लक्षणे उपलब्धिपदं देयम्। उपलब्धिपदे उपशब्दस्य अर्थः समीपरूपः। लब्धिशब्दस्य अर्थो ज्ञानम्। सुखाद्युपलब्धिसाधनमिन्द्रियं मन इति लक्षणस्य यत् इन्द्रियं समीपेन सुखदुःखादिज्ञानस्य साधनं तन्मन इत्येवार्थः फलति। तेन च समीपेन अर्थात् स्वसन्निकर्षेण सुखदुःखादिज्ञानस्य त्वगिन्द्रियं न साधनम्। न्यायदर्शने गौतमेन "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति मनसो लक्षणं प्रतिपादितम्। प्रत्यक्षे येनेन्द्रियेण मनसः संयोगः, तस्यैवेन्द्रियस्य विषयग्रहणं भवति। मनसः संयोगाभावाज्ज्ञानानामुत्पत्तिर्नैव सम्भवति। न च युगपत् सर्वेषामिन्द्रियाणां ज्ञानं, सर्वेन्द्रियैर्मनसः संयोगाभावात्। न च नाटकदर्शनवेलायां गीतश्रवणं श्रवणेन्द्रियेणाभिनयदर्शनं चक्षुरिन्द्रियेणाथवा पूपशष्कुली-भक्षणवेलायां रसनेन्द्रियेण शष्कुल्या मिष्टत्वज्ञानं घ्राणेन्द्रियेण तस्य गन्धग्रहणं युगपद् भवतीति वाच्यं, तत्रापि योगपद्याभावात्। आशूत्पत्तेः सूच्यग्रभिद्यमानकदलीदलसमूहवदतिसूक्ष्मत्वात्

[1] न्या.सू. 111

[2] न्या.सू. 119

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

कालस्य क्रमज्ञानाभावाद् यौगपद्यं प्रतीयते, न तु वस्तुतो यौगपद्यमिति न्यायमञ्जर्या जयन्तभट्टेन प्रतिपादितम्। न्यायदर्शनेऽपि अतिशीघ्रगतिप्रयुक्ता-लातचक्रदर्शनवत् तत्र यौगपद्यज्ञानं जायते इति स्पष्टम्। अत एव तत्र यौगपद्यज्ञानं भ्रमात्मकमिति सिद्धान्तमुक्तावल्यामपि उक्तम्। बाह्यप्रत्यक्षेऽपि आत्मनो मनसा, मनस इन्द्रियेण इन्द्रियस्य पदार्थेन संयोगात् प्रत्यक्षं जायते इति न्यायभाष्ये प्रपञ्चितम्"[3]।

मनो द्रव्यम्, नवद्रव्येषु पृथिवी-जल-तेजो-वायु-आकाश-काल-दिक्-आत्म-मनांसि नवैव इति अन्नभट्टप्रोक्तत्वात्। मनसि क्रियाया विद्यमानत्वात् मनसः क्रियावत्त्वं स्पष्टम्। मनसः सिद्धिः स्मृतिकारणतया अपि सम्भवति। अत एव उक्तं न्यायमञ्जर्य्यां- "यदि कारणान्तरनिरपेक्षचक्षुरादि-करणसाध्या एव रूपादिविषयोपलब्धयः, तदुत्तरकाल-मुपहतकारणानामपि कथं स्मरणादिरूपस्तदवमर्शः? अतो नूनं नयनादिवत् करणान्तरमविकलं तदग्राहि विद्यते"।

मनस्साधकहेत्वन्तराणि अपि विद्यन्ते यथा- "अन्यान्यपि स्मृत्यनुमानागमसंशयप्रतिभास्वप्नोह-ज्ञानानि, आन्तरसुखदुःखेच्छाद्वेषादिविषयग्राहीणि च ज्ञानानि मनसो लिङ्गानि सन्त्येव। तेषां बाह्येन्द्रियव्यापारसाध्यत्वासम्भवात् करणरहितायाश्च क्रियाभिनिवृत्तेरदर्शनादिति"[4]।

मानसानि ज्ञानानि भवति। अत एव न्यायमञ्जर्य्यां- "स्मृतिस्तावन्मनोजन्यैव। अनुमानागमज्ञानं तु परोक्षार्थविषयत्वात् मानसम्। संशयस्तु मानसोऽपि कश्चिद्वक्ष्यते। प्रतिभा मानसी दर्शितैव- "श्वो मे भ्राताऽऽगन्ता" इति। स्वप्नज्ञानमुपरतेन्द्रियग्रामस्य भवत् कथं नाम न मानसम्"।

तर्केऽपि संशयवत् क्वचिद्विषये मानसो भवत्वेव। सुखादीनां तु ज्ञप्तिवत् उत्पत्तिरपि मनो निबन्धनैव। कार्याणामात्मगुणानामुत्पत्तौ प्रत्यासन्नकारणान्तर-सम्भवेऽपि आत्ममनस्संयोगस्यावधृतसामर्थ्यस्यासम-वायिकारणत्वात्। अतश्च विषयानुभवजन्येऽपि सुखादौ मनस्संयोगः कारणम्।

सुखादीनां च बोधस्वरूपत्वं स्वसंवेद्यत्वं च निरस्तम्। अतस्तदुपलब्धौ मनस एव कारणता।

इदं मनो नैकं, प्रत्यात्मनियतत्वात्। प्रतिशरीरं भिन्नभिन्नात्मनः स्वीकारादात्मनिष्ठमनसोऽप्यनेकत्वं सिद्ध्यतीति सप्तपदार्थ्यां प्रमाणीकरोति शिवादित्यः। न चैकस्मिन् शरीरेऽनेकं मन इति वाच्यं, तथा सति सर्वैरिन्द्रियैर्मनस्संयोगाद् युगपदनेकज्ञानोत्पत्त्यापत्तेः। इदं मनोऽन्तरिन्द्रियं सत् हृदयान्तर्वर्त्ति।

अत एव क्रियावत्त्वाद् मूर्त्तं निरवयवत्त्वान्नित्यं द्रव्यत्वादिन्द्रियसंयोगि प्रत्यात्मनियतत्त्वादनेकं मनो भवति। यद्यपि मनो न चेतनं, तथाध्यात्मसम्पर्कात् चेतनवत् प्रतीयते।

येन शरीरेण आत्मा करोति कर्म, तेन शरीरेण संयुक्तमनसा आत्मनो ज्ञानादिकार्यसाधनं भवति।

न च मनसोऽन्तःशरीरवृत्तित्वप्रतिषेधः, स्मरतो जीवस्य स्मरणकाले शरीरधारणात्। स्मरणसमये मनसः शरीराद्बहिः सत्त्वस्वीकारे न सम्भवति शरीरधारणात्। शरीरगुरुत्ववशात् तदा भूमौ शरीरपतनमवश्यमेव। शरीरविशिष्टे आत्मनि मनसस्सन्निकर्षात् शरीरप्रेरकधारकौ प्रयत्नौ जायेते। तत्र धारकस्य प्रयत्नस्य शरीरपतनप्रतिबन्धकत्वं, निःसृते च शरीराद्बहिर्मनसि धारकस्य

3 न्या.द. पृ-24-26

4 न्या.म. अष्टमाह्विकम्. पृ.411

प्रयत्नस्याभावात् गुरुत्वात् पतनं स्यात् । परन्तु यावत् मनसा स्मरणं तावत् स्मरणशरीरधारणयोर्युगपद् जन्म । न च आशुगतिकस्य मनसो बहिः शरीरादात्मप्रदेशेन ज्ञानसंस्कृतेन सन्निकर्षः प्रत्यागतस्य च प्रयत्नोत्पादनमुभयं युक्तमिति वक्तुं शक्यं, स्मरणकालानियमात् ।

वस्तुतः प्रदेशशब्देन कारणद्रव्यस्याभिधानम् । तथा च जन्यद्रव्यस्य समवायिकारणमवयवरूपं द्रव्यमेव तत्प्रदेश इत्यर्थो वेदितव्यः । आत्मनो द्रव्यत्वेऽपि न जन्यद्रव्यत्वं, तन्नित्यत्वनिर्देशात् । अत आत्मप्रदेश इत्युक्तौ संयोगस्याव्याप्यवृत्तित्वम् । परिच्छिन्नद्रव्येण सहापरिच्छिन्नस्य निरवयवस्यात्मनस्संयोगः आकाशं न व्याप्नोति संयोगस्याव्याप्यवृत्तित्वाङ्गीकारात्, जन्यद्रव्ययोरपि संयोगो नाश्रयं व्याप्नोति । तेन च आत्मप्रदेश इति प्रयोगो लाक्षणिक इति । शरीरसंयोगं विना आत्मनस्संयोगो न स्मृतिहेतुः, शरीरस्योपभोगायतनत्वात्”[5] इति ।

## सहायकग्रन्थसूची

- महर्षिगौतमः । (२०६४) । *न्यायसूत्रम्* । झा, महेशः (सम्पा.) । वाराणसी : चौखम्वा संस्कृत सीरिज अफिस ।
- महर्षिगौतमः । (१९६९) । *न्यायसूत्रम्* । झा, गङ्गानाथः (सम्पा.) । पुने : आरियेन्टाल वुक एजेन्सि ।
- महर्षिगौतमः । (१९४२) । *न्यायदर्शनम्* (वात्सायनभाष्यसहितम्) । शास्त्री, पद्मप्रसादः (सम्पा.) । वाराणसी : चौखम्बा संस्कृत भवन ।
- उद्योतकरः । (१९८८) । *न्यायभाष्यवार्त्तिकम्* । ठाकुरः, अनन्तालालः (सम्पा.) । दिल्ली : भारतीयदार्शनिकानुसन्धानपरिषद् ।
- माधवाचार्यः । (१९७४) । *सर्वदर्शनसंग्रहः* । ऋषिः, उमाशङ्करः (सम्पा.) । पठना : संस्कृत भाण्डार ।
- राधाकृष्णन् । (२०११) । *भारतीयदर्शन* । राजपाल एण्ड सन्स् (सम्पा.) । दिल्ली : काश्मीरि गेट ।
- जयन्तभट्टः । (१९८२) । *न्यायमञ्जरी* । शास्त्री, गौरीनाथः (सम्पा.) । वाराणसी : संस्कृतसम्पूर्णानन्दविश्वविद्यालयः ।
- केशवमिश्रः । (१९६७) । *तर्कभाषा* । तर्कतीर्थः, अमरेन्द्रमोहन (सम्पा.) । मुम्बाइ : सागर प्रेस ।
- उदयनार्यः । (१९९१) । *किरणावली* । जेटली, जे. एस्. (सम्पा.) । वडौदा : ओरियेन्टल रिसार्च इनस्टिटिउट् ।
- अन्नभट्टः । (१९७५) । *तर्कसंग्रहः* । गोविन्दाचार्यः (सम्पा.) । वाराणसी : चौखम्बा संस्कृत सीरिज ।

[5] न्या.ज्यो.

# वैशेषिकनये ईश्वरस्वरूपविचारः

**दीपक-मण्डलः**
**शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**नवदेहली**

**प्रबन्धसारः**

*वैशैषिकदर्शनम् अनीश्वरवादि इति नैकेषां विदुषां मतं वर्तते। न्यायदर्शनस्य प्रभावेण दर्शनेऽस्मिन् परमेश्वरवादः सम्पृक्तः इत्यपि वर्ण्यते। आधुनिकाः केचन दार्शनिकविद्वांसः दर्शनस्य परिगणनम् अनीश्वरवादिदर्शने कुर्वन्ति। एतत्सर्वमतप्रतिपादनपुरःसरं प्रकृतशोधपत्रे वैशेषिकदर्शनं सेश्वरमिति साध्यते। तत्र तावत् वैशेषिकसूत्रेषु ईश्वरस्य नामतः उल्लेखाभावेन वैशेषिकदर्शनं मूलतः अनीश्वरवादि इति नैव स्वीकर्तुं शक्यते। सूत्रकारेण मोक्षाधिगमार्थम् आवश्यकपदार्थानामेव विवेचनं कृतम्। परन्तु केवलमेतावता वैशेषिकदर्शनमनीश्वरवादि इति स्वीकरणं नैव साधु प्रतीयते। परवर्तिभिः व्याख्याकृद्भिः शङ्करमिश्र-जयनारायणतर्कपञ्चानन-प्रशस्तपादाचार्य-चन्द्रानन्द-जयन्तभट्टप्रभृतिभिः वैशेषिकदर्शनस्य सेश्वरत्वं साधितम्। विविधेषु प्रकरणग्रन्थेषु मुक्तावलीतर्कसङ्ग्रहादिषु भगवतः स्वीकरणं स्पष्टत उपलभ्यते। अतः अस्माकमेष निष्कर्षः यत् प्राचीनकालीनमपि वैशेषिकदर्शनमीश्वरवादि आसीदिति। वैशेषिकदर्शनेऽनुमानागमप्रमाणाभ्याम् ईश्वरसद्भावः साध्यते। एवं विवेचनेन स्पष्टीभवतीदं यदीश्वरस्य स्वरूपविषये वैशेषिकदर्शनं न्यायदर्शनेन साकं सम्पूर्णं साम्यमाधत्ते।*

**कुञ्चीशब्दाः - सकर्तृकं, लिङ्गत्वम्, अनुमानं, प्रामाण्यं, धर्मः, अधर्मः, मोक्षः, बद्धः, कार्यं, कारणं चेत्यादयः।**

**************************************************************************

वैशेषिकदर्शनस्य विषये नैकेषां विदुषां मतं वर्तते यत् प्राचीनकालीनं वैशेषिकदर्शनमनीश्वरवादि अस्ति। अनन्तरञ्च समानतन्त्रस्य न्यायदर्शनस्य प्रभावेण वैशेषिकदर्शनेऽपि परमेश्वरवादः संप्रवृत्तः। महापण्डितराहुलसांकृत्यायनमहोदयाः अपि स्वकीये दर्शनदिग्दर्शननामके ग्रन्थे वैशेषिकदर्शनस्य परिगणनमनीश्वरवादिदर्शनेष्वेव स्वीकुर्वन्ति[1]। मतमिदं समालोच्यतेऽस्माभिः। यद्यपि वैशेषिकदर्शने नास्तीश्वरस्य नामतो निर्देशः - **"प्रत्यक्षप्रवृत्तत्वात्संज्ञाकर्मणः"[2]** सूत्रस्यास्य व्याख्यानावसरे उपस्कारकृता शङ्करमिश्रेणेश्वरविषये निरूपितं यत् - "....एवं च घटपटादिसंज्ञानिवेशनमपि ईश्वरसंकेताधीनमेव यः शब्दो यत्रेश्वरेण संकेतितः स तत्र साधुः यथा या काचिदोषधिर्नकुलदंष्ट्राग्रस्पृष्टा सा सर्वाऽपि सर्पविषं हन्तीत्येतादृशी संज्ञा अस्मदादिविशि**ष्टा**नां लिङ्गमनुमापकं याऽपि मैत्रादिसंज्ञा पित्रा पुत्रे क्रियते साऽपि "द्वादशेऽहनि पिता नाम कुर्यात्" इत्यादिविधिना नूनमीश्वरप्रयुक्तैव तथा च सिद्धं संज्ञाया ईश्वरलिङ्गत्वम्"[3]। कर्मणश्च लिङ्गत्वं प्रतिपाद्यते- "एवं कर्माऽपि कार्यमपीश्वरे लिङ्गम्। तथाहि क्षित्यंकुरादिकं सकर्तृकं कार्यत्वात् घट**व**दिति"[4]। "बुद्धिपूर्वा वाक्यकृतिर्वेदे"[5], "स वा अस्म**द्बुद्ध्य**न्यो लिङ्गमृषेः**"[6],** "सामयिकः शब्दादर्थप्रत्ययः"[7] इत्यादिवैशेषिकसूत्राणाम्

---

[1] द. दि., पृ. ५७९

[2] वै. सू. २/१/१९

[3] उपस्कार, पृ. ९४

[4] उपस्कार, पृ. ९४

[5] वै. सू. ६/१/१

[6] तदेव ६/१/२

[7] तदेव ७/२/२०

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

अपीश्वरविषये सङ्केतप्रदत्वमङ्गीक्रियते परवर्त्तिभिः कैश्चिद् व्याख्याकारैः। परन्तु नैतदपि साधु प्रतीयते, सांख्यकारिकाया युक्तिदीपिकाख्यटीकायामुच्यते - "आचार्येण तु नोक्तं तेन सूत्रकारमते नास्तीश्वरः। लिङ्गादिति चेत्, स्यान्मतम्, संज्ञाकर्मत्वमस्मद्विशिष्टानां लिङ्गम्। प्रत्यक्षपूर्वकत्वाद्वा संज्ञाकर्मणः इत्येतस्माल्लिङ्गादीश्वरपरिग्रह आचार्यस्य सिद्ध इति। तदप्यसिद्धम्। कस्मात्? अभिप्रेतासिद्धेः"[8]।

अनेन लिङ्गेनास्मदादिभ्यो विशिष्टशक्तेः कस्याश्चिदस्तित्वं सिद्ध्यति, न पुनरीश्वरः। पुनश्च यदीश्वरस्य सत्त्वेऽपि सूत्रकारः ईश्वरं नोपदिशति तर्हि तस्यात्राकौशलमेवोपदर्शितं भवति। यदि परमाणूनां प्रवृत्तिनिवृत्ती ईश्वरपरतन्त्रे स्यातां तर्हि सूत्रकारः प्रथमं तदेवोपदिशेत्। नैवोपदिशति सूत्रकारोऽतः अकुशलः सूत्रकारः इत्यापद्यते, एतच्च नास्तीष्टम्। ईश्वरस्यासङ्कीर्तनेन चैतदपि प्रतीयते यत्सूत्रकारमते नास्त्येवेश्वरः। यदि वेश्वरः सूत्रकारमते स्यात् तर्हि सः अवश्यमेव तस्य नाम गृह्णीयात्, ईश्वरनामग्रहणे च वध्वा इव श्वसुरस्य नामग्रहणे दोषस्तु नास्त्येव। अतः काणादानामीश्वरोऽस्तीति मतं पाशुपतोपज्ञम् इति स्वीकरणीयम्। अतः ईश्वरस्वीकरणं न्यायदर्शनप्रभावेण सञ्जातमिति।

परन्तु मतमिदं नैव रोचते यदि विचार्यते। भारतवर्षे परिपाटी आसीदेषा यत् कस्यचिदपि दर्शनस्य सिद्धान्ताः व्याख्यानग्रन्थैरेव ज्ञायन्ते। सूत्रेषु ईश्वरस्य नामतः उल्लेखाभावेन वैशेषिकदर्शनं मूलतः अनीश्वरवादि इति नैव स्वीकर्तुं शक्यते। सूत्रकारस्य लक्ष्यमासीत् मोक्षाधिगमार्थं येषां पदार्थानां तत्त्वज्ञानमपेक्षितं तेषां पदार्थानां प्रतिपादनम्। अतः ईश्वरस्य चर्चा नैव कृता सूत्रकृता, परन्तु केवलमेतावता वैशेषिकदर्शनमनीश्वरवादि इति स्वीकरणं नैव साधु प्रतीयते। परवर्तिभिः व्याख्याकृद्भिः "तद्वचनादाम्नायस्य प्रामाण्यम्"[9] इति सूत्रस्य व्याख्याने तत्-पदेनेश्वरस्यैव परामर्शः क्रियते। प्रथमसूत्रेण धर्मविषयिणी एव प्रतिज्ञा कृता सूत्रकृता, अतः द्वितीयसूत्रे तत्-पदेन धर्मस्यैव परामर्श उचितः तत्-पदस्योपस्थितपरामर्शकत्वात् इति प्रश्नः उपस्कारे शङ्करमिश्रेणैवं समाधीयते यत् यथा "तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः"[10] इति गौतमीयसूत्रे तत्-पदेनानुपस्थितस्यापि वेदस्य परामर्शः क्रियते तथैवात्रापि तत् पदं प्रसिद्धसिद्धतयेश्वरमेव परामृशति। तथा च तेनेश्वरेण वचनादेवेश्वरोक्ताम्नायस्य प्रामाण्यं स्वीक्रियते- "तदित्यनुपक्रान्तमपि प्रसिद्धसिद्धतयेश्वरं परामृशति यथा **"तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः"** इति गौतमीयसूत्रे तच्छब्देनानुपक्रान्तोऽपि वेदः परामृश्यते। तथा **च** तद्वचनात्तेनेश्वरेण प्रणयनाद्वेदस्य प्रामाण्यम्"[11]। यद्यपि उपस्कारे तत्रैव "यद्वा" इति कृत्वा तत्-पदेन धर्मस्यापि परामर्शः कर्तुं शक्यत इति उक्तम्। जयनारायणतर्कपञ्चाननेन तु तत्-पदस्येश्वर-वाचकत्वमप्यस्तीत्यपि स्वीक्रियते- "यद्वा ईश्वरवाचकमेव तत्पदम् "ॐ तत्सदिति निर्देशो ब्रह्मणः त्रिविधः स्मृतः" इति वचनात्"[12]।

अन्यैरपि वैशेषिकदर्शनानुसारिभिः विद्वद्भिः ईश्वरस्य स्वीकरणं स्पष्टत एव क्रियते। उपस्कारकृतः

---

[8] सां. का. युक्तिदीपिका, पृ. ९९-१००

[9] वै. सू. १/१/३

[10] न्या. सू. २/१/५७

[11] उपस्कारः, पृ. ८

[12] उपस्कारविवृतिः, पृ. ९

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

शङ्करमिश्रास्तु कणादोऽपि भगवन्तमङ्गीकरोति स्पष्टमेतदुद्घोषयन्ति। द्रव्यनिरूपणावसरे चेश्वरसुवर्णयोः द्रव्येष्वेवान्तर्भावः इति प्रतिपादितं - "सुवर्णादीनामीश्वरस्य वात्रैवान्तर्भावात्"[13] इति। चन्द्रानन्दः वैशेषिकसूत्रवृत्तौ भुवनादीनां कर्तृत्वेनेश्वरं साधयति यत्- "ईश्वरश्च साधितः तदनुभुवनादीनां कार्यतया घटादिव**द्** बुद्धिमत्पूर्वकत्वात्"[14]। शङ्करमिश्रः "कणादरहस्यः" इति ग्रन्थे आत्मनिरूपणावसरे तस्य द्वैविध्यं प्रतिपादयति - क्षेत्रज्ञः (जीवात्मा) सर्वज्ञः (परमात्मा) चेति। प्रमाणं चेश्वरे दर्शयति - क्षितिः सकर्तृका कार्यत्वादिति अनुमानम्। न्यायमञ्जरीग्रन्थे नैयायिकैः जयन्तभट्टैः प्रतिपादितं यत्- "यथाऽस्माकमीश्वरेच्छाप्रेरितपरमाणुनिर्मितानि पृथिव्यादीनि, समानतन्त्रे कणव्रतमते तथैव सिद्धानि"[15]। प्रशस्तपादाचार्यः पदार्थधर्मसङ्ग्रह-नामक-प्रशस्तपादभाष्यापरनामधेये ग्रन्थे मङ्गलाचरणे परमेश्वरं प्रणमति -

"प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः।
पदार्थधर्मसङ्ग्रहः प्रवक्ष्यते महोदयः॥"[16]

सृष्टिसंहारप्रक्रियायामीश्वरं विवेचयति च। अन्येष्वपि प्रकरणग्रन्थेषु मुक्तावलीतर्कसङ्ग्रहादिषु भगवतः स्वीकरणं स्पष्टत उपलभ्यते। अतः अस्माकमेष निष्कर्षः यत् प्राचीनकालीनमपि वैशेषिकदर्शनमीश्वरवादि आसीदिति।

**ईश्वरसद्भावे प्रमाणम्-**

ईश्वरसद्भावे वैशेषिकदर्शनानुसारेणानुमानस्य आगमस्य च प्रामाण्यम्। अनुमानञ्च क्षित्यङ्कुरादिकमपि कार्यम्, अतः तेनापि सकर्तृकेण भाव्यम्। न च क्षित्यङ्कुरादिकर्तृत्वं जीवात्मनां सम्भवति, अतः यस्य क्षित्यङ्कुरादिकर्तृत्वं स एव ईश्वरः। एतदनुमानमीश्वरसिद्धौ प्रबलमनुमानम्। एतदेवानुमानं शब्दभेदेन किञ्चिदर्थभेदेन च अन्येष्वपि वैशेषिकग्रन्थेषु समुपस्थाप्यते। "न्यायकन्दली" ग्रन्थे श्रीधरभट्टेन प्रतिपादितं- "महाभूतचतुष्टयमुपलब्धिमत्पूर्वकं कार्यत्वात्, यत्कार्यं तदुपलब्धिमत्पूर्वकं यथा घटः कार्यञ्च महाभूतचतुष्टयं तस्मादेतदप्युपलब्धिमत्पूर्वकम्"[17] इति। कार्यत्वञ्च महाभूतचतुष्टये सावयवत्वेन हेतुना साध्यते। प्रशस्तपादाचार्यैः परिमाणनिरूपणावसरे द्व्यणुकपरिमाणं प्रति परमाणुगतसंख्यायाः कारणत्वं प्रतिपाद्यते। सा संख्या च ईश्वरबुद्धिजन्या इति च स्फुटीकुर्वद्भिः उदयनाचार्यैः प्रोक्तस्य **संख्याविशेषादि**ति भगवत्साधकस्य हेतोः संकेतः कृतः। सिद्धान्तमुक्तावल्याः व्याख्यायां दिनकर्यां श्रीमदुदयनाचार्योक्ताः सर्वेऽपि हेतवोऽत्रापि भगवत्साधकतयोपन्यस्यन्ते। मानमनोहरनामके ग्रन्थे अनेकान्यन्यान्यपि अनुमानानि भगवत्साधकतया प्रस्तूयन्ते, तानि चेमानि सन्ति- "विवादाध्यसितं कर्म प्रयत्नाधारजं कर्मत्वात्, यत् कर्म तत् प्रयत्नाधारजं यथा सम्प्रतिपन्नं कर्म तथा विवादाध्यसितं कर्म" इति प्रयत्नाधारस्य सिद्धिः स एव ईश्वरः। एवमेव "विवादाध्यसितं मूर्तं प्रयत्नाधारं परमाणुव्यक्तिरिक्तत्वे सति मूर्तत्वात्", "गन्धः प्रयत्नजः गन्धत्वात् घटवत् तद्गतगन्धवच्च", "विवादाध्यसिते पृथिव्युदके प्रयत्नवता धृते गुरुत्वे सत्यपातित्वात् करतलामलकवत्", "विवादाध्यसितं

[13] उपस्कारः, पृ. १९
[14] वैशेषिकसूत्रवृत्तिः पृ. २
[15] न्या. म.
[16] प्र. पा. भा., मङ्गलाचरणम्।
[17] न्यायकन्दली, पृ. १२३

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

नित्यविशेषगुणाधारजं कार्यत्वाद् आप्यद्व्यणुकवत्। यश्च नित्यविशेषगुणाधारः स एवेश्वरः" बौद्धं प्रतीश्वरसाधनाय तत्रानुमानं प्रस्तूयते-"विवादाध्यसितो विकल्पः तदतिरिक्तं प्रमा, प्रमात्वात्, निर्विकल्पकप्रमावत्" इति। "एतज्ज्ञानम् एतदुत्पादकानित्यव्यतिरिक्तज्ञानजन्यं कार्यत्वात् सम्प्रतिपन्नवत्" अनित्यव्यतिरिक्तज्ञानसिद्धौ यः तज्ज्ञानस्याश्रयः स एवेश्वरः इति सिद्ध्यति। एवमन्या अपि युक्तयः भगवति सम्भवन्ति।

**ईश्वरपर्यालोचनम्**

ईश्वरसद्भावे वेदानामपि प्रामाण्यं विद्यते तथाहि- "द्यावाभूमी जनयन् देव एकः", "विश्वस्य कर्ता भुवनस्य गोप्ता"[18], "ईश्वरमुपासीत", "यः सर्वज्ञः सर्ववित्", "यस्य ज्ञानमयं तपः", "सोऽकामयत" इत्यादयः ईश्वरसद्भावे प्रमाणभूताः।

**ईश्वरः स्रष्टा**

ईश्वरोऽयं जगतोऽस्य स्रष्टा, निमित्तकारणं- "तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय"[19]। संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः। कार्यं प्रति त्रीणि कारणानि भवन्ति- समवायिकारणम्, असमवायिकारणं, निमित्तकारणञ्चेति। जगतोऽस्य परमाणवः समवायिकारणभूताः, परमाणूनां संयोगोऽसमवायिकारणम्, ईश्वरश्चास्य जगतः निमित्तकारणम्। अयमधिष्ठाता परमाणूनाम् अन्यथा सर्ग एव न स्यात् अचेतनानाम् चेतनमधिष्ठातारमन्तरेण प्रवृत्तेरसम्भवात्- "....तेभ्यः परः सर्वार्थदर्शिसहजज्ञानमयः कर्तृस्वभावः कोऽप्यधिष्ठाता कल्पनीयः, चेतनमधिष्ठातारमन्तरेणाचेतनानां प्रवृत्त्यभावात्"[20]।

**आत्मकल्पः**

अयमीश्वरः आत्मैव। कुत इति चेत्? अत्र समाधीयते बुद्धिगुणत्वात्। जीवा इवायमपि विभुः (परममहत्परिमाणवान्), एकत्वसंख्याश्रयः, पृथक्त्वसंयोग-विभागाख्यसामान्यगुणाश्रयश्च। जीवात्म-कल्पत्वन्तु, बुद्धिगुणत्वादेव। द्रव्यविभागे ज्ञानवत्त्वेनैव विभजनात् अयमीश्वरः आत्मैव। ज्ञानञ्चास्य नित्यं, सर्वविषयकञ्च। इच्छापि अस्य सर्वविषयिणी नित्या च। प्रयत्नोऽप्यस्यैतादृगेव। एवमसावीश्वरः संख्यापरिमाणपृथक्त्वसंयोगविभागैः पञ्चभिः सामान्यगुणैर्विशिष्टः बुद्धीच्छाप्रयत्नैः त्रिभिः विशेषगुणैश्च विशिष्टः इति वैशेषिकदर्शने स्वीक्रियते- "संख्यादिपञ्चकं बुद्धिरिच्छा यत्नोऽपि चेश्वरे"[21]।

अत्रापीश्वरबुद्धेः ईश्वरीयेच्छायाः ईश्वरीयप्रयत्नस्य च यन्नित्यत्वमङ्गीक्रियते तत् सर्वमपि न्यायदर्शनानुसारि एव। यथा न्यायदर्शने क्षित्यादिकर्तृत्वसम्पत्तये भगवतो ज्ञानस्य, इच्छायाः, प्रयत्नस्य च नित्यत्वमङ्गीक्रियते उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वस्यैव कर्तृत्वात् तथैवात्रापि भगवतो ज्ञानेच्छाप्रयत्नानां नित्यत्वमङ्गीक्रियते- "नित्यज्ञानेच्छाकृतिमानेवेश्वरः सकर्तृकत्वानुमानेन साधनीयः"[22]।

**सुखादुःखादिभिरसंस्पृष्टः नित्यमुक्तः**

अयमीश्वरः सर्वज्ञः, सर्वज्ञत्वाच्चास्य न कुत्रचिदपि वस्तुनि विशेषस्याग्रहः। विशेषस्याग्रहे एव मिथ्याज्ञानं सञ्जायते, विशेषस्य अग्रहाभावात् नास्य मिथ्याज्ञानं,

[18] न्या. सि. मु., पृ. ३२

[19] न्या. सि. मु., पृ. २२

[20] न्यायकन्दली, पृ. १४१

[21] कारिकावली ३४

[22] रामरुद्री, पृ. २७

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

मिथ्याज्ञानाभावाच्च न मिथ्याज्ञानमूलकौ रागद्वेषावस्य जायेते। रागद्वेषाभावाच्च नास्येश्वरस्य रागद्वेषमूलिका प्रवृत्तिः, प्रवृत्तिरूपकारणाभावान्नेश्वरस्य प्रवृत्तिसाध्यौ धर्माधर्मौ, धर्माधर्मयोरभावाच्च नास्य सुखं नास्य दुःखं वा प्रतिपादितं- "तदेवं कार्यविशेषेण सिद्धस्य कर्तृविशेषस्य सर्वज्ञत्वान्न कुत्रचिद्वस्तुनि विशेषानुपलम्भः। अतो न तन्निबन्धनं मिथ्याज्ञानं, मिथ्याज्ञानाभावे च न तन्मूलौ रागद्वेषौ, तयोरभावान्न तत्पूर्विका प्रवृत्तिः, प्रवृत्त्यभावे च न तत्साध्यौ धर्माधमौ, तयोरभावात् तज्जययोरपि सुखदुःखयोरभावः"[23]। सुखदुःखयोः क्रमशः धर्माधर्मप्रभूतत्वात्। नित्यसुखस्य सत्ता तु वैशेषिकदर्शने नैव स्वीक्रियते।

अयमीश्वरः आत्मकल्पः अतः प्रश्नोऽयं समुदेति यदयं बद्धो वा मुक्तो वा? अस्योत्तरमेवं दीयते यत् बन्धनकारणानां क्लेशादीनामभावात् अयं बद्धो नास्ति। तर्हि मुक्तो भविष्यति? इत्यपि न, मुक्तिर्नाम बन्धविच्छेदः। "अयं मुक्तः" इति स्वीक्रियमाणे कदाचित् पूर्वकालेऽयं बन्धने आसीदिति स्वीकृतं भवति। अतोऽयमीश्वरः नित्यमुक्त इति स्वीक्रियते- "स किं बद्धो मुक्तो वा? न तावत् बद्धः बन्धनसमाज्ञातस्य बन्धहेतोः क्लेशादेरसम्भवात्। मुक्तोऽपि न भवति बन्धविच्छेदपर्यायत्वान्मुक्तेः। नित्यमुक्तस्तु स्यात्"[24]।

**वेदानामुपदेशकः**

अयमीश्वरः वेदानामुपदेशकः, जीवात्मनां पितृवत् आप्तकल्पः। जीवानां कल्याणाय सर्गकाले वेदान् रचयति। वेदाः नैवापौरुषेयाः भवितुं शक्नुवन्ति वाक्यरूपत्वात्- "वेदाः पौरुषेयाः वेदत्वात् आयुर्वेदवत्", "वेदः पौरुषेयो वाक्यत्वात् भारतादिवत्", "वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवत्", "वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत्" इत्यादिभिः अनुमानादिभिः वेदस्य पौरुषेयत्वं साध्यते। यत्पुरुषप्रणीतो वेदः स एव ईश्वरः।

**कर्मफलप्रदाता**

वैशेषिकदर्शने ईश्वरः शुभाशुभकर्मणां फलं प्रददाति। शुभेन अशुभेन च कर्मणाऽदृष्टमुत्पद्यते। तदनुसारञ्चायमीश्वरः जीवेभ्यः फलं प्रददाति। अदृष्टञ्च स्वत एव फलदाने नैव सामर्थ्यमावहति अचेतनस्य चेतनाधिष्ठानेनैव फलप्रदायकत्वात्। ईश्वरेच्छयानुगृहीतमदृष्टं कर्मणां फलप्रदाने सामर्थ्यं धारयति- "धर्मोऽपि तावन्न निःश्रेयसं करोति यावदीश्वरेच्छया नानुगृह्यते"[25]।

**अशरीरी**

शरीरस्यापि कर्मजन्यतया भगवतस्तु कर्मणोऽभावात् ईश्वरस्य शरीरमपि नास्ति। भोगायतनस्यैव शरीरसंज्ञा भवति भोगाभावादेवास्य शरीरं नास्ति। न्यायदर्शनानुसारं यथा शरीरं नाङ्गीक्रियते ईश्वरस्य तथैव वैशेषिकदर्शनेऽपि।

**जगतस्सर्जनस्य प्रयोजनम्**

प्रलयकाले धर्माधर्मसंस्कारानुविद्धान् जीवात्मनः मोक्षरूपं प्राप्तार्थं दृष्ट्वैष भगवान् करुणापरवशः धर्माधर्मसंस्कारक्षार्थं सुखदुःखपरिपूर्णजगदिदं सृजति। जगत्सर्जनस्य प्रयोजनं गौणमस्ति भोगः जीवात्मनां - "ततः पुनः प्राणिनां भोगभूतये..."[26]। परमं प्रयोजनमस्ति जीवात्मभिर्मोक्षलाभः। दुःखबहुलेन जगता उद्वेजिताः जीवात्मानः परमं पुरुषार्थं

[23] न्या. क., पृ. 142

[24] न्या. क., पृ. 142

[25] न्यायकन्दली, पृ. 19

[26] सृष्टिप्रक्रिया, प्र. पा. भा.

मोक्षमधिगन्तुं प्रयासं विधास्यन्ति इति भगवान् करुणयैव सृजतीदं जगत् - "न चैवं सति करुणाविरोधः, दुःखोत्पादस्य वैराग्यजननद्वारेण परमपुरुषार्थहेतुत्वात्"[27] ।

**निष्कर्षः**

एवं विवेचनेन स्पष्टीभवतीदं यदीश्वरस्य स्वरूपविषये वैशेषिकदर्शनं न्यायदर्शनेन साकं सम्पूर्णम् साम्यमाधत्ते। अत एव षड्दर्शनसमुच्चये हरिभद्रसूरिणा प्रोच्यते -

"देवताविषये भेदो नास्ति नैयायिकैः समम् ।"

अतः अस्मिन् शोधप्रबन्धे न्यायपदेन न्यायदर्शनस्य समानतन्त्रं वैशेषिकदर्शनमपि परिगृहीतमस्तीति शम् ।

## सहायकग्रन्थसूची


- मिश्रः, शङ्करः । *उपस्कारः (जयनारायणतर्कपञ्चाननकृतविवृतिसहितः* ) । कलिकाता, १८६१
- सांकृत्यायनः, राहुलः । (१९४४)। *दर्शनदिग्दर्शन*। इलाहाबाद : किताबमहल ।
- भट्टः, जयन्तः । (१९७१)। *न्यायमञ्जरी*। वाराणसी : चौखम्बा संस्कृत सीरीज ।
- उदयनाचार्यः । (१९७८)। *न्यायकन्दलीः* (हरिदासीयः कुसुमाञ्जलिपरिमलसहितः) । वाराणसी : चौखम्बा विद्याभवन ।
- उदयनाचार्यः । (१९५७)। *न्यायकन्दली (*प्रकाशबोधिनी आदि चतुष्टीकासहिता) । वाराणसी : चौखम्बा संस्कृत सीरीज ।
- विश्वनाथपञ्चाननः । (१९८२) *न्यायसिद्धान्तमुक्तावली (दिनकरीरामरुद्रीसहिता)*। वाराणसी : चौखम्बा विद्याभवन ।
- प्रशस्तपादाचार्यः । (१९७७)। *प्रशस्तपादभाष्यम् न्यायकन्दलीसहितम्*। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।
- ईश्वरकृष्णः । (१९७०)। *साङ्ख्यकारिका,* (अज्ञातकर्तृकयुक्तिदीपिकासहिता) । त्रिपाठी, रमाशङ्करः (सम्पा.) । वाराणसी : चौखम्बा संस्कृत सीरीज ।
- वैशेषिकसूत्रम्- कणादः


[27] न्या. क., पृ. 132

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# तर्कसंग्रहस्य विशिष्टस्थलपर्यालोचनम्

**पङ्कज-दासः**
**गवेषकः, रामकृष्णमिशन्-विद्यामन्दिरम्**
**पश्चिमबङ्गः**

**प्रबन्धसारः**

*अखिलशास्त्रजगति अतिदुरूहगहनज्ञानारण्ये पटीयांसां धीषणया अमृतसारगर्भे प्रवेशार्थं बालानां सुखबोधाय प्रकरणनामकः ग्रन्थः आचार्यैः प्रणीतः। तत्र यद्यपि अखिलशास्त्रस्य समासेन ज्ञानं भवति, परन्तु मूलशास्त्रपठने तस्योपयोगित्वं नास्ति इति, अतः अखिलशास्त्राबोधने अस्योपयोगित्वमस्त्येव। तन्मध्ये न्यायवैशेषिकशास्त्रस्य अन्यतमः प्रकरणग्रन्थः सर्वैरेव विदितः अन्नंभट्टपादेन रचितः तर्कसंग्रहः। तस्मिन् तर्कसंग्रहग्रन्थे कदाचित् सूचाग्रबुद्ध्या विश्लेषणेन कस्मिंश्चित् स्थाने असौविध्यं परिलक्ष्ये इति। कदापि वा टीकाकारादीनां दुरूहचिन्तने, कदापि वा ग्रन्थकारस्य अनुक्तेऽपि काठिन्यतरतामुपैति। अतः केषाञ्चित् स्थलानां परिष्करणं पर्यालोचनं परिमार्जनं च अस्मिन् शोधपत्रे विधीयते, तत्र च कतिपयानाम् अशंनाम् उल्लेखः क्रियते।*

**कुञ्चीशब्दाः- तर्कसंग्रहः, प्रकरणग्रन्थः, न्यायः, वैशेषिकः, शास्त्रं चेत्यादयः।**

*****************************************************************************

**भूमिका**

जगति अखिलज्ञानस्य आधारभूतं भवति शास्त्रम्। शास्त्रं नाम पुरुषार्थतत्साधनान्यतरादृष्टत्व-शालिविषयकोपदेष्टृ अदृष्टसाध्यसाधनभावोपदेष्टृ वा। चाखिलशास्त्रस्य अतिक्षुद्रमतीनां शास्त्रातिगहने अप्रविष्टानां बालानां कृते शास्त्रप्रवेशग्रन्थः अस्मत्सविधे उपस्थापितः शास्त्रपारङ्गमैः। येन अखिलशास्त्रस्य विस्तरेण सामान्यतया शास्त्रार्थबोधः जायते। तेन शास्त्रार्थज्ञानेन अतिदुरूहग्रन्थेषु अपि पठितशास्त्रप्रवेशग्रन्थानां प्रवृत्तिः स्यात्। अथ च तेषां दुरूहादिस्थलेऽपि अनायासेन मतिर्भवति। स शास्त्रप्रवेशग्रन्थः लोके प्रकरणग्रन्थः इति परिचीयते। शास्त्रकारैः कारिकया लक्षणमुदीरितम्-

**'शास्त्रैकदेशसम्बन्धं शास्त्रकार्यान्तरे स्थितम्।**
**आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः॥'** इति।

खण्डनमण्डनपरम्परासमृद्धाः शास्त्रसिद्धान्तलघुमञ्जूषा इमे प्रकरणाख्याः ग्रन्थाः। तदुपरि तदर्थपरिष्करणाय शास्त्रग्रन्थिभङ्गाय पूर्वपक्षिमतभङ्गकैः टीकाटीप्पण्यादिना अस्य लघुतायाः गुरुताम् आपादितम्। तेन च कदापि कदापि अनायासेन सुखबोधाय कृतस्य ग्रन्थस्य आयासेन च दुर्भोगाय एव भवति अकुशाग्रमतीनाम्। कदापि कदापि वा ग्रन्थकर्तुः अतिसंक्षिप्तरचनायाम् अनुक्तदुरुक्ततत्त्वानां बोधस्तु क्लेशकर एव। अस्मिन् शोधप्रबन्धेऽपि न्यायवैशेषिकशास्त्रस्य प्रकरणग्रन्थस्य अन्नंभट्टविर-चितस्य तर्कसंग्रहस्य किञ्चिद्विशिष्टस्थलं पर्यालोच्यते। अत्र तर्कसंग्रहः इति पदं लाक्षणिकम्। अत्र तर्कसंग्रहः इति पदेन तदीयटीकाटीप्पण्यादिग्रन्थाः ग्राह्याः। विशिष्टस्थलं नाम असङ्गतस्थलं दुरूहस्थलं च। पर्यालोचनं नाम विशिष्टाध्यायनं, सम्यक्तया अवलोकनम्। अतः अर्थः भवति तर्कसंग्रहे तदीयटीकाटीप्पण्यां च किञ्चिदसङ्गतस्थलानां विशिष्टाध्ययनम्। अत्र कतिपयस्थानानामेव प्रतिपादनं प्रस्तूयते।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

### ❖ मङ्गलाचरणस्य कारणत्वम्

तर्कसंग्रहकारेण आदौ मङ्गलं विहितं **निधाय हृदि विश्वेशमि**त्यादिना। तर्कसंग्रहे मङ्गलं ग्रन्थघटकम् उत तद्बहिर्भूतम्? मङ्गलाचरणेन विघ्नध्वंसद्वारा ग्रन्थपरिसमाप्तिर्भवति इति प्राञ्चाः। मङ्गलेन विघ्नध्वंसो भवति, समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात् इति नव्याः। अतः मङ्गलं कारणं, विघ्नध्वंसो ग्रन्थपरिसमाप्तिर्वा फलम्। समाप्तिं प्रति मङ्गलं कारणं भवति न वेति विचिकित्सा। ग्रन्थसमाप्तिर्नाम चरमवर्णध्वंसः। यस्मिन् कर्मणि अनुष्ठिते सम्पूर्णमिदं कर्म इति ग्रन्थपरिसमाप्तिरित्युच्यते। मङ्गलं ग्रन्थारम्भे रचितमिति सर्वैरेव टीकाकारैः **अङ्गीकृतम्**। न्यायबोधिनीकारेण निगदितं- 'चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानमस्कारात्मकं शिष्य-शिक्षार्थं ग्रन्थादौ निबन्ध्नाति - निधायेति।'[1] इत्यत्र ग्रन्थादौ मङ्गलं प्रतिपादितम्। दीपिकाटीकायां स्वयेमव निगदितं - 'चिकीर्षितस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकमिष्टदेवतानम-स्कारलक्षणं शिष्यशिक्षार्थं निबन्धंश्चिकीर्षितं ग्रन्थादौ प्रतिजानीते- निधायेति।'[2] इति। आदि इति पदेन अवयवः बोध्यते। अतः मङ्गलं ग्रन्थान्तर्भूतम्। अतः तर्कसंग्रहविषयसमुदायत्वात् अपि अस्य घटकत्वमपि सिध्यति। यदि मङ्गलं घटकं भवति, तर्हि तस्यापि कारणं मङ्गलं भवति। घटः स्वस्य कारणं भवितुं नार्हति, कारणस्य पूर्ववृत्तित्वनियमात्। आरोहणकर्मणि अत्यन्तः निपुणः वटुः, स्वस्य स्कन्धे आरोढुं न शक्नोतीति। तर्हि मङ्गलाचरणं ग्रन्थांशभूतमङ्गलाचरणस्य कारणं कथं भवितुमर्हति इति। अतः मङ्गलस्य ग्रन्थघटकत्वमप्रसरेत् इति।

ग्रन्थरचनात् पूर्वम् अर्थं स्मृत्वा वर्णानुपूर्वीमनुचिन्त्य शब्दप्रयोगः कृतः। शब्दप्रयोगं प्रति अर्थस्मरणं कारणं भवति। तत्त्वचिन्तामणौ गङ्गेशेनोदीरितं शब्दप्रमाणलक्षणं - 'प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यशब्दः प्रमाणम्'[3] इति। अतः अर्थो भवति शब्दप्रयोगस्य हेतुः। अर्थस्मरणं ग्रन्थस्य बहिरस्ति। इदम् अर्थस्मरणं आद्यन्तयोर्हेतुः। अतः मङ्गलाचरणस्य अर्थस्मरणं समाप्तिं प्रति हेतुः इति मम मतिः।

### ❖ 'आद्यक्षणावच्छिन्नघटे उत्पन्नविनष्टघटे चाव्याप्तेरिति चेत्...।' इति वाक्यानुपपत्तिः।

तर्कसंग्रहदीपिकायां द्रव्यलक्षणनिरूपणकाले अव्याप्तिः प्रदर्शिता 'ननु गुणवत्त्वं न द्रव्यसामान्यलक्षणम्, आद्यक्षणावच्छिन्नघटे उत्पन्नविनष्टघटे चाव्याप्तेरिति चेन्न'[4] इति। ननु उत्पन्नविनष्टद्रव्यं सम्भवति न वा? युक्तिः प्रस्तूयते- समवायिकारणम् असमवायिकारणं च कार्याव्यवहितप्राक्क्षणे एव तिष्ठतः, अपि च कार्यकाले एव तिष्ठतः। कार्यद्रव्यनाशं प्रति समवायिकारणनाशः असमवायिकराणनाशः वा कारणं भवति। तर्हि कार्यं भवति द्रव्यनाशः, कारणं भवति समवायिकारणनाशः असमवायिकारणनाशः वा। कारणं भवति कार्यनियतपूर्ववर्ति। उत्पन्नविनष्टद्रव्यं नाम यस्मिन् क्षणे वस्तु उत्पन्नं भवति, परक्षणे तस्य नाशः भवति। यथा- $T_1$ इति क्षणे वस्तु उत्पन्नम्, $T_2$ इति क्षणे वस्तु नष्टम्। यदि $T_2$ इति क्षणे वस्तु नष्टमिति भवति, तर्हि तस्य कारणं भवति समवायिकारणनाशः असमवायिकारणनाशः वा। तर्हि तत्पूर्वक्षणे एव समवायिकारणनाशः असमवायिकारणनाशः वा

[1] न्यायबोधिनी, पृ.१

[2] तर्कसंग्रहदीपिका, पृ.३

[3] तत्त्वचिन्तामणि, शब्दखण्डः

[4] तर्कसंग्रहः दीपिका,पृ.१४

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

स्यात्। तर्हि $T_1$ इति क्षणे समवायिकारणम् असमवायिकारणं च तिष्ठतः कार्यकालवृत्तिनियमात्। यदि $T_2$ क्षणे समवायिकारणनाशः असमवायिकारणनाशः इति तिष्ठतः तर्हि कार्यकारणभावानुपपत्तिः स्यात्, कार्याव्यवहितप्राक्क्षणवृत्तित्वनियमात्। अतः उत्पन्नविनष्टद्रव्यं कदापि न सम्भवति। अन्नंभट्टेन एतल्लिखितं परन्तु विषयोऽयं चिन्तनीयः इति।

❖ **'पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् इत्यत्र' विभागाननुपपत्तिः।**

तर्कसंग्रहकारेण पृथिव्याः विभागः कृतः नित्यानित्यभेदन। अनन्तरं केषाञ्चिन्मते अनित्यपृथिवी विभाजिता शरीरेन्द्रियविषयभेदेन। अन्येषां मते तु पृथिव्याः पुनः भेदः विहितः शरीरेन्द्रियभेदेन। किं नाम विभागः उच्यते- विभागश्च सामान्यधर्मवतां तत्साक्षाद्व्याप्यपरस्परविरुद्धविशेष-धर्मविशिष्टाणां धर्मिणां प्रतिपादनम्। अतः विभाजकधर्माः विभाज्यतावच्छेदकस्य साक्षाद्व्याव्याः परस्परविरुद्धाः भवन्ति। परस्परविरुद्धत्वं नाम समानाधिकरणावृत्तित्वाभाववत्त्वम्। पार्थिवशरीरे शरीरत्वमस्ति, तन्मध्ये विषयत्वमपि अस्ति। अतः शरीरत्वं विषयत्वं समानाधिकरणं भवति, परस्परव्यधिकरणाभावात्। अतः अयं विभागः न युक्तः।

अत्र शरीरत्वम्, इन्द्रियत्वं, विषयत्वम् इमे धर्माः पारिभाषिकाः। पारिभाषिकः नाम न्यायशास्त्रे प्रसिद्धः। शरीरत्वं नाम सुखदुःखभोगायतनत्वम्। इन्द्रियत्वं नाम पञ्चबहिरिन्द्रियत्वम् अन्तरिन्द्रियत्वम्। विषयत्वं नाम शरीरेन्द्रियभिन्नत्वे सति भोगसाधनत्वम्। शरीरस्य पृथगुल्लेखः कृतः विशिष्टत्वात्, ब्राह्मणवशिष्ठन्यायेन। यथा- सर्वे ब्राह्मणाः आगताः भोजनार्थं, वसिष्ठोऽपि आगतः। वशिष्ठोऽपि ब्राह्मणः, तस्य पृथगुल्लेखः विशिष्टमर्यादत्वात्। शरीरस्यापि विषये अन्तर्भवति। अस्य पृथगुल्लेखः विशिष्टमर्यादावशात्। यथा- सुखदुःखानां भोगः भवति शरीरावच्छिन्ने, अतः शरीरस्य पृथगुल्लेखः। द्वितीयतः- मोक्षः भवति शरीरमार्गेण एव, मृत्पाषादिमार्गेण एव न भवति। अतः शरीरस्य पृथगुल्लेखः ब्राह्मणवसिष्ठन्यायेन।

❖ **'कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्' इत्यत्रापि विभागानुपपत्तिः।**

कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्। इत्यत्रापि विभागविषये किञ्चिद्वक्तव्यमस्ति। विभागः नाम सामान्यधर्मवतां तत्साक्षाद्व्याप्यपरस्परविरुद्ध-विशेषधर्मविशिष्टानां धर्मिणां प्रतिपादनम्। अतः विभाजकधर्माः विभाज्यतावच्छेदकस्य साक्षाद्व्याव्याः परस्परविरुद्धाः भवन्ति। परस्परविरुद्धत्वं नाम समानाधिकरणावृत्तित्वाभाववत्त्वम्। अत्र विभज्यं कारणम्। विभाजतावच्छेदकं भवति समवायिकारणत्वम्, असमवायिकारणत्वं, निमित्तकारणत्वम्। एकेन दण्डेन घटः उत्पद्यते, तत्कार्यं प्रति दण्डः निमित्तकारणम्। तेन दण्डेनापि मुरली उत्पद्यते, तत् कार्यं प्रति दण्डः समवायिकारणम्। अतः दण्डे समवायिकारणत्वं निमित्तकारणत्वं स्तः। अतः विभाजकधर्माणां सामानाधिकरण्यं जातम्। अतः विभाजकधर्माणामनुपपत्तिः स्यात्।

समाधानं तु - अत्र कारणस्य विभागः न बोद्धव्यः। कारणतायाः विभागः एव बोध्यः। विभाज्या कारणता। विभाज्यतावच्छेदकं कारणतात्वम्। विभाजकधर्माः हि समवायिकारणतात्वम्, असमवायिकारणतात्वं, निमित्तकारणतात्वमिति। अतः नासङ्गतिः।

❖ **बुद्धिलक्षणे सामानाधिकरण्यानुपपत्तिः**

तर्कसंग्रहकारणे बुद्धिविषये निगदितं - 'सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानम्'[5] इति। व्यवहारहेतुर्नाम शब्दप्रयोगः शब्दो वा। प्रयोगहेतुभूतार्थतत्त्वज्ञान-जन्यशब्दप्रमाणम्। शब्दस्य शब्दप्रयोगस्य हेतुर्हि ज्ञानं बुद्धिर्वा। ययोः सामानाधिकरण्यं तयोः कार्यकारणभावः इति नियमः। कार्यरूपशब्दस्य बुद्धिरूपकारणस्य सामानाधिकरण्यं वक्तव्म्। परन्तु अत्र शब्दस्य अधिकरणम् आकाशम्। ज्ञानस्याधिकरणम् आत्मा। अतः नैव सामानाधिकरण्यं, न च कार्यकारणभावः।

समाधानं तु- ज्ञानं विषयतासम्बन्धेन पदार्थे तिष्ठति। यथा ज्ञानं घटे विषयतासम्बन्धेन तिष्ठति। शब्दश्च शक्तिसम्बन्धेन पदार्थे तिष्ठति। एवं क्रमेण शब्दज्ञानयोः सामानाधिकरण्यं बोध्यव्यम्, अतः तयोः कार्यकारणभावोऽपि सिद्धः इति।

**उपसंहृतिः**

'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते' इति विदग्धभणितिमनुस्मृत्य विशिष्टस्थलानां संशीतिनिवारणाय तर्कसंग्रहस्य विशिष्टस्थलपर्यालोचनम् इति शोधप्रबन्धः रचितः। अस्मिन् शोधपत्रे मया तर्कसंग्रहग्रन्थस्य पञ्च स्थानानि उल्लिखितानि प्रबन्धगौरवभयात्। परन्तु अत्र नैकानि असङ्गतस्थानानि वर्तन्ते। तेषां विस्तरेण परिष्करणे परिमार्जने च तर्करसिकानां विद्वज्जनानाम् अभिलाषः निरतां वर्ततेतरामिति शम्।

## सहायकग्रन्थसूची


- अन्नंभट्टः। (१३९२ बङ्गाब्दः)। *तर्कसंग्रहः* / पञ्चाननशास्त्री (सम्पा.)। कलिकाता : महाबोधि वुक एजेन्सि।
- अन्नंभट्टः। (२००२)। *तर्कसंग्रहः* / श्रीनिवासशर्मा (सम्पा.)। वाराणसी : भारतीयविद्यासंस्थान।
- अन्नंभट्टः। (१९९९)। *तर्कसंग्रहः* / कानाइलालपोद्दारः(सम्पा.)। कलिकाता : व्यानार्जी पावलिशार्स।
- अन्नंभट्टः। (२०१४)। *तर्कसंग्रहः* / केदारनाथत्रिपाठी (सम्पा.)। दिल्ली : मोतीलाल बनारसीदास।
- अन्नंभट्टः। (२०१७)। *तर्कसंग्रहः* / श्रीकृष्णवल्लभाचार्यः (सम्पा.)। वाराणसी : चौखाम्बा संस्कृत सीरीज।
- अन्नंभट्टः। (२००७)। *तर्कसंग्रहः* / कांशीरामः संन्ध्याराठोरश्च (सम्पा.)। दिल्ली : मोतीलाल बनारसीदास।
- अन्नंभट्टः।(१४२३ बङ्गाब्दः)। *तर्कसंग्रहः* / नारायणचन्द्रगोस्वामी (सम्पा.)। कलिकाता : संस्कृतपुस्तकभाण्डारः।


[5] तर्कसंग्रहः, पृ.६०

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# रघुदेवन्यायालङ्कारकृते ‘नवीननिर्माणम्’ इति अप्रकाशितग्रन्थे षड्विधग्रन्थसङ्गतिपर्यालोचनम्

**सुमना-चक्रवर्ती**
**शोधच्छात्रा, संस्कृतविभागः, रायगञ्जविश्वविद्यालयस्य**
**पश्चिमबङ्गः**

**प्रबन्धसारः**

*प्रायेण १६५०-ईशवीयाब्दे हरिरामस्य शिष्यः रघुदेवः नवद्वीपे पठनादनन्तरं काशीं गतः। उत्तरकाले काशीमाश्रित्य तेन अध्ययनं अध्यापनञ्च कृतम्। तत्त्वचिन्तामणिमवलम्ब्य नव्यनैयायिकेन रघुदेवेन व्याख्याग्रन्थाः स्वतन्त्रग्रन्थाः अपि विरचिताः। किञ्च, नव्यन्यायादृते वैशेषिक-व्याकरण-ज्योतिष-अलङ्कारशास्त्रादीनामुपरि तद्ग्रन्थाः दरीदृश्यन्ते। प्रायेण चत्वारिंशत् ग्रन्थाः विरचिताः अनेन रघुदेवेन। परन्तु एतादृशप्रकाण्डं नैयायिकमाश्रित्य सम्यग् गवेषणं न जातं, किञ्च तद्ग्रन्थाः अपि सम्यक् न प्रकाशिताः। तेषु रघुदेववाङ्मयेषु एकः अप्रकाशितः ग्रन्थः एव* ***नवीननिर्माणम्*** *इति। अस्य ग्रन्थस्य मातृकायाः पर्यालोचने सम्पादनकार्ये च बहुविधनूतनतथ्यं प्राप्यते। नव्यन्यायदर्शने तथा भारतीयदर्शनसाहित्ये यत् खलु बहुनूतनदिगुन्मोचिता भवति। रघुदेवन्यायालङ्कारस्य चर्चायां ‘ग्रन्थसङ्गतिः’ इति विषयोऽपि अत्र नवीननिर्माणम् इति ग्रन्थे सुस्पष्टं पर्यालोचितः इति।*

**कुञ्चीशब्दाः- रघुदेवः, नवीननिर्माणं, सङ्गतिः, प्रसङ्गः, उपोद्घातः, हेतुता, अवसरः, तत्त्वचिन्तामणिः, दीधितिः, अनुमानं चेत्यादयः।**

*************************************************************************

## भूमिका

प्रायेण १६५०-ईशवीयाब्दे हरिरामस्य शिष्यः रघुदेवः नवद्वीपे पठनादनन्तरं काशीं गतः। उत्तरकाले काशीमाश्रित्य तेन अध्ययनम् अध्यापनञ्च कृतम्। अपि च- “इमौ भट्टाचार्यप्रवररघुदेवस्य चरणौ....” इति काव्यविलासकारचिरञ्जीवभट्टाचार्य-रचनात् सिद्धान्तोऽयं यत् रघुदेवश्च गुरुरासीत्तस्य चिरञ्जीवभट्टाचार्यस्येति। अतः *अष्टसाहस्रीविवरणः* इति ग्रन्थेऽपि रघुदेवस्य नामोल्लेखः अत्र विशिष्टं प्रामाण्यमुपस्थापयति। तत्त्वचिन्तामणिमवलम्ब्य नव्यनैयायिकेन रघुदेवेन व्याख्याग्रन्थाः स्वतन्त्रग्रन्थाः अपि विरचिताः। किञ्च नव्यन्यायादृते वैशेषिक-व्याकरण-ज्योतिष-अलङ्कारशास्त्रादीनामुपरि तद्ग्रन्थाः दरीदृश्यन्ते। प्रायेण चत्वारिंशद्ग्रन्थाः विरचिताः रघुदेवेन। *Catalogus Catalogorum, New Catalogus Catalogorum,* बङ्गे नव्यन्यायचर्चा चेत्यादिषु ग्रन्थेषु रघुदेवस्य जीवनवृत्तान्तः ग्रन्थाश्चालोचिताः, परन्तु तदतीव स्वल्पम्। तेषु ग्रन्थेषु अन्यतमाः- *निरुक्तिप्रकाशः, निश्चयत्वनिरुक्तिः, द्रव्यसारसंग्रहः, पदार्थखण्डनविवरणम्, विषयतावादः, आकाङ्क्षावादः, मुक्तिवादः, ईश्वरवादः, प्रागभाववादः, लौकिकविषयतावादः, अनुमितिपरामर्शविचारः, विशिष्टवैशिष्ट्यबोधविचारः, सामग्रीवादः, पक्षतावादः, कणादसूत्रव्याख्यानम्, तत्त्वचिन्तामणिव्याख्या-गूढार्थदीपिकाचेत्यादयः।* अत्र वैशेषिकसूत्रमवलम्ब्य व्याख्यानग्रन्थः, *गङ्गेशकृतं* तत्त्वचिन्तामणिमधिकृत्य व्याख्यानं टीकामूलकाः ग्रन्थाश्च यथा विद्यन्ते तथा आचार्य्यवर्द्धमानस्योपरि व्याख्यानं, रघुनाथशिरो-मणिमुद्धृत्य च व्याख्याः सन्ति। परञ्च

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

मौलिकविरचनमपि तेन कृतमिति ऐतिहासिकाः वदन्ति। तत्र दीनेशचन्द्रभट्टाचार्यः, गोपीनाथकविराजः, कार्ल-एइच्-पटारः, सतीशचन्द्रविद्याभूषणादयः अन्ये बहवः पण्डिताः रघुदेवविषयम् उपस्थापितवन्तः। तेषु ग्रन्थेषु अन्यतमः एकः *नवीननिर्माणम्* इति। अयं तु मातृकारूपेण वर्तन्ते। तस्याः मातृकायाः सविमर्शसम्पादनकार्यम् अस्माभिः क्रियते इदानीम्।

आदौ अस्मिन् **नवीननिर्माणम्** इति ग्रन्थे मङ्गलाचरणं विधाय ग्रन्थसङ्गतिः पर्यालोचिता ग्रन्थकृता रघुदेवेन। तत्सङ्गतिः षड्विधा- १. प्रसङ्गः, २. उपोद्घातः, ३. हेतुत्वम्, ४. अवसरः, ५. निर्वाहकैक्यं निर्वाहकत्वं वा, ६. कार्यैक्यम् एककार्यत्वं वा इति। तदपि उक्तमन्यत्र रघुदेवेन -

सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा।
निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते॥ इति।[1]

सप्रसङ्गादिकं सङ्गतिषट्कं शास्त्रसम्मतमत्र रघुदेवेन पर्यालोचितम्। ग्रन्थस्य सर्वप्रथमं महर्षिगौतमप्रवर्तिते न्यायसूत्रे प्रत्यक्षादिप्रमाणचतुष्टयेषु प्रत्यक्षानुमानौ इति प्रमाणद्वयविषयौ प्रस्तावितौ। तत्र चादौ प्रत्यक्षं निरूपितम् अनन्तरम् अनुमानानुमितिश्च निरूपणीया। यथा – "प्रत्यक्षप्रमाणोपजीवकत्वात् प्रत्यक्षानन्तरमनुमानं निरूप्यते। प्रत्यक्षप्रमित्युपजीवकत्वात् प्रत्यक्षप्रमित्यनन्तरम् अनुमितिः निरूप्यते। न चासङ्गतं न प्रयुञ्जीतेति वाक्यादनन्तरं निरूपणे सङ्गतिरपेक्षिता किं तत्प्रदर्शनेन किं वा यतो निरूपणीय-निरूपणप्रतिज्ञयेति चेन्न। यद्यत्प्रतिपाद्यनिरूपितसङ्गतिमत्प्रतिपादकवाक्यं तत्तत्प्रतिपाद्यप्रतिपत्तिप्रयोजनप्रयोजनकप्रतिपत्तिजनकं वाक्यं भवतीति नियमात् प्रत्यक्षानुमानग्रन्थयोः एकप्रयोजनवत्ताज्ञानार्थं सङ्गतिप्रदर्शनम्। तस्य च ग्रन्थप्रवृत्ताविष्टसाधनताज्ञानविषया उपयुक्तत्वात् न वैयर्थ्यं शिष्यावधानायानुमाननिरूपणीयनिरूपणप्रतिज्ञेति। अवधानं च विषयान्तरसञ्चारराहित्यम्। तच्चापेक्षितस्य निरूपणीयनिरूपणस्य तदानीं प्रतिपादने तदानीन्तनविषयाभिनिवेशस्योद्देशीभूतनिरूपणीयज्ञानविरोधित्वप्रतिसन्धानेन तत्र द्वेषसम्पादनान्निर्वहति। अथवा सङ्गतिप्रदर्शननिरूपणीयनिरूपणप्रतिज्ञयोः शिष्यावधानमेव फलं शिष्यावधाने सङ्गतिप्रदर्शनफलत्वं चासङ्गतत्वज्ञाने सति उपेक्षासम्भवात्तन्निरासद्वारा सङ्गतिज्ञानस्यानुपेक्षाप्रयोजकत्वमिति रीत्या निर्वहति शिष्यावधाने निरूपणीयनिरूपणप्रतिज्ञाया फलत्वं चोक्तमेवेति"। अपि च प्रसङ्गेऽस्मिन् रघुदेवन्यायालङ्कारः कथयति- "नन्वेवमपि अनुमितिनिरूपणे तदन्वयोऽसङ्गत एव। यत् फलं यत्-फलोपजीवकं तत्तन्निरूपणानन्तरं निरूपणविषय इति नियमाभावात् अनुमित्यनुव्यवसायरूपफलस्यानुमित्युपजीवकं तत्तन्निरूपणानन्तरनियमाभावात्। अनुमित्यनुव्यवसायरूपफलस्यानुमित्युपजीवकत्वसत्त्वेन व्यभिचारात्। तत्रानुमितिनिरूपणानन्तरनिरूपणविषयत्वाभावादिति चेन्न। यत्प्रमाण-फलतावच्छेदकावच्छेदेन यद्यदुपजीवकं तत्तन्निरूपणानन्तरनिरूपणविषय इति व्याप्त्यभ्युपगमात्। अत्र च यत्किञ्चित्प्रत्यक्षफलस्यानुमित्यनुव्यवसायादेरनुमित्युपजीवकत्वेऽपि न सर्वत्र प्रत्यक्षफलं तथा घटादिप्रत्यक्षे तदभावात्। अतो न व्यभिचारः"।

वस्तुतस्तु नव्यन्यायपरम्पराया अन्यतमोऽयं ग्रन्थकारः रघुदेवन्यायालङ्कारः। न्यायस्य नव्यमतस्य प्रवक्तारः खलु महामतिगङ्गेशोपाध्यायचरणाः मैथिलमूर्धन्याः। तदीयग्रन्थे तत्त्वचिन्तामणिनाम्नि भागचतुष्टयं वर्तते –

[1] गूढार्थतत्त्वदीपिका, पृ. ५४

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

प्रत्यक्षचिन्तामणिः, अनुमानचिन्तामणिः, उपमानचिन्तामणिः, शब्दचिन्तामणिश्चेति। अतः गौतमप्रदर्शितं नयानुसारं गङ्गेशोऽपि तदीये ग्रन्थे क्रमशः प्रत्यक्षादिप्रमाणचतुष्टयं विस्तृततया पर्यालोचितम्। अपि च तच्चिन्तामणिमाश्रित्य रघुदेवः क्रमशः आदौ प्रत्यक्षप्रमाणं प्रत्यक्षप्रमितिं च आलोच्य अनन्तरं अनुमानम् अनुमितिश्च आलोचितम्। कदाचित् केवलं स्वतन्त्रतया ग्रन्थोऽयं व्याख्यातः। सर्वमेतत् अस्य **नवीननिर्माणम्** इति ग्रन्थस्यादौ ग्रन्थकृता सुष्ठुतया सूक्ष्मतया च विशदीकृतम्।

**सङ्गतिः**- तत्र का नाम सङ्गतिरिति जिज्ञासायाम् उक्तम्- एकवाक्यतापन्नत्वे सति अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोऽर्थः सङ्गतिः।[2] यथा प्रत्यक्षनिरूपणकार्यत्वम् अनुमान-निरूपणे सङ्गतिः इति दीधितौ अनुमानखण्डे तथा लौगाक्षिभास्करीये *न्यायसिद्धान्तमञ्जरीप्रकाशे* उक्तम्। यथा वा सद्धेतुनिरूपणानन्तरम् असद्धेतुनिरूपणे व्याप्तिपक्षधर्मत्वविरहरूपप्रसङ्ग-सङ्गतिः इति गदाधरभट्टाचार्य्येण उक्तम्। सङ्गतिश्च कस्यचिद्वस्तुनो निरूपणे ह्युपयुज्यते। अत्र व्याप्तिरनुसन्धेया यद्यदनन्तरं निरूप्यं भवति तत्तत्सङ्गतं भवति इति। असङ्गतत्वज्ञानेन हि ग्रन्थादेरुन्मत्त-प्रलपितत्वशङ्का उत्पद्यते। सङ्गतत्व-ज्ञानेन तु तन्निवृत्तिः। तत एकवाक्यताप्रतिपत्तिः। तदेव सङ्गतेः प्रयोजनम्। अत एव प्रमाणमपि नासङ्गतं प्रयुञ्जीत इत्यभियुक्तोक्तिः इति रामरुद्रः तट्टीकायाम्। पूर्वापरग्रन्थैकवाक्यताप्रतिपत्तिः एकप्रयोजनवत्ताज्ञानफलिका प्रयोजनम् इति वैयाकरणभूषणसारदर्पणे कथितम्। सङ्गतिः इत्युक्ते प्रसङ्गाद्यन्यतमत्वम् च उच्यते। जायते च कार्ये कारणे वा ज्ञाते कारणत्वस्य कार्यत्वस्य वा ज्ञानात् किमस्य कारणं कार्यं वा इति जिज्ञासा। अतस्तयोर्द्वयोरपि सङ्गतित्वं भवति। तथा हि प्रत्यक्षाभिधानानन्तरमनुमानाभिधानं निरूपणात्मकम्। तत्प्रयोजकजिज्ञासा प्रत्यक्षकार्यज्ञानं भवतु इत्याकारिका स्यात्। तज्जनकज्ञानं प्रत्यक्षकार्यज्ञानमिष्टसाधनम् इत्याकारकम्। तद्विषयः प्रत्यक्षकार्यत्वम् इति कार्यत्वे लक्षणसमन्वयः। एवं कारणत्वादावपि सङ्गतित्वमूह्यम् इति न्यायसिद्धान्तमञ्जर्य्याम् उक्तम्। जिज्ञासायाः प्रयोजकत्वं चेत्थं भवति। प्रथमं ज्ञानेष्टसाधनताकैक्यं सङ्गतिः। यत्रैकेन कारणेन कार्यद्वयं तदधिकसंख्याकं वा कार्यमुत्पाद्यते तत्रेयं सङ्गतिर्ज्ञेया। इदं तु निर्वाहकत्वमित्यप्युच्यते तत्र दीधितिव्याख्यायां भवानन्दी इति टीकायाम्। वेदान्तिनस्तु मुख्यतः त्रिधा सङ्गतीः स्वीकुर्वन्ति। यथा- शास्त्रेऽध्याये पादे च। अवान्तरसङ्गतयश्च विद्यन्ते तन्मते- आक्षेपसङ्गतिः दृष्टान्तसङ्गतिः प्रासङ्गिकसङ्गतिः मीमांसासङ्गतिरिति अनेकविधा। काव्यज्ञाश्च सङ्गमः सम्मेलनं वेति कथयन्ति।

**प्रसङ्गः-** सप्रसङ्गादिषड्सङ्गतीनां सर्वेषाम् अर्थः अत्रोल्लिखितः। इत्थं च उपोद्घातादिभिन्नसङ्गतित्वं प्रसङ्गसङ्गतिलक्षणम्। उपोद्घातादिभिन्नस्मरणप्रयोजक-सबन्धः। प्रतियोगित्वानुयोगित्वाधारत्वादीनामप्यत्रै-वान्तर्भावः जायते। प्रसङ्गत्वं च सङ्गतित्वे सत्युपोद्घातादिभिन्नत्वम् इति जगदीशन्यायालङ्कारस्य मतम्। स्मृतस्योपेक्षानर्हत्वम् एव प्रसङ्गसङ्गतिरिति नीलकण्ठीटीकायामुच्यते। यथा यथार्थानुभवरूप-प्रमाविभजनानन्तरं प्रमाकरणरूपप्रमाणविभजने प्रसङ्गः सङ्गतिः इति उक्तम् अन्नम्भट्टेन- यथार्थानुभवं

---

[2] न्यायकोशः, पृ. ९०६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

विभजते- यथार्थेति। प्रसङ्गात् प्रमाकरणम्।[3] स्मृतस्य उपेक्षानर्हत्वमित्यस्यार्थश्च स्मृतिकालावच्छेदेनोपेक्षानर्हत्वम् अथवा द्वेषविषयतानवच्छेदकः स्मृतिविषयतावच्छेदको धर्मः इति गदाधरभट्टाचार्य्यस्य मतम्। अपि च प्रसङ्गपदेन व्याप्तिरूपः प्रकृष्टसम्बन्ध इति ज्ञायते। यथा अतिप्रसङ्गः अप्रसङ्गः इत्यादौ। वैयाकरणास्तु प्राप्तिः इति कथयन्ति। यथा कृताकृतप्रसङ्गि नित्यं तद्विपरीतमनित्यम् इति **परिभाषेन्दुशेखरे** उक्तम्। मीमांसकास्तु अन्योद्देशेन प्रवृत्तौ तदन्यस्यापि सिद्धिः प्रसङ्गः। अथवा अन्योद्देशेनान्यदीयस्यापि सहानुष्ठानं प्रसङ्गः इति माधवाचार्येण **जैमिनीयन्यायमालायाम्** उक्तम्।

**उपोद्घातः-** प्रकृतोपपादकत्वं क्वचिद् घटकत्वम् इति उपोद्घातः। विशिष्ट-परामर्शत्वावच्छिन्न-कारणताव्यवस्थापने तादृशकारणतानिष्ठ-अनुमिति-लक्षणघटकत्वरूपोपपादकत्वं सङ्गतित्वेनाभिहितम्। क्वचिद्वा तज्ज्ञापकत्वम् इति। अतएव व्याप्तिग्रहोपायनिरूपणानन्तरं सहचारज्ञानात्मकतदुपायज्ञानप्रयोजकत्वरूपतज्ज्ञापकत्वसङ्गत्या सामान्य-लक्षणानिरूपणमित्यपि अर्थः भवति। प्रकृतोपपादकत्वम् इत्यनेन प्रकृतोपसाधकत्वं ज्ञायते। यथा परामर्शजन्यज्ञानत्वरूपेऽनुमितिलक्षणे वक्तव्ये विशिष्टपरामर्शस्यानुमितिहेतुत्वमुपोद्घात-सङ्गत्या व्यवस्थाप्यते। यथा वा प्रमाकरणरूपे प्रमाणे निरूपणीये सत्युपोद्घातसङ्गत्या करणनिरूपणम् इति च उच्यते। चिन्तां प्रकृतसिद्धार्थामुपोद्घातं प्रचक्षते[4]। तदर्थश्च प्रकृतसिद्ध्यनुकूलचिन्ताकालावच्छेदेन प्रकृतानुकूलत्वम्। अत्र चिन्ता इत्यनेन च वक्तुर्ग्राह्या। अत्रानुकूलत्वं च क्वचिद्घटकत्वं क्वचिज्ज्ञापकत्वम्। तत्र घटकत्वं यथा व्याप्तिविशिष्ट-पक्षधर्मताज्ञानजन्यज्ञानमित्यत्राज्ञातव्याप्तिकस्य व्याप्तिपदवाच्यत्वेन ज्ञाने का व्याप्तिः इत्याकारिकायां जिज्ञासायां व्याप्तिनिरूपणम्। ज्ञापकत्वं यथा विशिष्टज्ञानस्यानुमितिहेतुत्वे किं ज्ञापकम् इत्याकाङ्क्षायां परामर्शस्यानुमितिहेतुत्वव्यवस्थापनम् इति। निर्दिष्टोपपादकत्वम् इति च जगदीशमते उपोद्घात इति पदार्थः। शाब्दिकास्तु प्रकृतसिद्ध्यनुकूलचिन्ताकालावच्छिन्नप्रकृतानुकूलत्वम् इत्याहुः। अनुकूलत्वं चात्र घटकत्वज्ञापकत्वादिरूपं यथायथं ग्राह्यम्। तत्रावच्छेदकांशः चिन्ताकाल-पर्यन्तः स्वरूपसन् इतरांशश्च ज्ञातः सन्नुपयोगी भवति इति ज्ञेयम्।

**हेतुता-** एवमन्यत् आलोचितः हेतुतादिश्च हेतुताप्रयोजकता प्रयोज्यता च। हेतुतापदस्य अजहत्स्वार्था उभयपरत्वात्। तत्र मणिकारस्य आचार्यगङ्गेशस्य मतमत्र समर्थयन् आह- अनुमित्यात्मककार्यनिरूपणानन्तरं कारणत्वज्ञानात् किमस्य कारणमिति जिज्ञासया अनुमानरूपकारण-निरूपणमिति अनुमितिरूपकार्यनिरूपणानन्तर-कारणनिरूपणप्रयोजकजिज्ञासाजनकज्ञानविषयत्वेन तत्कारणत्वेऽपि लक्षणसमन्वय इति कारणसङ्गत्या अनुमितिनिरूपणानन्तरमनुमाननिरूपणं कृतं मणिकृता। कुत्रापि च हेतुतापदेन उपजीवकत्वम् इत्यर्थः गृह्यते। यथा तत्रैव **गूढार्थतत्त्वदीपिकायां** रघुदेवेन आदौ ग्रन्थसङ्गतिपर्यालोचनाकाले उक्तं- "हेतुतापदस्य उपजीवकत्वपदार्थकार्यत्वं कारणत्वं च

[3] तर्कदीपिका, अन्नम्भट्टकृता, नारायणचन्द्रगोस्वामीसम्पादिता, कोलकाता, पृ. २८९।

[4] सर्वदर्शनसंग्रहः, जैमिनीयदर्शनम्, पृ. २०८।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

इत्यर्थकत्वात्। अधिकं तु अनुमानदीधितौ अनुसन्धेयम्" ।[5]

**अवसरः**- प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्त्या अनन्तरवक्तव्यत्वम्। यथा प्रत्यक्षनिरूपणानन्तरं तत्कार्यत्वेनानुमानोपमानयोरुभयोर्निरूपणप्राप्तौ बहुवादिसम्मतत्वेन प्रथममनुमानम् एव जिज्ञासोदयेनानुमाननिरूपणेन प्रतिबन्धकजिज्ञासा-निवृत्तावावसरसङ्गत्योपमाननिरूपणम् इत्यर्थः। प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तिकालावच्छिन्ना-वश्यवक्तव्यत्वम् इति अन्ये च केचन। प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तौ सत्यामव-श्यवक्तव्यत्वम्। यथा अनुमाननिरूपणानन्तरं तादृशजिज्ञासानिवृत्तावावश्यवक्तव्यत्वज्ञानात् किं वक्तव्यम् इति श्रोतुर्जिज्ञासानन्तरमुपमाननिरूपणम् इति।

**निर्वाहकत्वम्**- निर्वाहकत्वम् इति एकप्रयोज्यप्रयोजकत्वं च एकोपपादकत्वं वा। कथञ्चिदनुकूलत्वं तथा। एककार्यनिर्वाहकत्वम्। एककार्यनिर्वाहकत्वं च कारणकारणतावच्छेदक-एतदुभयसाधारणं प्रयोजकत्वम्। यथा व्याप्तिपक्षधर्मतयोरनुमित्यात्मकैककार्याजनकत्वेऽपि तज्जनकीभूतज्ञानविषयतावच्छेदकत्वेनैककार्यानु-कूलत्वम्। तत्र सामान्यतोऽनुमितिलक्षणैककार्या-नुकूलत्वज्ञाने किं तदनुकूलम् इति जिज्ञासायाम् अनन्तरं पक्षधर्मतानिरूपणमिति। एककार्यजनकत्वम् च। कारणकारणतावच्छेदकसाधारणप्रयोजकत्वरूपम् इत्यर्थः। निर्वाहकत्वम् इत्यनेन कारणतानिर्वाहकत्वम् इति उच्यते कार्यत्वमिति यावत्। प्रयोज्यत्वं वा निर्वाहकत्वमिति केचिदाहुः। निर्वाहकैक्यं खलु एकप्रयोजकप्रयोज्यत्वम्। यथा प्रत्यक्षनिरूपणानन्तरं परामर्शानुमित्योर्निरूपणे निर्वाहज्ञानाज्जिज्ञासा। ततो ज्ञानसाधनीभूत-वाक्येच्छा। ततो वाक्यसाधनीभूत-कण्ठाद्यभि-घातेच्छा। ततस्तत्र प्रवृत्तिः। ततः कण्ठाद्यभिघातः। ततोऽनन्तराभिधानं निरूपणीयस्य इति। अनन्तराभिधानप्रयोजक-जिज्ञासाजनकं यत्सङ्गतिनिरूपकज्ञानप्रयोज्यं ज्ञानं तद्विषयस्मरणानुकूलसम्बन्धः।

**एककार्यत्वम्**- एककार्यानुकूलत्वम् एव एककार्यत्वमित्यर्थः। अत्रार्थे एकं कार्यं ययोः कारणयोः तयोर्भावः इति व्युत्पत्तिः। बहुव्रीहेरनन्तरं त्वप्रत्ययः स्यात्। यथा **वाचस्पत्यम्** इति अभिधानग्रन्थे प्रसङ्गेऽस्मिन् एवम् उच्यते-

गुणागुणमनासङ्गमेककार्यमनन्तरम्।
एतत्तु ब्रह्मणो वृत्तमाहुरेकपदं द्वयम्॥

एककार्यत्वमिति कार्यैक्यमित्यप्युच्यते। एकस्य (कारणस्य) कार्यता (प्रयोज्यता कार्ययोः)। सा च जन्यता जन्यज्ञानविषयता च। यथा ईश्वरशक्त्योरनुमानाजन्यत्वेऽपि तज्जन्यज्ञानविषयत्व-लक्षणैककार्यत्वसङ्गत्या ईश्वरवादानन्तरं मीमांसकेन शक्तिराशङ्किता। नैयायिकेन च ईश्वरसिद्ध्यनन्तरं शक्तिं निरस्य परमप्रयोजनं त्वनुमानस्यापवर्गः इत्यनेन ईश्वरसिद्ध्यपवर्गयोरनुमानजन्यत्वलक्षणैक-कार्यत्वं सङ्गतिः सूचिता।

रघुदेवेन अत्र सङ्गतीनामालोचनकाले अन्यान्य-ग्रन्थानां प्रासङ्गिकविषयाणाम् आलोचनावसरे प्राचीनमत-मदुक्तरीति-पूर्वग्रन्थ-विधिवाद- केचित्-दीधितिकार-इत्यादिक्रमेण तत्तत्सङ्गतिः प्रदर्शिता। प्रत्यक्षनिरूपणानन्तरम् अनुमानं निरूप्यते रघुदेवेन। तत्रोक्तं – "तत्रानुमितिकरणमनुमानम्। तच्च सहचारप्रत्यक्षजन्यव्याप्तिज्ञानम्। न च इतरभेदानुमापकमेव लक्षणम्"। अत्र च

[5] गूढार्थतत्त्वदीपिका, पृ. ५४।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

अनुमितिलक्षणं वैशद्येन प्रपञ्चितम्। आदौ चिन्तामणिकारमतम् उपाध्यायमतञ्च उपस्थापितम् – "अनुमितिश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्य-ज्ञानमिति चिन्तामणिमतानुयायिनो वदन्ति। अत्रोपाध्यानुयायिनः व्याप्तिविशिष्टत्वपक्षधर्मत्वोभय-सामानाधिकरण्यावगाहिज्ञानजन्यत्वमुपदर्शितलक्षण-वाक्यार्थः"। लक्षणमिदं बहुविधदोषमुत्थाप्य निराकृत्य च सुस्पष्टतया परिष्कृतम्। तदा अपरापराचार्याणां मतम् उल्लिख्य खण्डनमण्डनञ्च विहितम् अत्र रघुदेवेन। नवीनमतरूपेण उक्तं – "व्याप्तिविशिष्टं च पक्षधर्मश्च व्याप्तिविशिष्टपक्षधर्मो तयोर्भावः व्याप्तिविशिष्टपक्षधर्मतेति द्वन्द्वाश्रयणात् व्याप्तिविशिष्टत्वपक्षधर्मतोभयत्वागाहिज्ञानजन्यत्वं व्याप्तिविशिष्टेत्यादिना लक्षणवाक्यार्थः"।

वस्तुतः नव्यन्याये रघुदेवस्य कृतित्वं सुविदितमेव। **तत्त्वचिन्तामणि**मधिकृत्य बहुविधं व्याख्यानं रघुदेवस्य अद्यत्वे सारस्वतसमाजे सुप्रतिष्ठितमिति आधुनिकसमालोचकानां मतम्। किन्तु रघुनाथशिरोमणिकृत-**दीधिति**ग्रन्थमवलम्ब्यापि याः कृतयः विद्यमानाः तास्तु इदानीमपि अनाविष्कृताः। तेषां **दीधिति**ग्रन्थोपरि व्याख्यानानां सम्पादनं प्रकाशनं खण्डनमण्डनञ्च अत्यन्तमावश्यकमिति धिया रघुदेवकृते **निरुक्तिप्रकाशे** नवीननिर्माणमिति व्याख्यानग्रन्थस्य सम्पादनकार्ये अस्माभिः प्रयासः कृतः। तदर्थमेव अस्य अप्रकाशितग्रन्थस्य सम्पादनकाले बहुविधं तथ्यं तत्त्वञ्च यदस्माभिः प्राप्तं तत्किञ्चिद् अत्र आंशिकरूपेण अस्मिन् प्रबन्धे पर्यालोचितम्। अत्र रघुदेवस्य स्वकीयव्याख्यानरीतिः तथा तत्पूर्ववर्तिनां बहुविधाचार्याणां मतमुत्थाप्य अस्य ग्रन्थस्य व्याख्यानकौशलेन नूतना दिगुन्मोचिता इति अलम्।

## सहायकग्रन्थसूची


- Harirama. *Viṣayatāvāda.* Ed. V.N.Jha. Pune: University of Pune, 1987.
- Raghudeva. *Anumitiparāmarśavicāra.* Ed. Subhashis Bhattacharya. Kolkata: Beneras Markentile, 2015.
- •*Gūdhārthatattvadīpikā.* Ed. Chandan Bhattacharya. Kolkata: Sanskrit Pustak Bhandar. 2012.
- *Tattvacintāmaṇi* of Gangeśa Upādhyāya with *āloka* of pakṣadhara Miśra & *Darpaṇa* of Mahārāja Maheśa Thakkura. Ed. Umesh Misra. Darbhanga: Mithila Institute of Post Graduate Studies and Research in Sanskrit Learning, 1957.
- Bhattacharya, D.C. *History of Navyanyāya in Mithilā.* Darbhanga: Mithila Institute of Post Graduate Studies and Research in Sanskrit Learning, 1958.
- *Vāngālīr Sārasvata Avadāna: Vange Navyanyāyacarcā.* Part-I. Kolkata: Vangiya Sahitya Parisat, 1358. (Bengali Era).
- Kaviraj, Gopinath. *The History and Bibliography of Nyāya-Vaiśeṣika Literature.* Ed. Gaurinath Sastri. Varanasi: Sampurnananda Sanskrit University, 1982.

ISSN : 2583-2271
Vol. - 5, No. 1: 2025


- Mm. Bhimacharya, Jhalakikar. *Nyāya-Kośa*. (A Dictionary of Technical Terms of Indian Philosophy). Revised and Re-edited by Mm. Vasudeva Shastri Abhyankar. Choukhamba Surabharati Prakashan, Varanasi, 2011.
- Potter, Karl. H. Encyclopedia of Indian Philosophies. Delhi: Motilal Banarsidass, 1978.
- Theodor Aufrecht. Catalogus Catalogorum (Part.II). Leipzig: German Oriental Society, 1896.

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# चार्वाकमते ईश्वरस्वरूपम्

**बिप्लबसरकारः**

**शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्याल यः**

**नवदेहली**

**प्रबन्धसारः**

*चार्वाकदर्शने वैदिकदार्शनिकवद् ईश्वरस्य स्वरूपं प्रसिद्धं नास्ति। चार्वाकमते ईश्वरः शरीरादिसंघातरूपः अनित्यश्च भवति। उपर्युक्तानुसारेण चार्वाकसिद्धान्तानुसारं शरीरादिसंघातस्यैवात्मत्वं स्वीकर्तव्यमेव। न हि शरीरादिसंघातादतिरिक्तः कश्चिदात्माऽस्ति तर्हि परमेश्वरोऽपि शरीरादिसंघातात्मकोऽनित्य एव भविष्यति स च लोकव्यवहारसिद्धो राजैव।*

*तत्र चार्वाको वक्ति यल्लोकव्यवहारसिद्धाद्राज्ञोऽतिरिक्तो नास्ति कश्चिदीश्वरः। तदाऽयमीश्वरो न्यायदर्शनानुसारं नैव सर्वज्ञानवान् सम्भवति, राज्ञोऽपि शरीरादिसंघातात्मकत्वेनास्माकमिवाल्पज्ञानवत्त्वात्। सर्वविषयिणीच्छाऽपि नेदृशेश्वरे। सर्वविषयिणी कृतिरपि न अत एव। न्यायदर्शने परमेश्वरस्य स्रष्टृत्वेनोपादानविषयकापरोक्षज्ञानाय सर्वज्ञत्वमावश्यकम्। उपादानविषयकापरोक्षज्ञानाभावे चास्य स्रष्टृत्वमेव न सम्भवति। अत्र च दर्शने न हीश्वरस्य लोकव्यवहारसिद्धस्य राज्ञः स्रष्टृत्वमतो न हि तत्सम्पत्तये सर्वज्ञत्वस्वीकारस्यौचित्यमस्ति। चार्वाकमते परमेश्वरो राजैव। स चास्माकमिवाल्पज्ञः कथमस्य महतः सर्गस्य कर्ता भवितुमर्हति, यतः उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत एव कर्तृत्वस्वीकारात्। राज्ञस्तु सर्गोपादानविषयकं नास्त्यपरोक्षज्ञानं, नास्ति चिकीर्षा, नास्ति च तादृशी कृतिः। अत एव चार्वाकदर्शने ईश्वरः असर्वज्ञः जगतः अकर्ता च भवति।*

**कुञ्चीशब्दाः – ईश्वरः, व्यभिचारः, महत्, पदार्थः, असर्वज्ञः, राज्ञः चेत्यादयः।**

*******************************************************************************

**चार्वाकदर्शने ईश्वरस्य जगत्कर्तृत्वव्यवस्थापनम् –**

नैयायिकाः क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवत् इत्यनुमानेन क्षित्यङ्कुरादिकस्य सकर्तृकत्वं प्रसाध्यानन्तरञ्च क्षित्यादिकर्तृत्वस्यास्मदादिषु नैव सम्भवतीत्यतः परिशेषानुमानेन ईश्वरं साधयन्ति। तथाहि – **“न च तत्कर्तृत्वमस्मदादीनां सम्भवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः”**[1]। अत्र च कार्यत्वं हेतुत्वेनोपस्थाप्यते। “यत् यत् कार्यम् तत् तत् सकर्तृकम्” इयं व्याप्तिः। किन्त्विदमनुमानं चार्वाको नैव प्रमाणभूतत्वेनाङ्गीकरोति यतो ह्यस्यानुमानस्य न हि प्रत्यक्षमूलकत्वं विद्यते। अस्मिन्ननुमाने “यत् यत् कार्यं तत् तत् सकर्तृकम्” अस्याः व्याप्तेः प्रत्यक्षतः ग्रहणमावश्यकम्। अपि चोत्पन्नप्रतीतिकत्वम् आवश्यकम्। तच्च नास्याः व्याप्तेः। प्रत्यक्षतस्त्वस्याः व्याप्तेः ग्रहणं नैव सम्भाव्यते यतो हि कण्टकतैक्ष्ण्यादिषु कार्यत्वं त्वस्ति, प्रत्यक्षत उपलभ्यते कार्यत्वं परन्तु न हि सकर्तृकत्वं तत्र प्रत्यक्षतः सिद्धं भवति। तत्र तु कृतिजन्यत्वाभाव एव प्रतीयते प्रत्यक्षतः।[2] अतः कण्टकतैक्ष्ण्यादिषु कार्यत्वस्य हेतोः विद्यमानत्वेऽपि सकर्तृकत्वस्य साध्यस्य सत्त्वं नैव प्रत्यक्षतः गृह्यतेऽतो

[1] न्या. सि. मु. पृ. 21

[2] “अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्” न्या० सू० 4/1/22

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

व्यभिचारः स्फुटः। व्यभिचारिणा च हेतुना कुतः साध्यस्यानुमानं कर्तुं शक्यम्? अतो न क्षित्यादिकर्तृतया परमेश्वरोऽलौकिक: साधयितुं शक्यते। भूतेभ्य एव प्राणिसर्गः सञ्जायते, नास्ति कस्यचित् स्रष्टुरपेक्षा सर्गार्थम् । भूतचतुष्टयात्मिका जडा प्रकृतिरेव स्वभावतः सृजति। सर्गस्वभावैषा प्रकृतिः। तथा चोक्तं – **"भूतेभ्यो मूर्त्युपादानवत् तदुपादानम्"**[3]**।** अभिप्रायस्तु – यथा कर्मनिरपेक्षेभ्यो भूतेभ्य एव मूर्त्तयः पाषाणाद्यवयविनः समुत्पद्यन्ते तेषां कर्मासम्भवात् तथा कर्मनिरपेक्षेभ्य एव भूतेभ्यः तस्य शरीरस्योत्पत्तिः सम्भवतीति न तत्र कर्मणां कारणत्वम्। एवञ्च नैयायिकाः ईश्वरः जगन्निमित्तकारणं भवतीति वदन्ति, तदसमीचीनम्। यतः निमित्तकारणं विनैव भावकार्याणामुत्पत्तिः सम्भवति। यथा कण्टकतैक्ष्ण्यादिकं कार्यं विनैव निमित्तकारणेन स्वत एव दृश्यते तथा कार्यमात्रं शरीरादिकं विनैव निमित्तकारणेन जायते।

अत्र नैयायिकानां प्रश्नो भवति यल्लोके कश्चिदपि जडः पदार्थः स्वत एव कार्यसम्पादने सक्षमो नैव भवति। चेतनाधिष्ठित एव जडपदार्थः कार्यजनने समर्थो भवति।[4] पृथिवीजलतेजोवायवः भूतपदवाच्याः जडाः कथं स्वतः सर्गं सम्पादयितुं शक्ताः भविष्यन्ति, इत्यत्र भूतचतुष्टयानां प्रेरकोऽधिष्ठाताऽवश्यमेव कश्चिच्चेतनोऽपेक्षितः। चार्वाकैरुच्यते अत्र नास्ति किमपि मानम्। कण्टकतैक्ष्ण्यादिकं कञ्चिच्चेतनमधिष्ठातारं विनैव जडेन सञ्जायते। यद् यद् वस्तु यादृशमुपलभ्यते तादृशमेव तद्वस्तु स्वीकार्यम्। किञ्चिद्वस्तुजातं चेतनाधिष्ठितेन जडेन सम्पद्यते, किञ्चिच्चेतनानधिष्ठितेन, जलेनाग्निः शमतामेति, तेजसा च जलं शुष्यति, विभिन्नानि भूतानि एकीभूय जगन्निर्मापयन्ति। गर्भगतस्य भ्रूणस्य हस्तपादोदरादीनामवयवानां निर्माणं स्वाभाविकम्। तत्र चैतन्ययोगोऽपि स्वाभाविकः। कण्टकतैक्ष्ण्यस्य पशुपक्षिणां वैचित्र्यस्य च कः सर्जक: सर्वमेतन्निसर्गादेव सम्पन्नम्। अग्नेरुष्णत्वं स्वभावः, जलस्य शीतलता, वायोः स्पर्शवत्त्वं सर्वमेतत् केन चित्रितम्? न हि केनाप्यतः स्वाभाविकमेवैतत् सम्पन्नं सर्वम्।[5] एतेन ज्ञायते यत् जगतः निमित्तकारणत्वेन ईश्वराङ्गीकारः अनावश्यकः। अपि तु सर्वं कार्यं स्वभावत एव समुत्पद्यते।

पुनश्च जिज्ञासा उदेति यत् स्वभावाद्भवतीत्यस्य क आशयः? किं स्वयमेव स्वस्य कारणमिति, अथवा कारणं विनैवोत्पद्यते? अत्र प्रथमः पक्षो नैव युक्तः, यतः स्वयमेव कारणत्वे आत्माश्रयप्रसङ्गः। द्वितीयस्यापि पक्षस्य सम्भावना नास्ति यतो हि यदि निमित्तं विना कार्यं सञ्जायते तदा घटस्य समुत्पत्तिर्घटस्य विनाशश्चोभयमप्येकदैव स्याताम्, उभयस्यापि निमित्तनिरपेक्षत्वात्। परन्तु घटस्य समुत्पत्तिविनाशौ नैव युगपज्जायेतेऽतः स्वभावादुत्पद्यत इति सिद्धान्तो नैव युक्तियुक्तः। यतः निमित्तकारणं विना कार्योत्पत्तिर्न सम्भवति, त्वदुक्तस्यानिमित्तस्यापि निमित्तत्वसम्भवात्। तथा चोक्तम् - "अनिमित्तनिमित्तत्वाद् नाऽनिमित्ततः"।

---

[3] न्या.सू. ३/३/६३

[4] अचेतनस्य कारणस्य सचेतनाधिष्ठानेनैव कार्यजनकत्वात्। न्या०कु०प्र०स्त० हरिदासी, पृ० ६

[5] अग्निरुष्णः जलं शीतं शीतस्पर्शस्तथानिलः।
केनेदं चित्रितं तस्मात्स्वभावात्तद्व्यवस्थितिः॥ बु० च० ९/५०-५२

चार्वाकदर्शनस्य स्वभाववादं मनसि निधाय उदयनाचार्यो वक्ति - स्वाभाववादिना "अकस्माद् भवति" इति। इत्यस्य को अभिप्रायः? किम् "कस्माद् भवति" इत्यनेन हेतुनिषेधः क्रियते? उत उत्पत्तिः निषिध्यते? अथवा स्वातिरिक्तहेतुः निषिध्यते? अथवाऽलीकहेतुजन्यत्वं विधीयते? उत स्वभावजन्यत्वं विधीयते? अत्र नास्ति कस्यचिदपि पक्षस्य सम्भवः अवधेर्नियतत्वात्- कार्यस्य कादाचित्कत्वात्।[6]

अभिप्रायस्तु - यदि स्वभाववादिना हेतुर्निषिध्यते तर्हि न तत्सम्भवति यतो हि कारणनाशेनैव कार्यनाशः सञ्जायते। घटोत्पत्तेः कारणस्यैव प्रथमे पक्षे स्वीकारान्न कदापि घटस्य नाशः प्राप्तो भवति अतो घटादेः कादाचित्कत्वं नैव सम्भवति, कारणस्याभावेन कस्य नाशात् कार्यस्य घटादेः नाशो भवेत्। यदि च घटादिकार्याणां नाशार्थं कारणनाशस्यावश्यकता नास्तीत्युच्यते तदा घटोत्पत्तिघटविनाशावुभावपि निर्निमित्तौ स्याताम्। उभयोश्च निमित्तहीनत्वे घटादीनामुत्पत्तिनाशावेकदैव स्याताम्। यदि च स्वभाववादिना चार्वाकेणोत्पत्तिर्निषिध्यते तदाऽपि घटादीनां नियतावधिकत्वं न स्यात्, कादाचित्कत्वं न स्यात् अनुत्पन्नस्य भावस्य विनाशादर्शनात्। यदि स्वभाववादिना स्वातिरिक्तस्य हेतोर्निषेधः क्रियतेऽर्थात् स्वत एव स्वस्योत्पत्तिः स्वीक्रियते तदाऽपि कादाचित्कत्वं व्याहतं भवति, आत्माश्रयश्चापरो दोषः। अलीकहेतुजन्यत्वस्वीकारे स्वभावजन्यत्वस्वीकारे वा नियतावधिकत्वं कार्यस्य नैव सम्भवति। एषु त्रिष्वपि पक्षेषु वस्तुकारणीभूतस्य स्वस्य, अलीकपदार्थस्य, स्वभावस्य च नाशासम्भवात् नियतावधिकत्वं दुरुपपाद्यम्। अतः स्वभाववादस्याश्रयणं नैव कर्तुं शक्यते।

वस्तुतः चार्वाकीयस्वभाववादस्य नायमाशयो यत् कारणमेव कस्यचित् कार्यस्य नास्ति, न वोत्पत्तिनिषेध एव क्रियते। सांख्यानां प्रकृतिपरिणामवादेन साम्यमाधत्त एष स्वभाववादस्य सिद्धान्तः। हिरियन्नामहोदयः सांख्यदर्शनीयप्रकृतिपरिणामवादः स्वभाववादेन सदृशोऽपि सन् प्रयोजनेन प्रवर्तमानतया भिद्यत इति प्रतिपादयति।[7] षड्दर्शनसमुच्चयटीकायां गुणरत्नो यथा स्वभाववादसिद्धान्तं प्रतिपादयति। तेनैषा धारणा पुष्टतां प्राप्नोति। तत्र प्रतिपाद्यते- "स्वभाववादिनो ह्येवमाहुः। इह वस्तुनः स्वत एव परिणतिः स्वभावः। सर्वे भावाः स्वभाववशादुपजायन्ते। तथाहि- मृदः कुम्भो भवति न पटादिः। तन्तुभ्योऽपि पट उपजायते न घटादिः। एतच्च प्रतिनियतं भवनं न तथा स्वभावतामन्तरेण घटासंटङ्कमाटीकते। तस्मात् सकलमिदं स्वभावकृतमवसेयम्।"[8] अत्र या युक्तिः प्रदत्ता सैव युक्तिः "शक्तस्य शक्यकरणात्" इति पङ्क्त्या सांख्यदर्शनेऽपि प्रतिपाद्यते।[9] रीत्या चानया स्पष्टमेव प्रतीयते यदयं स्वभाववादः सांख्यदर्शनीयप्रकृति-परिणामवादेन साम्यं धारयति। येषां दृष्टान्तानां चार्वाकैः प्रदर्शनं क्रियते- किण्वादिभ्यो मदशक्तिः, ताम्बूलपूग-चूर्णानां योगाद्रागः। तत्र स्फुटमेतदेव प्रतीयते यदुपादानकारणस्य तु स्वीकारः चार्वाकैः क्रियत एव।

---

6 हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभाववर्णना नैवमवधेर्नियतत्वतः।। न्या० कु० प्र० स्त० का० ५

7 भा० द० की रूपरेखा, पृ० २७९

8 षड्दर्शनसमुच्चय गुणरत्न टीका पृ० १३

9 सां० का० ९

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

उपादानकारणादन्यस्य निमित्तकारणस्यैव स्वीकारो नैव क्रियते अत्र दृष्टान्तेषु किण्वादेः मदशक्तेरुपादानकारणत्वं स्फुटमवगम्यते एवं ताम्बूलपूगचूर्णानामप्युपादानकारणत्वं स्फुटमवगम्यते। सांख्यदर्शने प्रकृतिरेवोपादानकारणं यथा दुग्धमेव दधिरूपेण परिणमते तथैव प्रकृतिरेव "महत्" रूपेण परिणमते, महच्चाहङ्काररूपेण, अहङ्कारश्च पञ्चतन्मात्रेषु एकादशस्विन्द्रियेषु, पञ्चतन्मात्राणि च पञ्चमहाभूतेषु परिणमन्ते।[10] तथैव चार्वाकदर्शने पृथिव्यप्तेजोवाय्वाख्यानि चत्वारि तत्त्वान्येव परिणमन्ते चेतनावस्थां च प्राप्नुवन्ति। ताम्बूलपूगचूर्णानां योगाद्रागोत्पत्तिर्यथा स्वाभाविकी तथैव पृथिव्यप्तेजोवायुभ्यः चैतन्योत्पत्तिः सर्गोत्पत्तिश्च स्वाभाविकी। एषश्चार्वाकदर्शनीयः परिणामवाद एव स्वभाववादपदेन व्यपदिश्यते। सांख्यदर्शनीयपरिणामवादादत्र चार्वाकदर्शनीयपरिणामवादे (स्वभाववादे) अन्तरमेतावेदव यत् सांख्यदर्शने प्रकृतिः प्रयोजनमुद्दिश्य प्रवर्ततेऽत्र च भूतचतुष्टयात्मिका प्रकृतिः प्रयोजनमनुद्दिश्य प्रवर्तते। अपरञ्चान्तरमेतदस्ति यत् सांख्यदर्शने जडायाः प्रकृतेः सञ्जातः सर्गोऽपि जड एव भवति, चार्वाकदर्शनानुसारन्तु पृथिव्यप्तेजोवायुसमष्ट्यात्मिकायाः प्रकृतेः सञ्जातः सर्गो जडोऽपि भवति, चेतनोऽपि भवति। वस्तुतः चार्वाकदर्शने नास्ति काचिद्विभाजनरेखा यदिदं चेतनं यदिदमचेतनम्। सर्वमपि भूतजातमवस्थावशात् "जड" इत्युच्यतेऽवस्थावशाच्चेतन इति।

अत्र चार्वाकेन प्रष्टुं शक्यते यज्जडात् चेतनोत्पत्तिः कथं सम्भवति? परन्तु चार्वाकस्यात्र नास्ति काचिद्विप्रतिपत्तिः जड एव पदार्थः चेतनोऽपि सञ्जायते यथा हरितवर्णस्य ताम्बूलस्य, श्वेतवर्णस्य चूर्णस्य, कपिशवर्णस्य पूगस्य च कस्यचिदपि स्वात्मनि नास्ति रक्तता परन्तु समेषामेतेषां योगाद्रक्तताया उत्पत्तिर्भवति नास्त्यत्राश्चर्यं किञ्चित्, तथैव पृथिव्यादीनां चतुर्णां भूतानां योगाच्चैतन्यमपि जायते जडेप्यस्फुटं चैतन्यं विद्यत एवावस्थावशाच्च स्फुटीभवति।

"अकस्मादेव भवति" अस्यायमेवाभिप्रायोऽस्ति यत्किञ्चिन्निमित्तकारणमुपादानकारणातिरिक्तं न हि भवति किञ्चित् कार्यम् प्रति। केवलेनोपादानकारणेनैव निर्वाहसम्भवात् भूतचतुष्टयात्मिका प्रकृतिः सर्गस्योपादानकारणीभूता विद्यते चार्वाकदर्शनानुसारतः। तत्र नास्ति किञ्चिन्निमित्तकारणम्।[11] किमर्थं चैषा भूतचतुष्टयात्मिका प्रकृतिः सृजत्येतज्जगत्? अत्रोच्यते स्वभाव एवैष प्रकृतेः नहि विद्यते किञ्चित् प्रयोजनम् प्रकृतेरचेतनत्वात्। इदमेवोत्तरं प्रदीयते चार्वाकेण यत् पृथिव्यादीनि चत्वारि भूतानि स्वभावत एव सर्गं विदधति, प्रवृत्तिस्वभावकानि चत्वारि भूतानि। अतः पृथिव्यप्तेजोवायुभ्य एव भूतेभ्यः सर्गसम्भवे काऽऽवश्यकता कर्तुरीश्वरस्य? चित्रविचित्रस्वभावा भूतचतुष्टयात्मिका प्रकृतिरेव चित्रविचित्रस्वरूपात्मकं जगदिदं सृजति। अर्थात् पाषाणानाम् उपादानकारणं निमित्तकारणरहितमेव दृष्टमिति शरीरसर्गोऽपि निर्निमित्त एव। अत ईश्वरस्य अकारणत्वं सिद्धमेव।

---

[10] सां० का० २२

[11] अनिमित्ता शरीराद्युत्पत्तिः कस्मात्? कण्टकतैक्ष्ण्यादिदर्शनात्। कण्टकस्य तैक्ष्ण्यं पर्वतधातूनां चित्रता, ग्राव्णां श्लक्ष्णता, निर्निमित्तं च उपादानवच्च दृष्टं तथा शरीरादिसर्गोऽपीति। न्या० भा० सू० ४/१/२२

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

आक्षेपान्तरं दर्शयति चार्वाकः। परमेश्वरो जगतः कर्ता चेत् तदाऽस्य शरीरित्वमावश्यकं भवति। यतो हि लोके यस्य कार्यस्य कस्यचिदपि कर्ता समुपलभ्यते स सर्वोऽपि शरीरवानेवोपलभ्यते । नैयायिकः अशरीरिणमीश्वरं क्षित्यादिकर्तृतयाङ्गीकरोति। अत्र चार्वाको वक्तुं शक्नोति यत् यथाऽशरीरिणमीश्वरं भवान् क्षित्यादिकर्तृतया स्वीकुर्वन् दृष्टमतिक्रामति तथैवास्माभिरपि जडस्य कर्तृत्वं स्वीकर्तुं शक्यत उभयत्रापि दृष्टातिक्रमः सम एव। चार्वाकमते तु दृष्टातिक्रमोऽपि नास्ति चार्वाकसिद्धान्तानुसारेण। अपि चेतनस्य प्रवृत्तिः प्रयोजनानुसारिणी भवति। न हि न्यायाभिमतस्येश्वरस्य किञ्चित् प्रयोजनं सम्भवति सर्गे। स्वार्थं प्रवृत्तिरिति पक्षे परमेश्वरत्वं हास्यतीश्वरः। जीवानां स्वार्थमेव प्रवृत्तिर्भवति परमेश्वरोऽपि स्वार्थं प्रवर्तमानः जीवकोटावायाति। परार्थं प्रवर्तमानः कुतः दुःखबहुलमेतज्जगत् सृजति ? यदि च परमेश्वरस्य स्वभाव एव सर्जनं तर्हि किं कृतं भूतचतुष्टयात्मिकया प्रकृत्या? तयैवेदं जगत् सृज्यते, तस्या अपि जगत्सर्गः स्वभाव इति कथं नैव स्वीक्रियते। अतः जगत्कर्तृतया नैव परमेश्वरः सिद्ध्यतीति। जगतः कर्ता न ईश्वरः इति चार्वाकाणां सिद्धान्तः इति शम्।

## सहायकग्रन्थसूची


- गौतमः । (१९८५) । *न्यायदर्शनम्* । मुन्शिलाल प्रब्लिशार्स ।
- भट्टः, जयन्तः । (१९४८) । *न्यायकुसुमाञ्जलिः*। वीरराघवाचार्यः (सम्पा.) । तिरुपति ।
- भट्टः, जयन्तः । (१९३६) । *न्यायमञ्जरिः* । गुप्तः, जयकृष्णदासहरिदासः (प्रका.) । चौखम्बा संस्कृत सीरिज ।
- वात्सायनः । (१९९८)। *न्यायभाष्यम्* । शास्त्री, द्वारिकादासः (सम्पा.)। वाराणसी : बौद्धभारतीग्रन्थमाला।
- सायणमाधवाचार्यः । (१९८२) । *सर्वदर्शनसंग्रहः*। त्रम्बाकाचार्यः (सम्पा.) । पुना : भण्डार्कर-प्राच्य-संशोधनमन्दिरम् ।
- ईश्वरकृष्णः। (१९७०)। *साङ्ख्यकारिका* । त्रिपाठी, रमाशङ्करः (सम्पा.)। त्रिपाठी, बालकृष्णः (प्रका.)। वाराणसी ।
- (१९६३)। *भारतीय दर्शन की रूपरेखा* । सिन्हा, हरेन्द्रप्रसादः (सम्पा.)। मोतीलाल वाराणसीदास।
- (२०२३)। *नवचार्वाककारिकावली* । मिश्रः, सच्चिदानन्दः (सम्पा.) । दिल्ली : भारतीय दार्शनिक अनुसन्धान परिषद्।
- हरिभद्रसुरिः । (१९९७) । *षड्दर्शनसमुच्चयः* । जैनः, महेन्द्रकुमारः (सम्पा.)। भारतीय ज्ञानपीठ प्रकाशन।

# अनुमानविनिर्णये चार्वाकमतपर्यालोचनम्

**डॉ. दीपक-गराइः**
**सहायकाध्यापकः, संस्कृतविभागः, विजयनारायणमहाविद्यालयः**
**पश्चिमबङ्गः**

**प्रबन्धसारः**

*अवेदमूलकेषु दर्शनेषु चार्वाकदर्शनं प्राचीनतमम् । भारतीयदर्शनेषु चार्वाकदर्शनं व्यतीत्य प्रायः सर्वाण्येव दर्शनानि अनुमानं प्रमाणत्वेनाङ्गीकुर्वन्ति । किञ्च पाश्चात्त्यदार्शनिका अपि अनुमानप्रमाणमङ्गीकुर्वन्ति । न केवलं दार्शनिका अपि तु जडवैज्ञानिका अपि अनुमानप्रमाणस्य साहाय्यं विना नैव अग्रेसर्तुं शक्नुवन्ति । तेन प्रत्यक्षप्रमाणानन्तरमनुमानस्यैव स्थानं प्रचक्षते । किन्तु चार्वाका हि प्रत्यक्षैकप्रमाणवादिनः । अतस्तन्नये प्रत्यक्षमेकमेव प्रमाणम् । ते अनुमानप्रमाणं न स्वीकुर्वन्ति । तद्वादोऽयं यदिन्द्रियैरेव विश्वासार्हं ज्ञानमवाप्तुं शक्यम् । इन्द्रियजनितज्ञानमेव यथार्थज्ञानमस्ति । प्रत्यक्षं विहाय नेदं दर्शनं दर्शनान्तरमतान्यनुमानशब्दादीनि प्रमाणानि प्रमाणत्वेन मन्यते । पर्वतादौ पक्षे धूमदर्शनेन वह्नेः अनुमितिर्भवति तत्र पर्वतादिपक्षे वह्निः पूर्वतः विदित इति कथं ज्ञायते ? यतो हि धूमदर्शनानन्तरमेव वह्नेरनुमितिर्जायते । अतोऽत्र कथं सिद्धसाधनोद्भवः? अत्र तु चार्वाका एवं प्रत्यवतिष्ठन्ते- अनुमानं हि लिङ्गलिङ्गिपूर्वकं भवति । तच्च व्याप्तिज्ञानावलम्बि वर्तते । व्याप्तिश्चानौपाधिकसहचारनियमः, उपाधिश्च निश्चितसन्दिग्धभेदाद् द्विविधो मतः । साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः । यथा - वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम् । यत्र साधनाव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशायकत्वेन सन्दिग्धोपाधिः । अनुमाननिरसने चार्वाकानामन्या अभ्युक्तिः- प्रामाण्यविदः हेतुं साध्याव्यभिचारिरूपेण साधयितुं वदन्ति यत् यो हेतुः उपाधिरहितः ।[1] स साध्याव्यभिचारिहेतुः । अनौपाधिकत्वज्ञानं च न व्याप्तिज्ञाने हेतुः । अतः व्यापकत्वादिज्ञाने नान्योन्याश्रयः ।[2] तेन उपाधिनैव साध्यं व्यभिचारि न वेति निरूपितं भवतीति ।*

**कुञ्चीशब्दाः— अनुमानम्, प्रत्यक्षम्, व्याप्तिः, पक्षधर्मता, उपाधिः चेत्यादयः ।**

****************************************************************************

अवेदमूलकेषु दर्शनेषु चार्वाकदर्शनं प्राचीनतमम् । "अयं संसार एव आत्मनः क्रीडास्थलम् । नास्ति परलोकः । इदं शरीरमेव आत्मा । मरणमेव मुक्तिः । यावदस्मिन् देहे सन्ति प्राणास्तावत् सुखलाभाय प्रयत्नः कार्यः । न धर्मः पुरुषार्थः । मानवजीवने काम एव पुरुषार्थः" – इत्यादिकानां चार्वाकसिद्धान्तानां प्राचारोऽस्मिन् देशे चिरन्तनात् कालाद् दृष्टो भवति ।

चार्वाकनामा कश्चिद् बृहस्पतेः शिष्य आसीत् । स मतमिदं प्रचारयामास इत्येतस्मात् कारणात् ते चार्वाका इति कथ्यन्ते इत्येतदपि केषाञ्चन कथनमस्ति । 'चार्वी'नामकस्य कस्यचन आचार्यस्याप्युल्लेखः काशिकावृत्त्यामस्ति । तेनानुमीयते यदुक्ताचार्यसम्बन्धान्मतमपीदं चार्वाकमतमित्येतामाख्यां भेजे ।

[1] साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा यथा स उपाधिः ।, भाषापरिच्छेदः,कारिकासंख्या-१३८

[2] तत्त्वचिन्तामणिः

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

चार्वाकदर्शनं 'बार्हस्पत्यदर्शनम'पि कथ्यते। श्रूयते यद् बृहस्पतिर्नाम कश्चिदाचार्यश्चार्वाकमतं प्रवर्तयामास। अत एव मतमिदं बार्हस्पत्यमतमिति प्रसिद्धम्।

भारतीयदर्शनेषु चार्वाकदर्शनं व्यतीत्य प्रायः सर्वाण्येव दर्शनानि अनुमानं प्रमाणत्वेनाङ्गीकुर्वन्ति। किञ्च पाश्चात्त्यदार्शनिका अपि अनुमानप्रमाणमङ्गीकुर्वन्ति। न केवलं दार्शनिका अपि तु जडवैज्ञानिका अपि अनुमानप्रमाणस्य साहाय्यं विना नैव अग्रेसर्तुं शक्नुवन्ति। तेन प्रत्यक्षप्रमाणानन्तरमनुमानस्यैव स्थानं प्रचक्षते। किन्तु चार्वाका हि प्रत्यक्षैकप्रमाणवादिनः। अतस्तन्नये प्रत्यक्षमेकमेव प्रमाणम्। ते अनुमानप्रमाणं न स्वीकुर्वन्ति। तद्वादोऽयं यदिन्द्रियैरेव विश्वासार्हं ज्ञानमवाप्तुं शक्यम्। इन्द्रियजनितज्ञानमेव यथार्थज्ञानमस्ति। प्रत्यक्षं विहाय नेदं दर्शनं दर्शनान्तरमतान्यनुमानशब्दादीनि प्रमाणानि प्रमाणत्वेन मन्यते। किञ्च, प्रमाणं वस्तुनियामकं भवतीति प्रमाणस्वभाव एव। एवं विश्लिष्य दृश्यते यद् अनुमानं कदापि वस्तुनियामकं न भवति। यतोऽनुमानेन वस्तुनः यन्निर्धारणं भवति तद्धि निर्धारितवस्तुनः सामान्यस्वरूपस्य निर्धारणमुत विशेषस्वरूपस्य निर्धारणमात्रमेव – एतदेव विचार्यविषयो भवति। वस्तुस्वरूपम् अनुमानेन निर्धारितं भवतीति सामान्यराद्धान्ते स्वीकृते तु तन्निर्धारणं कस्यापि प्रयोजनस्य साधकं न भवति। कारणं हि तन्निर्धारणस्य विषयीभूतः वह्निः पूर्वतः ज्ञात एव, तेनानुमानेन वह्निज्ञाने किं प्रयोजनं स्यात् ? अपि च, कृते तु अनुमाने सिद्धसाधनदोषः दुर्निवारः स्यात्। अत्रायं प्रश्नः समुदेति यत् यत्र पर्वतादौ पक्षे धूमदर्शनेन वह्नेः अनुमितिर्भवति तत्र पर्वतादिपक्षे वह्निः पूर्वतः विदित इति कथं ज्ञायते? यतो हि धूमदर्शनानन्तरमेव वह्नेरनुमितिर्जायते। अतोऽत्र कथं सिद्धसाधनोद्भवः? अत्र तु चार्वाका एवं प्रत्यवतिष्ठन्ते– अनुमानं हि लिङ्गलिङ्गिपूर्वकं भवति। तच्च व्याप्तिज्ञानावलम्बि वर्तते। व्याप्तिश्चानौपाधिकसहचार-नियमः, उपाधिश्च निश्चितसन्दिग्धभेदाद् द्विविधो मतः। साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः। यथा – वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम्। यत्र साधनाव्यापकत्व-सन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशायकत्वेन सन्दिग्धोपाधिः। यथा – मित्रातनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणामजन्यत्वम् इति। अतो निश्चितसन्दिग्धरूपद्विविधोपाधिरहितसहचारसम्बन्धो व्याप्तिरिति। व्याप्तिसूचकवाक्यस्य सत्यता न प्रमाणसिद्धा अतो नानुमानमपि स्वीकरणार्हम्। यत्र यत्र धूमस्तत्र तत्राग्निः, पर्वतोऽयं धूमवान् तस्मादत्र पर्वतेऽग्निरवश्यमेवास्तीत्येतां व्याप्तिमवलम्ब्य पर्वतस्याग्निमत्त्वं, यत् प्रमाणीक्रियतेऽनुमानेन येन, तदनुमानं तदा स्वीकर्तुं शक्यं यदा व्याप्तिसूचकवाक्यस्य सत्यता प्रमाणसिद्धा स्यात्। प्रत्यक्षानुमानोपामानशब्दादिप्रमाणैर्व्याप्तिर्न सिद्धेति चार्वाकाणामभिप्रायः। यानि यानि स्थानानि धूमाग्निमन्ति सन्ति किं तेषां सर्वेषामपि स्थानानां निरीक्षणं सम्भवं कदापि? प्रत्यक्षस्य सीमितत्वात् वर्तमानकालवर्तिनामेव धूमाग्निविशिष्टानां स्थानानां प्रेक्षणमपि सिद्धीभवितुं न शक्यं कुतः पुनर्भूतभाविस्थलानामीक्षणञ्च। तदुक्तं माधवाचार्येण सर्वदर्शनसंग्रहे -' **व्याप्तिपक्षधर्मताशालि हि लिङ्गं गमकम् अभ्युपगतमनुमानप्रामाण्यवादिभिः। व्याप्तिश्च उभयविधोपाधिविधुरः सम्बन्धः। स च सत्तया चक्षुरादिवन्नाङ्गभावं भजते किन्तु ज्ञाततया। कः खलु**

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**ज्ञानोपायो भवेत् ? न तावत्प्रत्यक्षम् । तच्च बाह्यमान्तरं वाऽभिमतम् । न प्रथमः । तस्य सम्प्रयुक्तज्ञानजनकत्वेन भवति प्रसरसम्भवेऽपि भूतभविष्यतोस्तदसम्भवेन सर्वोपसंहारवत्याः व्याप्तेर्दुर्ज्ञानत्वात् ।'**[3] इति ।

अनुमाननिरसने चार्वाकानामन्या अभ्युक्तिः- प्रामाण्यविदः हेतुं साध्याव्यभिचारिरूपेण साधयितुं वदन्ति यत् यो हेतुः उपाधिरहितः ।[4] स साध्याव्यभिचारिहेतुः । अनौपाधिकत्वज्ञानं च न व्याप्तिज्ञाने हेतुः । अतः व्यापकत्वादिज्ञाने नान्योन्याश्रयः ।[5] तेन उपाधिनैव साध्यं व्यभिचारि न वेति निरूपितं भवतीति ।

तेनात्र स्पष्टं यत् यः साध्यव्यापकस्तथा हेतोरव्यापकः स उपाधिरिति । तदुपाधिसत्त्वे हेतुः साध्यस्य व्यभिचारिरूपेण निरूपितो भवतीति अनुमानप्रामाण्यवादिनां राद्धान्तः । उपाधिश्च द्विविधो मतः – सन्दिग्धो निश्चितश्चेति । तेन उपाधौ संशयो जायते चेत् तत्र हेतुः साध्यनिर्णायको न भवतीति ।

अत्र चार्वाकास्तु एवं प्रत्यवतिष्ठन्ते यत् उपाधिरस्ति न वेति निश्चयोपायो नास्ति, यतो हि अनुमानप्रामाण्यवादिनां नये प्रत्यक्षे अविषयीभूतवस्तु एव नास्तीति तु न स्वीकुर्वन्ति । तेन तेषां नये प्रत्यक्षायोग्यपदार्थस्य विद्यमानत्वात् अतीन्द्रियोपाधेरपि सम्भावना स्यादेव । अप्रत्यक्षोऽपि तदभावोऽस्तीति स्वीकाराद् अनुमानप्रामाण्यमेव तन्मते असिद्धं स्यात् । अतः उपाधिनिरसनपूर्वकहेतौ व्याप्तिनिश्चयसम्भावनाया असत्त्वात् कस्मिन्नपि स्थलविशेषे अनुमानं न भवतीति । यदि तेऽनुमानप्रामाण्यविदः अनुमानेनैव हेतुमेव साध्याव्यभिचारिरूपेण निरूपयितुमुद्यता भवन्ति तर्हि तत्रापि प्रश्नः स्यात् – यदनुमानेन ते हेतुं यथार्थहेतुरूपेण निरूपयिष्यन्ति, पुनः तेनैव हेतुना प्रकृतसाध्यम् अनुमातुम् अभिलाषिणः भविष्यन्ति, तत्र च स्थले तदनुमानं कथं सम्भवेत् ? यतो हि तदनुमानेऽपि हेतोरुपाधेरभावनिश्चयोऽपि आवश्यकः । परं तत्र तत्सम्भवे नास्त्युपायः । अतः प्रत्यक्षेण उपाधेरभावनिश्चयो न निर्धारणीयः, पुनः अनुमानेनापि तन्निर्धारणे सम्भावना नास्ति । अन्यानि प्रमाणानि तु अनुमानसापेक्षाणि इति कृत्वा तत्प्रसङ्गोऽपि नास्ति । तेन च अनुमानमपि कस्मिन्नपि स्थलविशेषे न सम्भवेत् । अत्र निष्कृष्टार्थस्तु , कुत्रचिद् अपि स्थले यदपि साध्यम् अनुमातुं तत्राभिमतहेतौ साध्यस्य व्यभिचारः संशयश्च अनिवार्य एव । अत्र दृष्टान्तरूपेण वह्निधूमयोरनुमानमुल्लिख्यते । तत्स्थले धूमेन हेतुना वा वह्निरूपसाध्यस्य अनुमानमेव प्रतिवादिनामभिमतम् । किन्तु धूमोऽस्ति इति कृत्वा वह्निरपि अवश्यं स्यादिति धूमवह्न्योः नियतसम्बन्धो वर्तते इति निश्चयः कथं स्यात् ? अनन्तकाले तथा अखिलविश्वे नियतस्यास्य व्यभिचारो न स्यात् इति कथं वक्तुं शक्यते ? किञ्च सर्वकाले तथा सम्पूर्णविश्वे केनापि तत्प्रत्यक्षीकृतं वा ? अपि च, तादृशानुसन्धानमपि अशक्यमेव । अत एव धूमे वह्नेः व्यभिचारसन्देहसम्बन्धः न कदापि परिवर्जनीयः । अतः धूमेन वह्नेरनुमानमपि न कर्तव्यम् । एवं रीत्या चिन्त्यते चेत् सर्वत्रैव अनुमानप्रामाण्यं निराकृतं स्यादिति चार्वाकाः ।

---

[3] सर्वदर्शनसंग्रहः-पृष्ठा-९-११

[4] साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा यथा स उपाधिः ।,भा.परि.का-१३८

[5] तत्त्वचिन्तामणिः

किञ्च, अनुमानं लोकव्यवहारसाधकमित्येतदपि न चार्वाकाः सहन्ते। तेषां कथनमेतद् यल्लोकव्यवहारप्रयोजनेनापि न तदपेक्ष्यते। सम्भावनयैव तद्गतार्थत्वात्। सम्भावनया संसारस्य सर्वेऽपि व्यवहाराश्चलितुं शक्नुवन्ति। सम्भावनावशादेव मानवस्तत् तत् कर्मणि प्रवर्तते। सम्भावनैव तं जीविकादिनिमित्तेनोद्योगे प्रवर्तयति। सम्भावनैव संसारमिमं वर्तमानं तस्मिंस्तस्मिन् वैज्ञानिकानुसन्धाने नियोजयन्ती दृग्गोचरीभवति। अतः सम्भावनया कार्यं लोकस्य चलितुमर्हति , नानुमानपेक्ष्यते।

**चार्वाकमतखण्डनम्**

परन्तु चार्वाकानां मतमिदं प्रायेण सर्वैरेव दार्शनिकैः तिरोहितम्। विविधाकाट्ययुक्तिभिस्तन्मतं खण्डितम्। तत्र बौद्धानां युक्तिस्तावत् – **"यदि कश्चित् प्रामाण्यमनुमानस्य नाङ्गीकुर्यात्तं प्रति ब्रूयात् – अनुमानं प्रमाणं न भवतीत्येतावन्मात्रमुच्यते तत्र न किञ्चन साधनमुपन्यस्यते उपन्यस्यते वा ? न प्रथमः। अशिरस्कवचनस्योपन्यासे साध्यासिद्धेः। 'एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेत्' इति न्यायात्। नापि चरमः। अनुमानं प्रमाणं न भवतीति ब्रुवाणेन वचनप्रमाणमनभ्युपगच्छता त्वया स्वपरकीयशास्त्रे प्रामाण्येनोपगृहीतस्य वचनस्योपन्यासे मम माता वन्ध्येतिवद्व्याघातापातात्"**[6] इति। अत्रायमाशयः – पर्वतो वह्निमानित्येतावन्मात्रं धूमवत्त्वादित्यादिवाक्य-रहितं यदुच्यते तदशिरस्कम्। पर्वतो वह्निमानित्युक्ते कुत इत्याकाङ्क्षायां तन्निर्वर्तकं यद्धूमत्त्वादित्यादिवाक्यं तदाकाङ्क्षाशामकत्वाच्छिरोभूतमिव भवति। साधनोपन्यासपक्षे च तदेव वचनं प्रमाणत्वेन उपन्यस्तमित्यङ्गीकर्तव्यम्। वचनं प्रमाणं च शाब्दं प्रमाणम्। त्वया तु प्रत्यक्षमेकमेव प्रमाणं नानुमानादिकमिति ब्रुवता शाब्दमपि न प्रमाणत्वेन स्वीक्रियते तद्विरुद्धं च वचनं प्रमाणमुपन्यस्यत इति व्याघातः। यथा माता बन्ध्येत्युक्ते माता चेन्न बन्ध्या, बन्ध्या चेन्न माता। मातृत्वबन्ध्यात्वयोर्विरोधात्। तथा अनुमानादिकं प्रमाणं न भवति इत्युक्ते अनुमानादिकं प्रमाणं न भवति चेदेतद्वचनमपि न प्रमाणं स्यात्। वचनं प्रमाणं चेदनुमानादिकं प्रमाणं स्यादिति।

अत एव सांख्यैरपि चार्वाकानां मतमिदं खण्डयद्भिरुक्तं -**'नाऽनुमानं प्रमाणमिति वदता लौकायतिकेनाऽप्रतिपन्नः सन्दिग्धो विपर्यस्तो वा पुरुषः कथं प्रतिपद्येत? न च पुरुषान्तरगता अज्ञानसन्देहविपर्ययाः शक्या अर्वाग्दृशा प्रत्यक्षेण प्रतिपत्तुम्। नापि प्रमाणान्तरेण, अनभ्युपगमात्। अनवधृताऽज्ञानसंशयविपर्यासस्तु यं कञ्चन पुरुषं प्रति वर्तमानोऽनवधेयवचनतया प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत। तदनेनाऽज्ञानादयः परपुरुषवर्तिनोऽभिप्रायभेदाद् वचनभेदाद् लिङ्गादनुमातव्याः, इत्यकामेनाप्यनुमानं प्रमाणमभ्युपेयम्।'**[7] इति।

अत्रायमाशयः- आचार्यवाचस्पतिमिश्रेण तत्प्रसिद्धसांख्यतत्त्वकौमुद्याम् अनुमानप्रामाण्यम् आलोचयता चार्वाकान् प्रति उपहासः कृतो विविधयुक्तिभिश्च तेषां मतानि खण्डितानि। तेनोक्तं यद् ये तु अनुमानप्रामाण्यं नाङ्गीकुर्वन्ति ते हि कथं मिथो वाचा प्रलपन्ति? यतो हि अपरं किमपि बोधयितुं जिज्ञासोः मनोगताभिप्रायम् अवगत्यैव तस्मै उत्तरं प्रदातव्यम्। येन सह वार्तालापः प्रचलति, स श्रोता वक्तुः वाक्यं श्रुत्वा यदि प्रकृतार्थं न गृह्णाति अथवा तत्सम्बन्धे यदि तन्मनसि कश्चित् सन्देहो जायते अथवा विपरीतार्थं गृह्णाति, तथा सति वक्ता तेन श्रोत्रा

---

[6] सर्वदर्शनसंग्रहः, पृष्ठा- २८-२९

[7] सांख्यतत्त्वकौमुदीयकारिका-५ व्याख्याप्रसङ्गे,पृष्ठा-६४

सह प्रकृतविषये आलोचना कर्तुमेव न शक्यते। अतः श्रोतुः वाक्यात् तन्मनसः भावं स्पष्टतया अवगत्य वक्ता स्वाभिव्यक्तिं प्रकाशयति – इति स्वाभाविकनियमः। तस्मिन् स्थले श्रोतुः वाक्यं श्रुत्वैव वक्ता तन्मनोभावमनुमिनोति इति अवश्यमेव स्वीकार्यम्। किन्तु चार्वाकानां नये प्रत्यक्षातिरिक्तप्रमाणस्याविद्यमानत्वात् श्रोतुः मनोगताभिप्रायं निर्धारयितुमशक्यं स्यात्। अत एव यतो हि चार्वाकाः अपरं बोधयितुं प्रवृत्ताः तस्मात् अवश्यमेव स्वीकरणीयं यत् ते श्रोतुः मनोगताभिप्रायमुपलब्धवन्तः, पुनश्च श्रोताऽपि तेषामभिप्रायमवगमिष्यतीति विश्वासोऽपि चार्वाकानामस्ति। अत्र स्थले मिथो मनोगतभावस्य अवगतिः अनुमानव्यतिरेकेण न सम्भवत्येव। अतः अनिच्छन्तोऽपि चार्वाका अनुमानस्य प्रामाण्यमुररीकुर्वन्ति एव।

किञ्च, चार्वाकाः अनुमानप्रामाण्यं निराकुर्वन्तः निश्चयेन स्वानुकूलं युक्तिं प्रदर्शितवन्तः। विचारे तु युक्त्या वाक्यप्रयोगो न क्रियते चेत् स्वमतस्थापनं परमतखण्डनञ्च न भवति। अतः प्रतिवादिना सह विचारे प्रवृत्ताः सन्तः चार्वाकाः निश्चयेन वाक्यप्रयोगं करिष्यन्ति, तद्धि एवं भूयात् यत् 'अनुमानं न प्रमाणम्, अनुमानग्राहकव्याप्तिज्ञानासम्भवात्' इति। स्थलेऽस्मिन् सूक्ष्मतया चिन्त्यते चेत् ज्ञायते यत् चार्वाकैरपि अज्ञातानुसारम् अनुमानप्रामाण्यं स्वीकृतं, यतो हि 'अनुमानं न प्रमाणम्' इति कथने तु प्रतिवादिनः न निरस्ताः स्युः, अतस्तदनुकूले युक्तयोऽपि प्रदर्शनीया भवन्ति। अत्र स्थले तु चार्वाकप्रदर्शितयुक्तयः अनुमानाप्रामाण्यसाधन-सहायका इति चार्वाकैरपि स्वीक्रियते। काऽपि युक्तिर्यदि न प्रदर्शिता भवति तर्हि स्वाभिप्रेतसाध्यसिद्धिरपि न भवति, अपि चानुमानप्रामाण्यं खण्डयन्तः चार्वाकाः तत्प्रामाण्यखण्डनरूपसाध्यसिद्ध्यर्थं यद्धेतुं प्रदर्शयिष्यन्ति, तत्किमनुमानं न? अत्र कारणं हि चार्वाका एतदेव वदन्ति यत् 'अनुमानं न प्रमाणम्' इति। अत एवात्र प्रामाण्यं हि साध्यं, तदनुकूले यत्कथयिष्यन्ति तदेव हेतुरूपेण उपन्यस्तं स्यात्। कस्मिन्नपि स्थले अनुमानप्रामाण्यं नास्तीति कथयितुं तु चार्वाकाः अनुमानमाश्रित्यैव वदिष्यन्ति। तेन चार्वाकमतमिदं 'मम माता बन्ध्या' इतिवत् व्याघातदोषदुष्टं स्यात्।

एवं चार्वाका हि अनुमानविषये स्वाभिमतं प्रदर्शयन्ति। तेषाञ्चाभिमतं स्वस्वाकाट्ययुक्तिभिः प्रायः सर्वैरेव दार्शनिकैः खण्डयद्भिरनुमानप्रामाण्यं प्रतिष्ठापितम्।

## सहायकग्रन्थसूची


- अन्नंभट्टः। (१४१०)। *तर्कसंग्रहः* । गोस्वामी नारायणचन्द्रः (सम्पा०)। कोलकाता : संस्कृत पुस्तक भाण्डार ।
- कणादः। (१३१३ वङ्गाब्दः)। *वैशेषिकदर्शनम्* (श्रीपञ्चाननभट्टाचार्यकृतपरिष्कारटीकाश्रीशाङ्कर-मिश्रकृतोपस्कारटीकोपेतम्)। श्रीपञ्चानन-भट्टाचार्यः (सम्पा०)। कोलकाता : वङ्गवासी इलेक्ट्रोमेसिन प्रेस।
- गौतमः। (१९८४)। *न्यायसूत्रम्* (वात्स्यायनभाष्यसहितम्, उद्योतकरवार्तिक-सहितम्)। महामहोपाध्यायगङ्गानाथझा (सम्पा०)। दिल्ली : मोतीलालवनारसीदासः।
- गौतमः। (१९८५)। *न्यायदर्शनम्* (वात्स्यायनभाष्यसहितम्, उद्योतकरवार्तिक-

सहितम्, विश्वनाथवृत्तिसहितञ्च)। तारानाथ-न्यायतर्कतीर्थः, अमरेन्द्रमोहनतर्कतीर्थः (सम्पा०)। नवदेहली : मुन्सीराममनोहरलाल-पाब्लिशार्स् प्राइभेट्।

- विश्वनाथन्यायपञ्चाननः। (१९५१)। *कारिकावली* (मुक्तावली-दिनकरी-रामरुद्री-समेता)। हरिरामशुक्लः (सम्पा०)। बनारस : चौखम्बा संस्कृत सीरिज आफिस।
- जयन्तभट्टः। (१९८२)। *न्यायमञ्जरी* (खण्डः१-३)। शास्त्री, गौरीनाथः (सम्पा०)। वाराणसी : संपूर्णानन्दसंस्कृतविश्वविद्यालयः।
- एन.एस., रामानुजताताचार्यः। (२००५)। *शाब्दबोधमीमांसा* (१-४)। नवदेहली : इन्स्टिटट्युट् फ्रेञ्च डि पाण्डिचेरी।
- माधवाचार्यः। (१४१५ वङ्गाव्दः)। *चार्वाकदर्शनम्*। भट्टाचार्यः, अमितः (सम्पा०)। कोलकाता : संस्कृत-पुस्तक-भाण्डारम्।
- माधवाचार्यः। (१९९८)। *सर्वदर्शनसंग्रहः* (प्रकाश-हिन्दीभाष्योपेतः)। शर्मा, उमाशंकरः (सम्पा.)। वाराणसी : चौखम्बा विद्याभवन।
- माधवाचार्यः। (१३९४ वङ्गाब्दः)। *चार्वाकदर्शनम्*। भट्टाचार्यः, पञ्चाननः (सम्पा०)। कोलकाता : संस्कृत-पुस्तकभण्डारम्।
- फणिभूषणतर्कवागीशः। (२०१४)। *न्यायदर्शन* (प्रथमखण्डः)। कोलकाता : पश्चिमवङ्ग-राज्य-पुस्कत-पर्षत्।
- विश्वनाथन्यायपञ्चाननः। (१३६९)। *भाषापरिच्छेदः*। पञ्चानन-भट्टाचार्यः (सम्पा०)। कलिकाता : संस्कृत-पुस्तक-भाण्डारम्।
- भट्टाचार्यः, सुखमयः। (२००६)। *पूर्वमीमांसा दर्शन*। कोलकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्।
- भट्टाचार्यः, विश्वबन्धुः। (१९९३)। *अनुमान चिन्तामणि*। कोलकाता : यादवपुरविश्व-विद्यालयः।
- *धितालः, विश्वनाथः*। (२०११)। *तर्कसंग्रहसर्वस्वम्*। वाराणसी : श्रीदक्षिणामूर्ति-मठ-प्रकाशन।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# धनेश्वरभट्टदिशा अपशब्दविचारः

**डॉ. सुमन्तचौधुरी**
**सहायकाध्यापकः, संस्कृतविभागः, सबं-सजनीकान्तमहाविद्यालयः**
**पश्चिमबङ्गः**

**प्रबन्धसारः**

*शब्दानां साधुत्वप्रतिपादनमेव व्याकरणशास्त्रस्य मुख्यं प्रयोजनम्। पुण्यजनकतावच्छेदकधर्मवत्त्वं साधुत्वम्। तद्रहितत्वम् असाधुत्वम्। लोके साधुशब्दाद्यथा अर्थप्रतीतिर्भवति तथैव असाधुशब्दादपि। विषयेऽस्मिन् वर्तते नैयायिकेषु मीमांसकेषु वैयाकरणेषु च परस्परं विप्रतिपत्तिः। अपभ्रंशशब्देषु शक्तिर्नास्तीति नैयायिका मीमांसकाश्च। वैयाकरणानां नये यथा साधुशब्देषु शक्तिरस्ति तथैव अपभ्रंशेष्वपि। एतस्य साधनाय ते "समानायामर्थावगतौ शब्देनापशब्देन च शास्त्रेण धर्मनियमः" इति महाभाष्यस्थं वाक्यमेव प्रमाणत्वेन स्वीकुर्वन्ति। वैयाकरणानां नये शक्तत्वं साधुत्वञ्च भिन्नमेव। शक्तिविशिष्टत्वं शक्तत्वम्। तच्च यथा गवादिसाधुशब्देषु वर्तते तथैव गाव्याद्यसाधुष्वपि। परन्तु साधुत्वं केवलं गवादिसाधुशब्देष्वेव तिष्ठति, न तु अपभ्रंशेषु। अस्मिन् प्रबन्धे अपभ्रंशविषये धनेश्वरभट्टस्य मतम् अपशब्दखण्डनम् इति ग्रन्थाधारेण प्रस्तूयते।*

**कुञ्चीशब्दाः – अपभ्रंशः, साधुशब्दः, व्याकरणं, अपशब्दखण्डनम्, धनेश्वरभट्टः, धर्मः, साधुत्वं चेत्यादयः।**

*************************************************************************

धनेश्वरभट्टविरचितः अपशब्दखण्डनम् इति ग्रन्थः कलिकातास्थ-एसियाटिक्-सोसाइटि-मातृकालये उपलब्धः। ग्रन्थस्यास्य पुष्पिकायाम् "इति भट्टधनेश्वरोक्तमपशब्दखण्डनम्" इति लिखितमस्ति। धनेश्वरभट्टस्य विषये बहु किमपि तथ्यं नावाप्यते। तथापि NCC ग्रन्थे लिखितमस्ति अयं विद्वान् कौशिकगोत्रियः इति। धनेश्वरभट्टः ग्रन्थस्यास्य रचयिता चतुर्दशशतकस्यान्तिमे पञ्चदशशतकस्य प्रथमे भागे आसीदिति वक्तुं शक्यते। किञ्च, अयं प्रायः मेवाडदेशस्थस्य लाखानृपतेः सभापण्डित आसीदिति अनुमातुं शक्यते।

महाभाष्यकृता पतञ्जलिना पस्पशाह्निके शब्दस्य स्वरूपं प्रतिपादयता "अथ शब्दानुशासनम्" इति प्रतिज्ञावाक्यम् उपन्यस्तम्। "व्युत्पाद्य संस्क्रियन्ते प्रकृतिप्रत्ययविभागवत्तया बोध्यन्ते इति शब्दानुशासनम्। तथा च शब्दानुशासनापरनामधेयं व्याकरणशास्त्रमारब्धं वेदितव्यमिति वाक्यार्थः सम्पद्यते।"[1] इति सर्वदर्शनसंग्रहे माधवाचार्यः कथयति। व्याक्रियन्ते विविच्यन्ते साध्वसाधुशब्देभ्यः साधुशब्दा येनेति विग्रहे विपूर्वकादाङ्पूर्वकात् कृधातोः "करणाधिकरणयोश्च" (अष्टा० ३।३।११७) इति सूत्रेण करणे ल्युटि व्याकरणमिति शब्दो निष्पद्यते। अर्थात् शब्दसाधुत्वप्रतिपादनमेव व्याकरणशास्त्रस्य मुख्यं प्रयोजनम्।

"साधुत्वं नाम व्याकरणान्वाख्येयत्वं, पुण्यजनकतावच्छेदकधर्मवत्त्वं वा। तद्भिन्नत्वमसाधुत्वमि"[2]ति परमलघुमञ्जूषायां नागेशभट्टाः। लोके साधुशब्दाद्यथा अर्थप्रतीतिर्भवति तथैव असाधुशब्दादपि। विषयेऽस्मिन् वर्तते नैयायिकेषु मीमांसकेषु वैयाकरणेषु च परस्परं विप्रतिपत्तिः।

---

[1] उमाशङ्करशर्मा-ऋषिसम्पादिते सर्वदर्शनसंग्रहे पाणिनिदर्शनम्, पृष्ठम् – ४९०, ४९५

[2] बोधकुमारझासम्पादितायां परमलघुमञ्जूषायां शक्तिनिरूपणम्, पृष्ठम् - २३३

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

नैयायिकानां नये अपभ्रंशेषु शक्तिर्नास्ति। तेषां मते शक्तत्वमेव साधुत्वम्। यद्यपि अपभ्रंशेषु शक्तिग्राहकशिरोमणिः व्यवहारो वर्तते तथापि न दोषः। यतो हि व्युत्पन्नानाम् अपभ्रंशेषु साधुशब्दस्मरणाद्बोधः, अव्युत्पन्नानां च शक्तिभ्रमाद्बोध इति। वाक्यपदीयस्य ब्रह्मकाण्डे भर्तृहरिणापि उच्यते–

**"ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ॥"**[3] इति।

मीमांसकानां मतेऽपि अपभ्रंशेषु शक्तिर्नास्ति। तेषु शक्यङ्गीकारे अपभ्रंशानामपि साधुत्वं स्वीकर्तव्यम्। शक्तत्वं साधुत्वमिति साधुपदप्रयुक्त्यधिकरणे तैरेतत्स्पष्टं प्रतिपादितम्। एतत्साधनाय ते आर्यम्लेच्छाधिकरणस्थविचारमपि प्रमाणत्वेन प्रदर्शयन्ति। तथाहि यद्यपि आर्या यवशब्दं दीर्घशूके प्रयुञ्जते, म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते, तमेव च बुध्यन्ते तथाप्यार्यप्रसिद्धेर्बलवत्त्वात् वेदे दीर्घशूकस्यैव ग्रहणमिति आर्यम्लेच्छाधिकरणे मीमांसकैः सिद्धान्तितम्। अपभ्रंशेषु अपि शक्तिस्वीकारे "यवैर्जुहोति" इति वेदवाक्यस्थयवशब्देन प्रियङ्गूणामपि ग्रहणं स्यात्, शक्तत्वं साधुत्वमिति तेषामभिमतत्वात्। अतः अपभ्रंशेषु नास्त्येव शक्तिरिति मीमांसकसिद्धान्तः।

एवम् अपभ्रंशशब्देषु शक्तिर्नास्तीति नैयायिका मीमांसकाश्च। वैयाकरणानां नये यथा साधुशब्देषु शक्तिरस्ति तथैव अपभ्रंशेष्वपि। एतस्य साधनाय ते "समानायामर्थावगतौ शब्देनापशब्देन च शास्त्रेण धर्मनियमः" इति महाभाष्यस्थं वाक्यमेव प्रमाणत्वेन स्वीकुर्वन्ति। वैयाकरणानां नये शक्तत्वं साधुत्वञ्च भिन्नमेव। शक्तिविशिष्टत्वं शक्तत्वम्। तच्च यथा गवादिसाधुशब्देषु वर्तते तथैव गाव्याद्यसाधुष्वपि। परन्तु साधुत्वं केवलं गवादिसाधुशब्देष्वेव तिष्ठति, न तु अपभ्रंशेषु। साधुत्वं नाम व्याकरणव्यङ्ग्यः अर्थविशिष्टः शब्दनिष्ठपुण्यजनकतावच्छेदको जातिविशेषः।

किञ्च, अपभ्रंशेषु शक्त्यभावेऽपि तादृशशब्दोच्चारणात् परं साधुशब्दस्मरणं जायते। तेन साधुशब्देन बोधो भवतीति नैयायिकानां मीमांसकानाञ्च यदभिमतं तदयुक्तम्। साधुशब्दस्मरणं विनापि व्युत्पन्नानामसाधुशब्दश्रवणमात्रेण अर्थबोधदर्शनात्। अपभ्रंशेषु शक्तिभ्रमाद् बोध इत्यप्यनुपपन्नम्। यतो हि स्त्रीशूद्रबालानां साधुशब्दोच्चारणेऽप्यर्थसंशये जाते तत्रापभ्रंशेनैवार्थनिर्णयो भवति। अपभ्रंशेषु शक्तिस्वीकारादेव "यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः। ते तत्रभवन्तो यद्वा नः तद्वा नः इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे कर्मणि पुनर्नापभाषन्ते। तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितं, ततस्ते पराभूताः।"[4] इति पस्पशाह्निकस्थभाष्यं सङ्गतं भवति। अस्य तात्पर्यं तावत् दर्शनान्तरीयरीत्या यद्यप्यपभ्रंशेषु शक्तिर्नाङ्गीक्रियते तर्हि महाभाष्यकारेणापि यद्वा नः तद्वा नः इत्येव वक्तव्यमासीत्, न तु यर्वाणस्तर्वाणः। परन्तु तयोः सामानाधिकरण्येन बभूवुः इति क्रियापदप्रयोगः भाष्यकारेण यः कृतः सः अपभ्रंशेषु शक्तिस्वीकारे एव सङ्गच्छते। अतः अपभ्रंशेषु शक्तिभ्रमाद्बोध इति नैव वक्तव्यम्।

अत एव उच्यते भाष्यकारैः "समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते

[3] वाक्यपदीयं ब्रह्मकाण्डम्, श्लोकः - १४९

[4] जयशङ्करलालत्रिपाठिसम्पादिते व्याकरणमहाभाष्ये पस्पशाह्निकम्, पृष्ठम् -११८

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

शब्देनैवार्थोऽभिधेयो नापशब्देनेति। एवं क्रियमाणमभ्युदयकारि भवतीति"[5] इति। हरिरपि कथयति-

**शिष्टेभ्य आगमात्सिद्धाः साधवो धर्मसाधनम्।**
**अर्थप्रत्ययनाभेदे विपरीतास्त्वसाधवः ॥**[6] इति।

अर्थात् व्याकरणरीत्या येषां शब्दानां प्रकृतिप्रत्ययादिविभाजनं सम्भवति येषां वा साधुत्वेन व्युत्पाद्यत्वम् अस्ति ते तेषामेव साधुत्वम्। तेषामेव च व्यवहारे पुण्यजनकता। इतरेषां तु असाधुत्वम्।

व्याकरणशास्त्रस्य शब्दापशब्दविवेकमात्रं न प्रयोजनं किन्तु वेदाङ्गत्वात् वेदविहितकर्मानुष्ठानद्वारा धर्मार्थमध्येतव्यं व्याकरणमिति साधयितुमेव ग्रन्थोऽयं प्रणीतः विद्वद्वरेण धनेश्वरभट्टेन।

अपशब्दस्य स्वरूपं प्रदर्शयितुकामः धनेश्वरभट्टः तार्किकदिशा दश पक्षान् उद्भाव्य खण्डयित्वा च अपशब्दानामनिर्ज्ञातस्वरूपत्वं प्रतिपादयति।

तथाहि शब्दादन्यः अपशब्दः इति प्रथमः पक्षः, साधुशब्दादन्यः अपशब्द इति द्वितीयः, व्याकरणानिष्पन्नः अपशब्द इति तृतीयः, व्याकरणविरुद्धः अपशब्दः इति चतुर्थः, व्याकरणानुदाहृतः अपशब्द इति पञ्चमः, शिष्टैरप्रयुक्तः शब्दः अपशब्दः इति षष्ठः, प्रत्यवायहेतुरपशब्दः इति सप्तमः, असंस्कृतः अपशब्दः इति अष्टमः पक्षः, शब्दत्वे सति साधुशब्दानधिकरणभूतः अपशब्दः इति नवमपक्षः, अवाचकः अपशब्दः इति दशमः पक्षः।

**शब्दादन्यः अपशब्दः** इति प्रथमपक्षस्वीकारे घटादौ अर्थे अतिव्याप्तिर्भवति, घटादीनां शब्दभिन्नार्थस्वरूपत्वात्।

**साधुशब्दादन्योऽपशब्दः** इति द्वितीयपक्षस्वीकारेऽपि दोषः, साधोरद्याप्यनिर्णयात्। तथाहि व्याकरणानुशिष्टत्वं साधुत्वमिति स्वीक्रियते चेत्, व्याकरणोदाहृतशब्दव्यतिरिक्तानां साधूनाम् अपशब्दत्वापत्तिः। ननु व्याकरणे उदाहृतशब्दान् विविच्य तज्जातीयाः सर्वे शब्दाः तेनैवानुशासनेन साधवः इति चेत्तदपि न सम्भवति। तथाहि व्याकरणानुसारं प्रकृतिप्रत्ययादिविभाजनपूर्वकं शब्दानां साधुत्वे निर्णीतेऽपि कश्चित् शब्दः एकस्मिन्नर्थे प्रयुक्तः साधुः अन्यस्मिन्नर्थे च प्रयुक्तः असाधुरिति। अतः व्याकरणेन निष्पन्नानामपि साधुत्वं प्रतिपादयितुं न शक्यते। अपि च अर्थबोधनायैव शब्दः प्रयुज्यते। स चेदर्थबोधः असाधुभिरपि सम्भवति चेत् साधुशब्दानां कोपयोगिता। किञ्च, यद्भाषितव्यं तत्साधुभिरेवेति नियमो नास्ति। नियतं साधुभिरेव भाषितव्यं चेत् मौने दोषः प्रसज्येत। अतः अयमपि पक्षः स्वीकर्तुं न शक्यते।

**व्याकरणानिष्पन्नः अपशब्दः** इति पक्षः स्वीक्रियते चेत् इतरेतराश्रयदोषः - शब्दनिष्पादनात् व्याकरणं व्याकरणाच्च शब्दनिष्पत्तिरिति। यदि व्याकरणात् शब्दा निष्पाद्यन्ते तर्हि व्याकरणनिष्ठाः शब्दाः अन्येन व्याकरणेन, तद्व्याकरणनिष्ठाः शब्दा अन्येन व्याकरणेन इति अनवस्थादोषः अपि आगच्छति। किञ्च, व्याकरणात् शब्दानां निष्पादनं न सम्भवति, तयोः कार्यकारणभावस्यासिद्धत्वात्। तथाहि व्याकरणाविषयत्वात् शब्दस्य, न हि व्याकरणं तस्य समवायिकारणं भवति। भेर्याकाशडिण्डिमसंयोगाद्यन्यतमत्वाभावात् व्याकरणम् असमवायिकारणमपि भवितुं नार्हति। धर्माधर्मादिष्वनन्तर्भावात् व्याकरणं निमित्तकारणमपि

[5] तत्रैव, पृष्ठम् -९९

[6] वाक्यपदीयं ब्रह्मकाण्डम्, श्लोकः -२७

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

नास्ति। अतो न हि व्याकरणात् शब्दस्य निष्पत्तिरिति वक्तुं युक्तम्।

**व्याकरणविरुद्धः अपशब्द** इत्युच्यते तदा सोऽपि न युक्तः। न हि शब्दरूपव्याकरणस्य अपशब्देन सह महान् अनवस्थानलक्षणः विरोधः अस्ति, उभयोरपि गगने समवायसम्बन्धेन विद्यमानत्वात्। ननु व्याकरणं यद्ब्रवीति तद्विरुद्धर्थमपशब्दो ब्रवीति इति चेत् तदपि न, यदि अर्थं ब्रवीति कथं सः अपशब्दः। यदि वा अपशब्दः कथमर्थप्रत्यायने समर्थः स्यात्। तस्मादयं पक्षोऽपि न स्वीकर्तव्यः।

**व्याकरणानुदाहृतोऽपशब्दः** इत्युच्यते चेन्न, उदाहृतशब्दभिन्नानां साधुशब्दानामप्यपशब्दत्वापत्तेः। यदि ते सर्वे प्राग्भिर्वैयाकरणैरुदाहृता इत्युच्यते चेत् अस्मदुदाहृतानामपशब्दत्वापत्तेः। अतः अयमपि पक्षः स्वीकर्तुं न शक्यते।

**शिष्टाप्रयुक्तोऽपशब्दः** इत्युच्यते चेत्, शोचाचाराद्यपरित्यागादस्माकमपि शिष्टेषु अन्तर्भावात् अस्माभिरप्रयुक्तानाम् अपशब्दत्वापत्तिः। देवाः शिष्टा इत्युच्यते चेत् सृष्टिप्रागभाववर्तिनां वेदशब्दानां शिष्टाप्रयुक्तत्वादपशब्दत्वापत्तिः।

**प्रत्यवायहेतुरपशब्दः** इत्युच्यते चेत् पलाण्डुभक्षणेऽतिव्याप्तिः।

**असंस्कृतः शब्दः अपशब्द** इत्युच्यते चेत् प्राकृतप्रबन्धानामपशब्दत्वापत्तिः।

**शब्दत्वे सति साधुशब्दानधिकरणत्वम् अपशब्द** इत्युच्यते चेत् तदपि न, साधुशब्दनिराकरणेनैव परास्तत्वात्।

**अवाचकः शब्दः अपशब्दः** इत्युच्यते चेत् तदपि न, शब्दश्चावाचकश्चेत् विरुद्धमेतत्। किञ्च, शब्दः संकेतसहाय एवावबोधको भवति। ये यान् प्रति संकेतितास्ते तान् प्रति वाचका एवेत्येवम् अपशब्दानां विशिष्टलक्षणाभावात् तत्स्वरूपनिर्धारणं नैव शक्यते इति निर्णीय तदुपोद्बलकत्वेन कुमारिलभट्टोक्तां कारिकां दर्शयति –

**यावन्तो यादृशा ये च यदर्थप्रतिपादने।**
**वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः॥**[7] इति।

एवम् अपशब्दस्वरूपस्य अनिर्णीतत्वेन व्याकरणं वेदाङ्गत्वात् वेदविहितकर्मानुष्ठानद्वारा धर्मार्थमध्येतव्यं, नापशब्दज्ञानायेति निष्कर्षं प्रदर्श्य ग्रन्थोऽयं समाप्तः। पस्पशाह्निके "आचारे नियमः"[8] इत्यस्य व्याख्यानप्रसङ्गे उद्योते नागेशः अपि कथयति -"यज्ञे सुशब्दप्रयोगाद्धर्मः अपशब्दप्रयोगादधर्म इति तत्रैव तयोः प्रयोगनियमः, तदतिरिक्तस्थले तु सुशब्दापशब्दयोः प्रयोगेऽनियमः। योऽपि यज्ञे दोषः सोऽपि तदङ्गभूतसंकल्पोहादिविषये एव"[9] इति।

वस्तुतः अयं ग्रन्थः मीमांसकीयाधिकरणपद्धत्या रचित इति भाति। अधिकरणे पञ्च अङ्गानि सन्ति। तथाहि व्याकरणस्य किं तावत् प्रयोजनमिति ग्रन्थस्य प्रतिपाद्य**विषयः**। व्याकरणस्य प्रामाण्यमस्ति न वेति **विशयः**। अस्मिन् प्रसङ्गे निर्मूलत्वात्, विगीतत्वात्, नैष्फल्यात्, वेदबाधनात्, पूर्वापरविरोधाच्च व्याकरणं न प्रमाणमिति **पूर्वपक्ष** उत्थापितः। ततः **उत्तरपक्ष**रूपेण "धर्माधर्मसिद्ध्यर्थं तु शब्दापशब्दविभागकल्पनम् अभियुक्तप्रणीतत्वात्प्रमाणमे- वेति दिक्" इत्यनेन व्याकरणस्य प्रामाण्यं साधितम्। अन्तिमे "तस्माद्

---

[7] दुर्गाधरझासम्पादितं मीमांसाश्लोकवार्तिकम्, कारिका-६९ (पृष्ठम् – ६३४)

[8] जयशङ्करलालत्रिपाठिसम्पादिते व्याकरणमहाभाष्ये पस्पशाह्निकम्, पृष्ठम् -१११

[9] तत्रैव उद्योते, पृष्ठम्-११८

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

वेदाङ्गत्वात् वेदविहितकर्मानुष्ठानद्वारा धर्मार्थमध्येतव्यं व्याकरणमिति सिद्धं नापशब्दज्ञानाये"ति **निर्णयः** उपस्थापितः। एवमत्र ग्रन्थप्रणयने ग्रन्थकर्ता सुष्ठु विषयसन्निवेशपद्धतिः समाश्रिता इत्यलम् अतिविस्तरेण।

## सहायकग्रन्थसूची


- उपाध्यायः, बलदेवः। (२००१)। *संस्कृत-वाङ्मय का बृहद् इतिहास (खण्ड -१५)* । लखनऊ : उत्तर प्रदेश संस्कृत संस्थान।
- नागेशभट्टः। (२०१८)। *परमलघुमञ्जूषा* । झा, बोधकुमारः (सम्पा.)। जयपुरम् : हंसा-प्रकाशनम्।
- पतञ्जलिः। (२०१३)। *व्याकरण-महाभाष्यम् (१-५ आह्निकानि)*। त्रिपाठी, जयशङ्करलालः (सम्पा.)। वाराणसी : चौखम्बा-कृष्णदास-अकादेमी।
- पाणिनिः। (२०११)। *अष्टाध्यायी* । पाण्डेयः, गोपालदत्तः (सम्पा.)। वाराणसी : चौखम्बा-सुरभारती-प्रकाशनम्।
- भट्टः, कुमारिलः। (१९७९)। *मीमांसाश्लोकवार्तिक (हिन्दी व्याख्या सहित)*। झा, दुर्गाधरः (सम्पा.)। दरभंगा : कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय
- भर्तृहरिः। (२००७)। *वाक्यपदीयम् (ब्रह्मकाण्डम्)* । खण्डूड़ी, सत्यनारायणः (सम्पा.)। वाराणसी : चौखम्बा- कृष्णदास-अकादमी।
- माधवाचार्यः। (२०१४)। *सर्वदर्शनसंग्रहः (सपरिशिष्ट-प्रकाश-हिन्दीभाष्योपेतः)* । शर्मा, उमाशङ्करः (सम्पादकः)। वाराणसी : चौखम्बा विद्याभवन।
- शुक्लः, कालिकाप्रसादः। (१९७९)। वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# वैयाकरणसिद्धान्तकौमुद्या अपत्याधिकारप्रकरणोपेतबालमनोरमायां ग्रन्थान्तराणां प्रभावः

**तनय-वैद्यः**
**शोधच्छात्रः, रामकृष्णमिशन्-विद्यामन्दिरम्**
**बेलुडमठः, पश्चिमबङ्गः**

**प्रबन्धसारः**

*व्याकरणस्य सम्यग्ज्ञानाय प्रथमसोपानरूपेण यथा दीक्षितकृतवैयाकरणसिद्धान्तकौमुद्याख्यस्य प्रक्रियाग्रन्थस्य ज्ञानमावश्यकं तथा तद्ग्रन्थेन सार्धं ग्रन्थगतग्रन्थान्तराणामपि पाठोऽपेक्षितः। यतो हि कदाचित् ग्रन्थस्योद्धृत्या सम्यग्ग्रन्थार्थप्रकाशः न सम्भवति। तस्मात्तत्र यथार्थज्ञानाय ग्रन्थस्थितायाः टीकायाः बोधः अत्यावश्यकः। टीका यथायथं ग्रन्थार्थं प्रकाशयति। कथञ्चित् टीकाध्ययनेऽपि काठिन्यमुत्पद्यते, यदि तस्यां टीकायां ग्रन्थान्तराणां प्रभावो दृश्यते। अत एवादौ तत्र अन्यग्रन्थानां ज्ञानं, ततःपरं तज्ज्ञानमादाय टीकाया अध्ययनं कर्तव्यमिति निश्चप्रचम्। वस्तुतस्तु व्याकरणशास्त्रे दीक्षितप्रणीतसिद्धान्तकौमुद्याः व्याख्यानरूपेण बालमनोरमानामाख्य-टीकेयं प्रसिद्धा। परन्तु टीकाकृता वासुदेवेन तत्कृतटीकायाः प्रतिपादनकाले बहुत्र प्रसङ्गं दर्शयित्वा अन्यग्रन्थानां नाममात्रेण उल्लेखो विहितः। तस्मात्तत्र अध्येतॄणां सन्देहस्समुद्भवति। कुत्रचित् बालमनोरमाकृत् कमपि मतमनुक्त्वा एव ग्रन्थान्तराणां नामोल्लिख्य 'स्पष्टम्' इत्युक्त्वा विरमति। तेन विवक्षितार्थस्य प्रकृतज्ञानं न अवगम्यते। एवमेव बालमनोरमाख्यटीकाव्याख्याने नैकेषां ग्रन्थानां प्रभावो दरीदृश्यते। तद्यथा महाभाष्यं, प्रदीपोद्योतटीका, शब्देन्दुशेखरः, मञ्जूषा इत्यादीनां प्रभावः परिलक्ष्यते। परन्त्वस्मिन्शोधपत्रे मुख्यत्वेन केवलं प्रदीपशेखरादिप्रौढग्रन्थानां प्रभाव उपस्थाप्यते। कारणं ह्यपत्याधिकारस्थ-बालमनोरमाया व्याख्यानकाले टीकाकृता बहुत्र ग्रन्थान्तराणां समावेशस्साधितः।*

**कुञ्चीशब्दाः – तद्धितः, अपत्यं, गोत्रं, कैयटः, लौकिकमतं चेत्यादयः।**

****************************************************************************

**उपक्रमः**

अस्मिन् संसारे व्यवहारस्य मूलं कारणं तावत् भवति ज्ञानम्। तस्य ज्ञानस्य कश्चन प्रकारो भवति शाब्दबोधः। शाब्दबोधार्थं पदज्ञानमावश्यकम्। तदर्थञ्च व्याकरणज्ञानमावश्यकं वर्त्तते। 'मुखं व्याकरणं स्मृतम्'[1] इति पाणिनीयशिक्षावचनानुसारं वेदस्य मुख्यत्वेन विद्यमानं व्याकरणशास्त्रमिदं सर्वशास्त्रेषु विशिष्टं स्थानं लभते। व्याक्रियन्ते व्युत्पाद्यन्ते अर्थवत्तया प्रतिपाद्यन्ते शब्दा येनेति व्याकरणम् इति व्याङ्पूर्वककृधातोः ल्युटि व्याकरणशब्दो निष्पद्यते। प्रकृत्या सह प्रत्ययस्य योगेन शब्दस्य व्युत्पत्तिर्वा निष्पत्तिर्वा येन शास्त्रेण क्रियते तच्छास्त्रं व्याकरणमित्यभिधीयते। तच्च असाधुशब्देभ्यः साधुशब्दान् पृथक्करोति। अत एव शब्दा अनुशिष्यन्ते अनेनेति शब्दानुशासनं व्याकरणशास्त्रमिति। तथा च हरिकारिकायामुच्यते -

"इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥"[2]

षड्सु अङ्गेषु प्रधानं व्याकरणं, पदपदार्थज्ञानस्य तदायत्तत्वात्। प्रधाने च कृतो यत्नः फलवान् भवति। अत्र फलं भवति मोक्षः। ननु व्याकरणज्ञानेन कथं मोक्षो लभ्यते इति चेदुच्यते- असाधुशब्देभ्यः साधुशब्दान् पृथक्कृत्य तच्छब्दप्रयोगेण धर्म उत्पद्यते। तस्माच्च मोक्षसिद्धिर्भवति। किमनेन व्याकरणज्ञानेन

[1] पाणिनीयशिक्षा। पृ. १४३

[2] वाक्यपदीये ब्रह्मकाण्डम्। कारिका. १६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

साधुशब्दाः ज्ञायन्ते इति चेदाह नागेशभट्टो महाभाष्यप्रदीपोद्योते- 'अनुशिष्यन्ते असाधुशब्देभ्यः विविच्य ज्ञाप्यन्ते अनेनेति'। साधुशब्दा इति शेषः। तथाहि हरिणा कारिकायामभाषि- 'वाङ्मलानां चिकित्सितम्'[3] इति। कारिकोक्तवाङ्मलं नाम अपशब्द इति। स चापशब्दो व्याकरणज्ञानेन अपगच्छति। एवम् अपशब्दानां परिहारपूर्वकः साधुशब्दानां प्रयोगो निःश्रेयसप्रापकः। अत एव व्याकरणशास्त्रज्ञानात् साधुशब्दैः प्रयुक्तैः पुण्यं भवति, तेन पुण्येन पापनिवृत्तिः, पापविनाशे च निर्मलं पवित्रं ज्ञानमुत्पद्यते, ततस्तेन च निर्मलज्ञानेन मोक्षस्सिद्ध्यति। अतोऽध्येयं व्याकरणम्।

व्याकरणस्य सम्यग्ज्ञानाय आद्यसोपानरूपेण यथा दीक्षितकृतवैयाकरणसिद्धान्तकौमुद्याख्यस्य प्रक्रियाग्रन्थस्य ज्ञानमावश्यकं तथा तद्ग्रन्थेन साकं ग्रन्थगतान्यग्रन्थानामपि पाठोऽपेक्षितः। यतो हि कुत्रचिद् ग्रन्थस्थ-वृत्त्या यथारूपं ग्रन्थार्थप्रकाशो न भवति। तत्रैव ग्रन्थार्थस्य यथार्थज्ञानाय ग्रन्थस्थिता या टीका वर्तते तस्याः बोधः अत्यावश्यकः। यथायथं ग्रन्थार्थं टीका प्रकाशयति। किञ्च सर्वदा टीकया विना ग्रन्थाध्ययनम् असम्भवमेवेति निश्चप्रचम्। अतः सर्वदा मूलग्रन्थेन साकं तद्गतटीकायाः अध्ययनं कर्तव्यमिति।

तस्मात् कारणादेव गवेषणापत्रेऽत्र सिद्धान्तकौमुद्याः बालमनोरमाव्याख्यायां ग्रन्थान्त-राणां समावेशस्साधितः। न च सर्वत्र समावेशः, परन्तु यत्र श्रीवासुदेवदीक्षितप्रणीतबाल-मनोरमायां ग्रन्थान्तराणाम् उल्लेखः कृतः, तत्रैव तत्तदन्यग्रन्थानां पङ्क्तिस्समुद्धृता। अनया तद्गतपङ्क्त्या अस्याः बालमनोरमायाः विवक्षितार्थः विशदेन ज्ञायते। एवमेव इयं टीका भाष्यानुसारिणी न वा इत्येतदेव अवगम्यते। अस्यां बालमनोरमायां बहूनां ग्रन्थानां प्रभावो दरीदृश्यते। तद्यथा- वेदः, वेदभाष्यं, प्रातिशाख्यं, श्रौतसूत्रं, पुराणं, महाभाष्यं, प्रौढमनोरमा, मञ्जूषा, शब्देन्दुशेखरः, काशिका, न्यासः, पदमञ्जरी, मीमांसा, इत्यादिग्रन्थानां प्रभावः परिलक्ष्यते। एतान् विहाय तत्र पाणिनीयशिक्षायाः, मनुसंहितायाः, श्लोकवार्तिकस्य, प्रक्रियाप्रकाशस्य, तत्त्वबोधिन्याश्च प्रभावोऽपि दृश्यते। यथा सिद्धान्तकौमुद्यां कस्मिंश्चित् विषये बालमनोरमाकृता स्वव्याख्याने यत्र उक्तं 'भाष्ये स्पष्टम्' तत्र तद्भाष्योद्धृतेः प्रासङ्गिकता अस्ति नास्ति वेति विस्तरस्तु भाष्ये द्रष्टव्यम्। एवमेव कुत्रचित् बालमनोरमाकृत् कमपि मतमनुक्त्वा एव ग्रन्थान्तराणां नामोल्लिख्य 'स्पष्टम्' इत्युक्त्वा विरमति। तस्मात्तत्र अध्येतॄणां सन्देहः समुद्भवति। किञ्च विवक्षितार्थस्य प्रकृतज्ञानं न अवगम्यते। अत एव तत्र प्रकृतज्ञानलाभाय तथा विवक्षितार्थावगमनाय तत्तद्ग्रन्थेभ्यो वृत्तेः पङ्क्तिभागस्य वा व्याख्यानमुचितमिति। तदर्थमेव तद्धिताधिकारप्रकरण-गतापत्याधिकारे सूत्रवृत्तीनां बालमनोरमायां ग्रन्थान्तराणां प्रभावो विस्तरेण आलोचयिष्यते। टीकायामस्यामनेकेषां ग्रन्थानां प्रभावो दृश्यते किन्तु शोधपत्रेऽस्मिन् मुख्यत्वेन महाभाष्योपेतप्रदीपटीकायाः प्रभावः, कोशग्रन्थस्य प्रभावः, शब्देन्दुशेखरस्य प्रभावश्च व्याख्यास्यते। अधस्तात् उक्तग्रन्थान्तराणां प्रभावो विशदेन प्रस्तूयते।

**१) महाभाष्योपेतप्रदीपटीकायाः प्रभावः** -

भट्टोजिदीक्षितरचितवैयाकरणसिद्धान्तकौमुद्याः तद्धिताधिकारप्रकरणगत-अपत्याधिकारे 'यञञोश्च' (अष्टाध्यायी, २.४.६४) इति सूत्रस्य वृत्तौ

---

[3] वाक्यपदीये ब्रह्मकाण्डम्। कारिका. १४

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

"प्रवराध्यायप्रसिद्धमिह गोत्रम्" इत्युक्तवान्। तत्र गोत्रशब्दार्थस्य व्याख्यानकाले वासुदेवदीक्षितेन तत्कृतबालमनोरमायामुच्यते- "कैयटेन लौकिकस्य गोत्रस्य ग्रहणमिति भाष्यमुपादाय तथैव व्याख्यातत्वादिति भावः" इति।

व्याकरणशास्त्रे प्रयुक्तानां केषाञ्चन शब्दानां प्रकृतार्थनिर्णये सूत्रकारेण द्विविधं मतं प्रस्तूतम्। वस्तुतो वैयाकरणेन संज्ञाविशिष्टशब्दस्यार्थे मतद्वैविध्यं ज्ञापितम्। तच्च लौकिकं पारिभाषिकञ्चेति। लौकिकं खलु यल्लोके प्रसिद्धं, पारिभाषिकं तु सूत्रकारस्वाभिमतमिति। किञ्च, सूत्रकारेण कुत्र लौकिकार्थाधारेण सूत्रं निर्मितं कुत्र च पारिभाषिकार्थमादाय सूत्रोल्लेखः इति विषयो न परिष्कृतः। तत्र च सूत्रकाराभिमतस्य बोधनार्थं महाभाष्यादिग्रन्थाः प्रणीतास्सन्ति। एवमेव आशङ्का अपत्याधिकारवर्णित-यञञोश्चेत्यादिसूत्रे दृश्यते। सूत्रेऽस्मिन् 'यस्कादिभ्यो गोत्रे' (अष्टाध्यायी, २.४.६३) इति पूर्वसूत्रस्थ-चकारानुरोधाद् 'गोत्रे' इत्यस्यानुवर्तनं भवति। गोत्रशब्दस्यानुकर्षणे इह सूत्रे तच्छब्दस्यार्थद्वैविध्यं सम्भवति। लौकिकव्यवहारात् गोत्रशब्दाः कौडिन्यकाश्यपपादि-ऋषीणां वंशस्य बोधनार्थं प्रचलिताः। अन्यत्र तु सूत्रकृत् 'अपत्यं पौत्रप्रभृति गोत्रम्' (अष्टाध्यायी, ४.२.१६२) इति सूत्रनिर्माणेन गोत्रशब्दस्य पारिभाषिकमर्थमपि निर्दिशति। अत्र अध्येतॄणां मनसि विचिकित्सा जायते यत् कमर्थं गृहीत्वा सूत्रस्य निर्माणं भवतीति प्रश्नः। ततश्शंकाया अस्या निराकरणाय बालमनोरमाकृत् तट्टीकायां कैयटोक्तिं विवृणोति। यदुक्तिः कैयटेन 'यूनि लुक्' (अष्टाध्यायी, ४.१.९०) इति सूत्रभाष्यव्याख्यानबेलायामुद्धृता। तत्र ह्येवमुक्तं भाष्योपेतप्रदीपे - "गोत्रग्रहणं लौकिकगोत्रपरमिति। लौकिकं च गोत्रमपत्यमात्रम्"[4] इति। अयम्भावः सूत्रेऽस्मिन् ज्ञापकगोत्रशब्देन लौकिकगोत्रं पृथगुल्लेखादिति। अत एव अपत्याधिकारादुत्तरं यद्गोत्रं तल्लौकिकं गोत्रमेवेति भावः। तेन विश्वमित्रभरद्वाजवसिष्ठादि-ऋषीणां यदपत्यं तद्गोत्रमित्याचक्षते। अर्थात् वक्तुं शक्यते ऋषिप्रजनश्च लोके गोत्रमित्युच्यते। तदर्थं दीक्षितेन भणितं वृत्तौ- 'प्रवराध्यायप्रसिद्धः, तस्यैव लोके गोत्रत्वेन व्यवहारादि'[5]ति।

भट्टोजिदीक्षितकृतवैयाकरणसिद्धान्तकौमुदीनामके प्रक्रियाग्रन्थे द्वितीयभागस्थ-तद्धितप्रकरणे "शिवादिभ्योऽण्" (अष्टाध्यायी ४.१.११२) इति सूत्रमिदं पठितम्। तत्सूत्रस्य वृत्तिविषये वासुदेवदीक्षितो बालमनोरमायां प्रपञ्चते- "वृत्तिकैयटयोस्तथोक्तत्वादिति भावः" इति। तथोक्तत्वात् इत्यंशेन स वृत्तिभागस्य कैयटमतस्य च ग्रहणं स्वीकरोति।

इह प्रश्नः समुदेति यत् वृत्तिभागे वृत्तिकारेण किमुक्तम्, एवञ्च प्रदीपे कैयटेनापि किं प्रपञ्चितमिति। अपि च उक्तिद्वयस्य कोऽभिप्राय इति। ततः सूत्रसन्दर्भेऽस्मिन् यद्भाष्यं रचितं तद्व्याख्याने कैयटेन निगदितं- "गोत्र इति निवृत्तम्, अपत्यमित्येवानुवर्तते"[6] इति। अनेन च कैयटवचनेन

---

[4] व्याकरणमहाभाष्यम् (चतुर्थो भागः), श्रीभार्गवशास्त्रीजोशी (सम्पा.), यूनि लुक् इति सूत्रभाष्यस्य प्रदीपटीका। पृ. ११६

[5] वैयाकरणसिद्धान्तकौमुदी (द्वितीयो भागः), यञञोश्च सूत्रस्य दीक्षितवृत्तिः। पृ. ३०८

[6] व्याकरणमहाभाष्यम् (चतुर्थो भागः), श्रीभार्गवशास्त्रीजोशी (सम्पा.), शिवादिभ्योऽण् इति सूत्रभाष्यस्य प्रदीपटीका। पृ. १३६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

फलितं यत् 'गोत्रे कुञ्जादिभ्यश्च्फञ्' (अष्टाध्यायी, ४.१.९८) इति सूत्रादारभ्यमानं यदनुवर्तनभूतं गोत्रशब्दं तच्छब्दमालोच्यसूत्रे नैव अनुवर्तनीयमिति। अत आलोच्यसूत्रे गोत्रपदस्यानुवृत्त्यभावात् सामान्येन विहिताः प्रत्यया विज्ञायन्ते। अपि च 'प्राग्दीव्यतोऽण्' (अष्टाध्यायी, ४.१.८३) इत्यौत्सर्गिकसूत्रेण अण्प्रत्यय इति निष्कर्षः। अत एव गोत्रत्वस्य निवृत्तिभावात् शिवादिगणपठितशब्दानां विषये अपत्यमित्यर्थे उक्तप्रत्यय एव विधीयते। एतद्विषयश्च दीक्षितेनापि समर्थितोऽस्ति। तथैवोक्तं वृत्तौ- 'गोत्रे इति निवृत्तम्। शिवस्यापत्यं शैवः। गाङ्गः'[7] इति। तदर्थमेव बालमनोरमाकारेण कैयटदीक्षितयोः मतं समर्थयता टीकायां तथैव स्वीक्रियते। एतस्मिन् वर्णितविषये मतान्तरमप्यन्यत्र प्रपञ्चितं, परन्तु टीकाकारेण तन्न स्वीकृतं, वृत्तिकैयटयोस्तथोक्तत्वादिति।

पुनः "शिवादिभ्योऽण्"( अष्टाध्यायी ४.१.११२) इति सूत्रस्य व्याख्यानकाले वासुदेवदीक्षितेन बालमनोरमायां मतान्तरमुपस्थाप्यते- "यूनि लुक् (अष्टाध्यायी, ४.१.९०) इति सूत्रस्य भाष्यकैयटयोस्तु गोत्रसंज्ञासूत्रपर्यन्तं गोत्राधिकार इति लभ्यते" इति। वस्तुतः अपत्याधिकारप्रकरणे गोत्रसंज्ञाधिकार उपन्यस्तोऽस्ति। यदधिकारः 'गोत्रे कुञ्जादिभ्यश्च्फञ्' (अष्टाध्यायी, ४.१.९८) इति सूत्रतः 'गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्' (अष्टाध्यायी, ४.२.३९) इति सूत्रपर्यन्तं विद्यते। एवंविधाधिकारस्य ग्रहणे किं प्रमाणमिति जिज्ञासायामुच्यते बालमनोरमाकृता - यूनि लुगिति सूत्रस्थ-भाष्यकैयटवचनमिति। तथा चोक्तं कैयटेन प्रदीपे- "प्राग्गोत्रसंज्ञायाः गोत्रे कुञ्जादिभ्यश्च्फञ्' इत्यतः गोत्रग्रहणादनुवर्तमानाच्छास्त्रीयगोत्राभिधायिनौ राजन्यमनुष्यशब्दौ, ततश्च गोत्रग्रहणेनैव ताभ्यां बुञः सिद्धत्वात्"[8] इति। अत्र प्राग्गोत्रविषये भाष्योक्तं 'गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्' (अष्टाध्यायी, ४.२.३९) इति सूत्रस्थ-राजन्यमनुष्यशब्दयोः ज्ञापकत्वम् उपपादयति- प्राग्गोत्रसंज्ञायामिति टीप्पण्यां परिष्कृतं भवति। तेन 'शिवादिभ्योऽण्' (अष्टाध्यायी, ४.१.११२) इत्यस्मिन् सूत्रे गोत्रपदमनुवर्तते, सूत्रस्यास्य गोत्राधिकाररहितत्वादिति फलितम्। तस्मादेव उक्तसूत्रप्रसङ्गे मतान्तरं जायते। तच्च गोत्र इति निवृत्तमित्येकः पक्षः, गोत्रसंज्ञाधिकारपठितमिदं सूत्रमित्यपरः पक्ष इति निष्कर्षः। इह मतान्तरस्य समुत्पत्तौ कः पक्षः ग्रहीतव्यः इति विषये बालमनोरमाकारवासुदेवेन किञ्चिदपि नोक्तम्। परन्तु समाधानत्वेन शब्देन्दुशेखरस्योल्लेखः कृतः इति दिक्। अत एव तद्विषये यथाग्रन्थं मतान्तरस्याभिप्रायं व्याख्यास्यामि।

**२) कोशग्रन्थस्य मतम् :-**

वैयाकरणमहोपाध्यायभट्टोजिदीक्षितेन प्रणीतायाः वैयाकरणसिद्धान्तकौमुद्या अपत्याधिकारप्रकरणे "अपत्यं पौत्रप्रभृति गोत्रम्"(अष्टाध्यायी, ४.२.१६२) इति सूत्रस्य वृत्तिविषये भणितम्- 'अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्' इति। अर्थात् पौत्रप्रभृतीनि अपत्यानि गोत्रसंज्ञकानि भवन्ति। तद्वृत्तिप्रसङ्गे वासुदेवदीक्षितेन बालमनोरमायां "सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ इति कोशतो गोत्रशब्दस्य सन्ततिवाचकत्वात्पुत्रस्यापि गोत्रत्वे प्राप्ते

[7] वैयाकरणसिद्धान्तकौमुदी (द्वितीयो भागः), शिवादिभ्योऽण् सूत्रस्य दीक्षितवृत्तिः। पृ. ३११

[8] व्याकरणमहाभाष्यम् (चतुर्थो भागः), यूनि लुक् इति सूत्रभाष्यस्य प्रदीपटीका। पृ. ११५

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

पौत्रग्रहणादिह शास्त्रे पुत्रस्य न गोत्रत्वम्” इत्येवं व्याख्यानमुद्धृतम् ।

वस्तुतस्तु कस्यापि शब्दस्यार्थनिर्णये कोशग्रन्थस्यापेक्षा भवति। स कोशानिर्णीतार्थः लोकेऽपि व्यवह्रियते। अतः लोकव्यवहारात् स एवार्थः गृह्यते। तद्वत् गोत्रशब्दार्थस्य विवरणमर्थात् तत्पर्यायवाचिनामपि शब्दानाम् अमरसिंहेन कोशग्रन्थे उल्लेखो विहितः। तथा चोक्तममरकोशस्य ब्रह्मवर्गे-

“सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वंशोऽन्ववायः सन्तानो वर्णाः स्युर्ब्राह्मणादयः ॥”[9]
इति ।

इह कोशोक्तवचनात् गोत्रशब्दः सन्ततिवाचकत्वात् पुत्र एव बोध्य इति सिद्ध्यति। ननु अमरकोशोक्तकारिकानुसारात् सन्ततिवाचकपुत्रे एव गोत्रत्वे सिद्धे कथम् “अपत्यं पौत्रप्रभृति गोत्रमि”ति गोत्रसंज्ञाबोधनाय पृथक्सूत्रकरणमिति। एतत्तु आलोच्यसूत्रगतबालमनोरमायां टीकाकारेण न व्याख्यातम्। ततश्च टीकायामापत्तिः सम्भाविता कोशोगतसन्ततिर्गोत्रजननेत्यादिवाक्यनिर्देशात्। परन्तु इह गोत्रशब्दस्य पर्यायवाचिनां निर्देशे पुत्रत्वे एव सिद्धे सति शास्त्रे पुत्रस्य न गोत्रत्वं पौत्रप्रभृतिग्रहणादिति फलितमनेन सूत्रेण। तदाह काशिकाकारेण- “सम्बन्धिशब्दत्वादपत्यशब्दस्य यस्य यदपत्यं तदपेक्षया पौत्रप्रभृतेर्गोत्रसंज्ञा विधीयते”[10] इति। अत्र सूत्रे ‘पौत्रप्रभृति’ इत्युक्ते पौत्रादारभ्य अग्रिमो वंशः- पौत्रः, प्रपौत्रः, प्रप्रपौत्रः चेत्येवमादयः। तेषां यदपत्यं तद्गोत्रसंज्ञं भवतीति। अत एव कोशवाक्येन सूत्रस्य व्यर्थत्वे प्राप्ते पुनः सूत्रे पौत्रप्रभृतिग्रहणात् सूत्रमिदं सिद्धं, व्याकरणशास्त्रे गोत्रशब्दस्य पारिभाषिकार्थग्रहणादिति।

भट्टोजिदीक्षितकृतवैयाकरणसिद्धान्तकौमुद्याः अपत्याधिकारे “एको गोत्रे”( अष्टाध्यायी ४.१.९३) इति सूत्रविचारबेलायां गोत्रापत्यस्य निर्देशार्थं मूलप्रकृतेः उत अनन्तरप्रकृतेः प्रत्यय योज्य इति संशये प्राप्ते बालमनोरमायां वासुदेवदीक्षितेन नियम्यते- ‘एके मुख्यान्यकेवलाः’ इत्यमरः। ‘अपत्यं पौत्रप्रभृति गोत्रम्’(अष्टाध्यायी ४.२.१६२) इति सूत्रेण पौत्रप्रभृतीनाम् अपत्यानां गोत्रसंज्ञा विधीयते। एतादृशस्य गोत्रापत्यस्य विधानार्थं प्रत्यययोजनं कथं करणीयमिति निर्णयः सूत्रेणानेन नियम्यते। इह सूत्रे गोत्रार्थे एक एव प्रत्ययो भवति। किञ्चादौ प्रश्नः समुदेति यत् गर्गस्य अनन्तरापत्यं गार्गि इति प्रातिपदिकं सिद्ध्यति, एवञ्च गर्गस्य गोत्रापत्यमर्थात् गार्गेः अनन्तरापत्यमित्यर्थे गार्गिशब्दात् प्रत्यययोजनमिष्यते चेदयं प्रत्ययः गार्गि इति प्रातिपदिकात् कर्तव्यः उत गर्ग इति मूलप्रातिपदिकात्? आशङ्कामिमां व्युत्पादयन् बालमनोरमायां वासुदेवेन कोशवचनं प्रमाणत्वेन अङ्गीक्रियते। तत्र सूत्रस्थ-एकपदस्य विचारे पर्यायवाचिशब्दानां प्रयोगः दृश्यते। तच्च एकशब्दस्य विषये अमरकोशवचनं-

“करिहस्तेऽङ्गुलौ पद्मबीजकोश्यां त्रिषूत्तरे ।
वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः ॥”[11]
इति ।

अत्र कारिकांशेन उपस्थापितम्- ‘एके मुख्यान्यकेवलाः’ इति। इह एकशब्दस्य समनार्थकाः मुख्य-अन्य-केवलाः इति।

---

[9] अमरकोषः। गुरुनाथ विद्यानिधि (सम्पा.)। पृ. २०९

[10] काशिका (चतुर्थो भागः), पृ. ४९१

[11] अमरकोषः। रामेश्वरभट्टः (सम्पा.)। पृ. २२३

अर्थात् एकशब्दोऽत्र प्राथम्यनियमे विद्यत इति वेदितव्यम्। एकशब्दस्य प्रथमविवरणात् 'प्रथमा प्रकृतिः' इति लभ्यते। सा च प्रथमा परमप्रकृतिरप्रत्ययान्ता इति सूत्रकाराभिप्रायम्। अपि च गोत्रापत्यस्य व्यवहारे सर्वत्र प्रथमा प्रकृतिः प्रत्ययमुत्पादयति। तस्मात् गर्गस्य गोत्रापत्यमित्यर्थे मूलप्रकृतेः अर्थात् गर्गशब्दस्य प्रथमप्रकृतित्वात् तच्छब्दादेव प्रत्यययोजनं, न तु अनन्तरापत्य-भूतगार्गिशब्दादिति। अत एव गोत्रसंज्ञकस्य विधानार्थं मुख्यप्रकृते एव प्रत्यय इत्याशयः।

**३) शब्देन्दुशेखरस्य मतम् :-**

वैयाकरणशिरोमणिभट्टोजिदीक्षितेन प्रणीते वैयाकरणसिद्धान्तकौमुदीस्थ-अपत्याधिकाराख्यप्रकरणे "तस्यापत्यम्" (अष्टाध्यायी, ४.१.९२) इति सूत्रस्य वृत्त्यांशे "अकृतव्यूहपरिभाषया सावुत्थितिः माभूत्" इत्युक्तम्। तद्वृत्तेः प्रकृतस्वरूपबोधनबेलायां वासुदेवदीक्षितो बालमनोरमायां ब्रवीति "विस्तरस्तु शब्देन्दुशेखरे ज्ञेयः" इति।

इत्थं ह्युक्तं नागेशेन- "कृतसन्धेः किमिति। अन्तरङ्गत्वात् सन्धिकार्योत्तरमेव प्रत्ययो भविष्यतीति समर्थानामिति व्यर्थमिति प्रश्नः। उत्तरयति- अकृतेति। यद्यपि अत्रैकादेशप्रवृत्तिसमये न वृद्धेः प्राप्तिः, कृते एकादेशे जायमानया वृद्ध्या च न तन्निमित्तविनाशः, तथापि निमित्तविनाशसम्भावनैव तत्परिभाषाप्रवृत्तौ निमित्तम्। सा चात्रास्त्येव। यदि दीर्घो न स्यात् तदा वृद्ध्या निमित्तविनाशः स्यादिति भावः। वस्तुतोऽन्तरङ्गन्यायलब्धार्थानुवाद एव समर्थानामिति, विषुण इत्यादावकृतसन्धेरपि प्रत्ययदर्शनेन अन्यत्रापि तथाशङ्कावारणाय। अत एव विप्रतिषेधसूत्रे भाष्ये 'अन्तरङ्गं बलीयः' इत्यस्य सौत्थितिः, वैक्षमाणिरित्युदाहरणं दत्तम्। 'पदस्य विभज्यान्वाख्याने 'सु उत्थित इ सु' इति स्थिते परत्वादादिवृद्धिः प्राप्ता' इति च कैयटः। अकृत इति परिभाषा तु भाष्याऽव्यवहृतत्वन्नास्त्येवेत्यन्यत्र विस्तरः"[12] इति।

अयमेव विस्तरः शब्देन्दुशेखरे। अस्यायम्भावः- 'तस्यापत्यम्' (अष्टाध्यायी, ४.१.९२) इति सूत्रवृत्तिभागे 'कृतसन्धेः' इत्युक्तं दीक्षितेन। ततश्च तत्प्रयोजनं किमिति इत्युक्त्वा कौमुद्यां स्पष्टीकरोति- 'सौत्थितिः' इति। इह खलु सूत्रवृत्तौ यदि कृतसन्धिपदस्य योजनं न कृतं तर्हि 'सु+उत्थितिः' इति दशायां तद्धितोत्पत्त्यपेक्षया अन्तरङ्गकार्यस्य बलवत्त्वात् पूर्वं सन्धिकार्यमिष्टं, ततः सन्धिकार्यादनन्तरं तद्धितोत्पत्तिः इति निष्कर्षः। अत एवम्विधौ प्रक्रियाबेलायां दोषविरहे 'समर्थानां प्रथमाद्वा' (अष्टाध्यायी, ४.१.८२) इत्यत्र 'समर्थानाम्' इत्यस्य पदस्य वैयर्थ्यमिति प्रतिभाति। समर्थानामिति पदस्य व्यर्थत्वे सति कौमुदीकार उत्तरयति- 'अकृतव्यूहपरिभाषया सावुत्थितिर्माभूत्' इति। अस्याः परिभाषाया अयं भावः- यद्यपि 'सु उत्थितिः' इत्यवस्थायां सवर्णदीर्घैकादेशस्य प्राप्तावस्थायां वृद्धेः अप्राप्तिः, एकादेशे च कृते यद्वृद्धिकार्यमापतति, तस्य चैकादेशे निमित्तस्य विनाशः न सम्भवति। तथाप्यत्र निमित्तविनाशस्य सम्भावना दृश्यते। तदेवात्र अस्याः परिभाषायाः प्रवृत्तिनिमित्तत्वेनाङ्गीकारो भवति। तथा च नागेशेन 'तथापि निमित्तविनाशसम्भावनैव तत्परिभाषाप्रवृत्तौ निमित्तम्। सा चात्रास्त्येव' इत्यादिवाक्ये एवकारस्य प्रयोगः क्रियते। तेन च

[12] लघुशब्देन्दुशेखरः(पञ्चमो भागः), हरिनारायण तिवारी (सम्पा.)। पृ. २७

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

एवग्रहणेन स्वप्रवृत्त्युत्तरकाले यत्र स्वनिमित्तस्य अन्यशास्त्रद्वारा विनाशः सम्भवति तत्रैव अस्याः प्रवृत्तिः स्यादिति अर्थव्यवच्छेदः। किञ्चास्याः सम्भावनायाः स्वरूपं स्पष्टीकरोति - यदि दशायां दीर्घकार्यं न प्राप्नोति, तर्हि वृद्धिकार्येण दीर्घनिमित्तस्य विनाशः सम्भाव्यत इति फलितम्। अत एव समर्थपदस्य न्यायलब्धार्थस्यानुवादे कृते एव विप्रतिषेधसूत्रभाष्ये अन्तरङ्गं बलीयः इति नियमेन 'सौत्थितिः' इत्याकारकमुदाहरणं प्रदत्तम्। तद्यत्र 'सु उत्थितः' इति दशायां तद्धितोत्पत्ति-अपेक्षया सवर्णदीर्घ-एकादेशकार्यं भवत्यन्तरङ्गविधिः, यतः सवर्णदीर्घकार्यं तद्धितविहितकार्यस्य नापेक्षते। एवञ्च तदेव कार्यमल्पनिमित्तकमेव तद्धितकार्यापेक्षया इति। अत एव तद्धितविहितकार्यस्य बहिरङ्गत्वात् अन्तरङ्गविधिना सवर्णदीर्घैकादेशो विधीयते। तदनन्तरमेव तद्धितोत्पत्तिः इति फलितार्थः। तदाह कैयटः- "पदस्य विभज्यान्वाख्याने 'सु उत्थित इ सु' इति स्थिते परत्वादादिवृद्धिः प्राप्ता"[13] इति।

नागेशेन शब्देन्दुशेखरे अस्य सूत्रस्यार्थस्य विचारे दीक्षितोक्त-**अकृतव्यूहा पाणिनीयाः** इति परिभाषायाः दोषः अपि उपस्थाप्यते। कोऽयं दोष इति विवक्षायां कथयति यत् दीक्षितेन अस्याः परिभाषायाः ग्रहणादपि सा च परिभाषा असिद्धा भाष्येऽव्यवहृतत्वादिति। अतो नागेशो भाष्याश्रयणेन तत्परिभाषां खण्डयति। एतद्विषये विस्तरसमाधानं परिभाषेन्दुशेखरे द्रष्टव्यम्। तदर्थमेव बालमनोरमाकारः सूत्रसन्दर्भे भिन्नमतं समाकल्य विस्तारज्ञानार्थमन्ते शब्देन्दुशेखरस्योल्लेखं करोति।

वैयाकरणसिद्धान्तकौमुद्यामपत्याधिकारे "यञञोश्च" (अष्टाध्यायी, २.४.६४) इति सूत्रवृत्तौ गोत्रशब्दार्थनिर्णये "प्रवराध्यायप्रसिद्धमिह गोत्रम्, तेनेह न। पौत्राः। दौहित्राः" इति उदाहृतम्। तत्र चोदाहृतशब्दानां वचनापत्तिविधानकाले बालमनो-रमायां वासुदेवदीक्षितेन निगद्यते- "विस्तरस्तु शब्देन्दुशेखरे ज्ञेयः" इति।

तत्रायमेव विस्तरः- "ण्यक्षत्रिय' (२.४.६४) इत्यतो लुगिति, 'तद्राजस्य' (२.४.६२) इति सूत्राद् 'बहुषु तेनैवास्त्रियाम्' इति, 'यस्कादिभ्यः' (२.४.६३) इत्ययो गोत्र इति चानुवर्तते। प्रवराध्यायप्रसिद्धवाचित्वगोत्रवाचित्वं यञञोर्नास्तीत्यत आह - यञञन्तमिति। प्रवरेति। तादृशमपत्यप्रत्ययान्तमित्यर्थः। एतदेव च लौकिकं गोत्रत्वम्। एतत्सर्वं 'यूनि लुक्' 'गोत्रावयवात्' (अष्टाध्यायी, ४.१.७८) 'स्त्रीपुंसाभ्याम्' (४.१.८७) इत्यादौ भाष्ये स्पष्टम्। तत्र भाष्येऽपत्याधिकारात्परं शास्त्रीयगोत्रग्रहणे गार्ग्यायणादिभ्यो युवप्रत्ययान्तेभ्यः समूहादौ परं प्रवराध्यायप्रसिद्धरूपलौकिकगोत्रग्रहणे 'गोत्रोक्षोष्ट्र' (४.२.३९) इति सूत्रे राजन्यमनुष्यग्रहणं ज्ञापकमित्युक्तम्। शास्त्रीयगोत्रञ्च युवत्वाऽनाक्रान्तपौत्रप्रभृत्यपत्यरूपं, तदर्थकत्वञ्च वास्तवं, शास्त्रप्रक्रियानिर्वाहाय कल्पितं वा। परत्र लौकिकग्रहणमपि यत्र शास्त्रीयग्रहणे गमकाऽभावस्तत्रैव। अत एव 'कण्वादिभ्यो गोत्रे' (४.२.११७) इत्यत्र 'अणिञोः' (४.१.३८) इत्यादौ च शास्त्रीयस्यैव ग्रहणम्"[14] इति।

वस्तुतस्तु अयमेव विस्तारो गोत्रसंज्ञायाः लौकिकपारिभाषिकार्थनिर्णयेऽस्ति। अत्र नागेशेन

[13] लघुशब्देन्दुशेखरः(पञ्चमो भागः), हरिनारायण तिवारी (सम्पा.)। पृ. २९

[14] तदेव। पृ. ६३-७१

'यञञोश्च' इति सूत्रविचारे गोत्रस्य स्वरूपनिर्णयः विस्तरेण व्याख्यातः। तत्र च प्रथमयुक्तिं व्याचष्टे- सूत्रेऽस्मिन् 'यस्कादिभ्यो गोत्रे' (अष्टाध्यायी, २.४.६३) इत्यतः गोत्रपदमनुवर्तते। परन्तु तस्य प्रवराध्यायप्रसिद्धवाचित्वं तथा गोत्रवाचित्वं यञञोः नास्तीत्यभिप्रायेण वृत्तौ तदन्तग्रहणम्। तेन गोत्रे यद् यञन्तम् अञन्तं च तयोः अवयवयोः लुग्भवति बहुत्वविवक्षायां, न तु स्त्रीत्वे इति सूत्रार्थः। ततश्च सूत्रसन्दर्भे गोत्रस्यार्थविचारे कौमुद्यामुत्तरयति यत् प्रवराध्यायप्रसिद्धं तदेव गोत्रमिति। अतोऽत्र गोत्रस्य लौकिकत्वं सिद्धमिति। ततश्च द्वितीययुक्तिं व्याचष्टे- 'स्त्रीभ्यो ढक्' (अष्टाध्यायी, २.४.२२०) इति सूत्रविचारसमये 'गोत्रे' इत्यस्य अधिकारत्वेन पाठः। अतः तत्प्रवृत्तिः गोत्रार्थे एव भवितुमर्हति। परन्तु गाङ्गेय इत्यादौ स्त्रीत्वविशिष्टढगन्तव्यवहारे गोत्रत्वस्य अभावो दृष्टोऽस्ति। अपि तु अनन्तरापत्यार्थे सिद्धे कथमस्य सूत्रस्य प्रवृत्तिरिति शङ्कायामुत्तरयति- अत्र आरोपितगोत्रसाहाय्यात् ढकः साधुत्वं वेदितव्यम्। ततश्च तृतीययुक्तिमाप्नोति- कुत्र शास्त्रीयगोत्रस्य ग्रहणं सम्भवतीति। शास्त्रीयगोत्रस्य ग्रहणं तत्रैव भवति यत्र युवत्वाऽनाक्रान्तत्वेन पौत्रप्रभृति-अपत्यं प्रयुक्तम्। एवञ्च गमकाभावे अर्थात् प्रत्ययान्ते गोत्रत्वस्य ग्रहणे लौकिकगोत्रस्य ग्रहणं सिद्ध्यति। अत एव प्रकृतसूत्रे गमकाभावे लौकिकगोत्रे विवक्षिते यञन्ताञन्तावयवयोः बहुत्वे लुक्स्यात्। तस्मात् पौत्राः दौहित्राः इत्यादिप्रक्रियायां बहुत्वे लुग् न भवति। यतोऽत्र पौत्र-इत्यादिशब्दः पारिभाषिक-गोत्रत्वेन पर्यवसितः। अतः प्रत्ययकृतबहुत्वस्य बोधनेऽपि अञ्प्रत्ययस्य अलुगिति सिध्यति। यथा पुत्रस्य गोत्रापत्यं, दुहितुः गोत्रापत्यम् इत्यादौ च पारिभाषिकगोत्रमेव बोध्यं बहुत्वबोधकप्रत्ययकृताञ्प्रत्ययस्य लुक्प्रयुक्तत्वादिति। एतादृशस्य व्याख्यानस्य सूक्ष्मरूपेण परिष्कारार्थं बोलमनोरमाकृत् शब्देन्दुशेखरोक्तविचारं तट्टीकायां दिङ्मात्रेणाचक्षते।

**उपसंहारः**

बह्वीषु सिद्धान्तकौमुदीव्याख्यासु एका बालमनोरमैव ग्रन्थाक्षरसंलापनेन पाठकानां हृदयेषु निहितभावा विजयते। अस्याः प्रणेत्रातिविशदमतिप्राञ्जलमतिसरलञ्च विलिख्य वस्तुतो बहूपकृताः पाठकाः। इयं बालमनोरमा मूलग्रन्थस्य विशदीभूता व्याख्या वर्तते, परन्तु सिद्धान्तकौमुदीगतमूलानुक्तशङ्कासमाधानैः तथा तत्र ग्रन्थान्तरप्रभावैः सेयमस्पृष्टा एवेति। यतो हि कुत्रचित् मतमनुक्त्वा केवलमेव ग्रन्थान्तराणां नामोत्थाप्य 'स्पष्टम्' इत्युक्त्वा प्रसङ्गान्तरम् इतवान्। तस्मात्तत्र अध्येतॄणां सन्देहो भवति। तदर्थं मया तत्तद्ग्रन्थेभ्यः वृत्तिः पङ्क्तिर्वा समाकल्य शोधकार्येऽस्मिन् विस्तरेणालोच्यते। तेन बालमनोरमायां तत्तद्ग्रन्थानां यादृशः प्रभावः तदेवावगम्यते। किञ्च तदुक्तिः भाष्यमतानुसारी न वेति एवावगम्यते। तदर्थमत्र शोधपत्रे अनेकत्रोल्लिखितानां ग्रन्थान्तरप्रभावाणामेकत्र उपस्थापनं तथा सरलभाषया व्याख्यानञ्च करिष्यामि, येन अध्येतारः मूलग्रन्थार्थग्रहणसमर्थाः व्याख्यानोक्तशङ्कासमाधानव्युत्पन्नाश्च भवेयुः इति मन्ये। ततो ग्रन्थान्तराणां प्रभावालोचने इयं ग्रन्थगतटीका महती मेदुरा सञ्जाता भविष्यतीति। परिशेषे एतदेव वक्तुं शक्यते यद् अनेन प्रकारेण चिन्तने तथा व्याख्याने सति बालमनोरमायाः कीदृशी प्रासङ्गिकता वर्तते, किञ्च तस्यां टीकायां ग्रन्थान्तराणां कीदृशः प्रभावश्चेत्येतत् सर्वमेवावगम्यत इति शम्।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

## सहायकग्रन्थसूची


- अमरसिंहः। (१४०८)। *अमरकोषः*। भट्टाचार्यः, विद्यानिधिः, गुरुनाथः (सम्पा.)। कलिकाता: संस्कृत पुस्तक भाण्डार।
- सिंहः, अमरः। (१९०५)। *अमरकोषः*। भट्टः, रामेश्वरः (सम्पा.)। कल्याण-मुम्बई: लक्ष्मीवेङ्कटेश्वर मुद्राणालय।
- नागेशः। (२०१५)। *लघुशब्देन्दुशेखरः*। तिवारी, हरिनारायणः (सम्पा.)। वाराणसी: चौखम्भा संस्कृत भवन।
- नागेशः। (२०१२)। *लघुशब्देन्दुशेखरः*। मिश्रः, विश्वनाथः (सम्पा.)। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान।
- नागेशः। (२०१९)। *लघुशब्देन्दुशेखरः*। झा, वैद्यनाथः (सम्पा.)। जयपुरः राष्ट्रीय संस्कृत साहित्य केन्द्र।
- पतञ्जलिः। (२०१४)। *व्याकरणमहाभाष्यम्,* (चतुर्थो *भागः*)। जोशी, शास्त्री, भार्गवः (सम्पा.)। दिल्ली: चौखम्भा संस्कृत प्रतिष्ठान।
- पतञ्जलिः। (२०१४)। *व्याकरणमहाभाष्यम्,* (चतुर्थो *भागः*)। तिवारी, हरिनारायण (सम्पा.)। वाराणसी: चौखम्वा विद्याभवन।
- भट्टोजिदीक्षितः। (२०२१)। *वैयाकरणसिद्धान्तकौमुदी (द्वितीयो भागः)*। शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः (सम्पा.)। दिल्ली: मोतीलाल बनारसीदास इंटरनेशनल।
- भर्तृहरिः। (२०१९)। *वाक्यपदीयम्* । अवस्थी, शिवशङ्करः (सम्पा.)। वाराणसी: चौखम्वा विद्याभवन।
- वामनजयादित्यौ। (१९८७)। *काशिका* (चतुर्थो *भागः*)। त्रिपाठी, जयशङ्करलालः; मालवीयः, सुधाकरः (सम्पा.)। वाराणसी: तारा प्रिंटिं वर्क्स।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# रससिद्धान्ते भुक्तितत्त्वमेकं परिशीलनम्

**डॉ. प्रशान्तकुमारपण्डा**
**सहाध्यापकः विभागाध्यक्षश्च, संस्कृतविभागः**
**Udayanath Autonomous College Of Science & Technology**
**ओडिशा**

**प्रबन्धसारः**

*विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः इति भरतस्य रससूत्रम् अवलम्ब्य चत्वारो वादाः प्रवर्तिताः - भट्टलोल्लटस्य उत्पत्तिवादः, भट्टनायकस्य भुक्तिवादः, शङ्कुकस्य अनुमितिवादः, अभिनवगुप्तस्य अभिव्यक्तिवादः। एतेषु भट्टनायकस्य भुक्तिवादमवलम्ब्य विचारोऽत्र प्रवर्तते। मम्मटेनोच्यते "न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते" इति। एतेन शङ्कुकस्य अनुमितिवादस्य, भट्टलोल्लटस्य उत्पत्तिवादस्य, अभिनवगुप्तस्य च अभिव्यक्तिवादस्य निराकरणं भवति। भट्टनायकेन काव्ये अभिधामतिरिच्य भावकत्वभोजकत्वरूपौ द्वौ व्यापारौ परिकल्पितौ। भावकत्वं रसादिविषयं, भोजकत्वं च सहृदयविषयमिति। तन्मते संयोगपदस्य अर्थः भोज्यभोजकभावसम्बन्धः, निष्पत्तिपदस्य अर्थो भोगः आस्वादनं वा। अतो मतमिदं रसभुक्तिवाद इत्युच्यते। अस्य च भुक्तिवादस्य आधाररूपेण केचन सांख्यदर्शनं, केचन मीमांसादर्शनं, केचन वेदान्तदर्शनं, केचन शैवदर्शनं, अन्ये शैवमीमांसादर्शनं वा अङ्गीकुर्वन्ति। एतेषु विषयेषु विचारोऽत्र प्रस्तूयते।*

**कुञ्चीशब्दाः – भट्टनायकः, भुक्तिवादः, ध्वनिः, रसः, सहृदयः, भोजकत्वं चेत्यादयः।**

*******************************************************************************

रसनिष्पत्तिः संस्कृतकाव्यशास्त्रस्यात्यन्तमहत्त्वपूर्णविषयोऽस्ति। रसेतिहासारम्भो रसपरिभाषया तत्स्वरूपेण वा न हि, अपि तु रसनिष्पत्त्या प्रारभ्यते। संस्कृतकाव्यमवलम्ब्योपलब्धमादौ भरतनाट्यशास्त्रं विषयस्यास्य प्रबलप्रमाणम् अस्ति[1]। तद्रससूत्रप्रयुक्तसंयोगनिष्पत्तिशब्दयोः भारतीयदर्शनानुरूपिण्यो व्याख्याः समासाद्यन्ते।

भारतीयदर्शनग्रन्थेषु "संयुक्तव्यवहारहेतुः संयोगः" इत्युभयपृथग्द्रव्यसम्बन्ध्यसमानाधिकरणत्वं संयोगत्वम् उच्यते। कारणकार्यसम्बन्धः संयोगो नास्ति। पृथगस्तित्वसम्भवाद् भरतरससूत्रे निष्पत्त्यर्थम् उत्पत्तिरस्ति। भारतीय-दर्शनसम्प्रदायेषु कारणात् कार्योत्पत्तिचर्चायां चर्चितं यत् कारणस्य कार्येणाऽनन्यथासिद्धो नियतपूर्ववृत्तिसम्बन्धो भवति[2]। तथा कारणसामग्र्युपस्थित्या सहैव कार्योत्पत्तिप्रतिबन्धकाभावोऽप्यावश्यकः; किन्तु भरतरससूत्रे प्रयुक्तः संयोगशब्दो दर्शनसंयोग-शब्दात् सर्वथा भिन्नोऽस्ति, तस्य विभावानुभावव्यभिचारिभावपदार्थत्वाभावात्। सार्द्धमेव तस्योदाहरणमाध्यमेन संयोगस्पष्टीकरणं त्विदमेवाभिव्यनक्ति यद् विभावादीनां

---

[1] विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः। (ना० शा०, अध्यायः – ६, पृ० २२८)

[2] अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता। कारणत्वं भवेत् . (न्या० सि० मुक्ता० ६)

परस्परसंयोगो नानाव्यञ्जनौषधिसंयोग इव पृथग्भावाऽसहोऽस्ति। एतदेव नाट्यशास्त्रे स्पष्टमुल्लिखितम्[3]। दर्शनसंयोगस्तु पृथग्द्रव्यविद्यमान-सम्बन्धोऽस्ति। एवं भरतस्य निष्पत्तिरपि दर्शनस्योत्पत्तिनिकषोपले नहि कर्षणीया। यतो हि घटनिर्मितिपूर्वं मृत्तिकादीनां विद्यमानत्वमिव निष्पत्तिपूर्वं विभावादयो नहि विद्यन्ते, न च रसो घटादिरिव दृग्गोचरः। अतो भरतस्य निष्पत्ति-शब्दस्पष्टीकरणमपि दार्शनिकप्रभावशून्यमस्ति। भरतकाले यद्यपि भारतीय-दार्शनिकचेतना स्वविकसितावस्थां नान्वभवत्, तथापि भरतः संयोगनिष्पत्तिशब्दयोर्व्याख्यां दार्शनिकरूपेण नाभिधाय लौकिकव्यवहारिकरूपाभ्यां सम्भवतोऽनेनैव कारणेन चकार यत् तत्काले दर्शनं जीवनाद् दूरमेव विकसदलक्ष्यत। डॉ. कान्तिचन्द्रपाण्डेयोऽपीदम् एवोल्लिखति यद् भरते कोऽपि दार्शनिकवादप्रभावो नहि परिलक्ष्यते'। [4] चिन्तन-सूक्ष्मदार्शनिकशैलीपरिचितैः विद्वद्भिरेतयोः शब्दयोर्दार्शनिकव्याख्या विभिन्नविद्वन्मत-भेदालोचनप्रेरणाभूता कृता। भट्टलोल्लटः, शङ्कुकः, भट्टनायकः, अभिनवगुप्तश्चेति चत्वारः प्रमुखाचार्या बभूवुः।

भरतरससूत्रस्य तृतीयप्रमुखव्याख्याता भट्टनायकोऽस्ति। पूर्वं भट्टलोल्लट-शङ्कुकाभिनवगुप्तैः रसस्योत्पत्त्यनुमित्यभिव्यक्ति[5]परकव्याख्या विभाविता। भट्टनायक एतानि मतानि निराकृत्य भुक्तिवादनामकं नवीनं सिद्धान्तं परिकल्प्य वक्ति। नहि रसः[6] प्रतीयते नोत्पद्यते नाभिव्यज्यते। स रसः स्वगत-परगत-प्रतीतौ विप्रतिपत्तीः प्रदर्शयति।[7]

लोचन [8] -अभिनवभारती [9] काव्यप्रकाशा [10] धारैरस्य विषये वक्तुं शक्यते यदनेन काव्येऽभिधामतिरिच्य भावकत्वभोजकत्वे द्वौ नवीनौ व्यापारौ परिकल्पितौ। भावकत्व-व्यापारकार्यं नाट्ये विभावादिकं सामान्यं विधाय भोजकत्वव्यापारेण सहृदयसामाजिकेभ्यो

---

[3] यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिस्तथा नानाभावोपगमाद्रसनिष्पत्तिः। यथा हि - गुडादिभिर्द्रव्यैर्व्यञ्जनै-रोषधिभिश्च षाड्वादयो रसा निर्वर्त्यन्ते, तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति । (ना० शा०, अध्यायः - ६, २५१)

[4] But he has not accounted the appearance of all the constituents of aesthetic representation and philosophically for in the spectators consciousness, because he was primarily dram-aturgist and not a philosopher or prychologist (Comparative Aesthetics, P. 44)

[5] काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥ (ध्वन्यालोकः, १/५)

[6] भट्टनायकस्त्वाह - रसो न प्रतीयते, नोत्पद्यते, नाभिव्यज्यते, स्वगतत्वेन हि प्रतीतौ करुणे दुःखित्वं स्यात्। स्वगतपरगतत्वादि च पूर्ववद्विज्ञेयम् । (नाट्यशास्त्रम्, अध्यायः - ६, अभिनवभारतीटीका, पृ. ६४१)

[7] ननूक्तं भट्टनायकेन- रसो यदा परगततया प्रतीयते तर्हि ताटस्थ्यमेव स्यात्। (शिवप्रसादद्विवेदिसम्पादितः ध्वन्यालोकः, लोचनटीका, उद्योतः-२, पृ. १९६)

[8] तत्राभिधायकत्वं वाच्यविषयं, भावकत्वं रसादिविषयम् .... निजचित्स्वभावनिर्वृतिविश्रान्तिलक्षणः परब्रह्मास्वादसविधः । (तत्रैव, पृ. १९७)

[9] तस्मात् काव्ये दोषाभावगुणालङ्कारमयत्वलक्षणेन नाट्ये चतुर्विधाभिनयरूपेण निविडनिजमोहसंकटतानिवारणकारिणा ..... भोगेन परं भुज्यत इति । (नाट्यशास्त्रम्, अध्यायः - ६, अभिनवभारतीटीका, पृ. ६४३ - ६४५)

[10] न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते ... भोगेन भुज्यत इति भट्टनायकः । (काव्यप्रकाशः, पृ. १०६ - १०७)

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

रसभुक्तिमात्रमेवाऽस्ति। भोगोऽयमनुभवस्मरणाभ्यां विलक्षणो द्रुतिविस्तरविकासरूपो रजस्तमोवैचित्र्यानुविद्धसत्त्वमयचित्तस्वभावो निवृत्त्यानन्दरूपः परब्रह्मास्वादसहोदररूप एवं विश्रान्तिविगलितविभेद्यान्तरस्थिररूपोऽस्ति। संक्षेपेणेदमेव भट्टनायकरमविषयकमतं यत् संयोगपदस्य [11] अर्थो भोज्यभोजकभावसम्बन्धस्तथा निष्पत्तिपदस्य अर्थो भोग आस्वादनं वास्ति। अतो मतमिदं रसभुक्तिवाद उच्यते।

भट्टनायकरसव्याख्याया दार्शनिकाधारोऽस्ति विवादास्पदम्। केचन विद्वांसोऽस्य रससिद्धान्तस्य सम्बन्धं केवलमेकेनैव दर्शनेन मन्यन्तेऽपरे दर्शनद्वयेन दर्शनत्रयेण वा तदत्र प्रपञ्चः।

**भट्टनायकभुक्तिवादाधारः सांख्यदर्शनम् –**

अत्र पक्षे गोविन्दठक्कुर [12] -विश्वेश्वरपाण्डेय [13] - ए० शङ्करन् [14] -एस्० के० डे [15] आचार्यविश्वेश्वर [16] - आनन्दप्रकाशदीक्षिताः [17] सन्ति। इमे सांख्यदर्शनाधारेण प्रकृतिगुणानां सत्त्वरजस्तमसां प्रयोगेण सिद्धान्तमिमममामनन्ति। गणेशशास्त्री चापि अभिनव-भारतीपङ्क्तीः समाश्रित्य [18] भट्टनायकभोगव्याख्यां सांख्यदर्शनाश्रितां मन्यते[19]। सांख्यदर्शनानुसारेणेमे त्रयो गुणाः प्रतिव्यक्ति विद्यमाना भवन्ति; किन्तु सुखानुभूतिकाले सत्त्वगुणोद्रेको रजस्तमसी अभिभावयति। अयमेव भट्टनायकभोगः। त्रिगुणात्मकप्रकृतिप्रभाववशात् पुरुषोऽपि नानारूपैः अभिव्यज्यते। इमे गुणा भिन्ना अपि प्रदीपवत् प्रकाशं[20] जनयन्ति। बुद्धौ यदेन्द्रियैः विषयविशेष उपस्थाप्यते, तदैव पुरुषोऽपि तेन संयुनक्ति। बुद्धिप्रतिबिम्बितविषयाणां चेतनपुरुषारोपेण पुरुषस्तान् स्वसम्बद्धान्नवगच्छति। अयमेव पुरुपकृतविषयभोगो रसानुभूतावपि। विभावादिसाधारणीकरणभावकत्वव्यापार इव सत्त्वबहुलबुद्धिसमारोपितविभावरत्यादिभावसम्वलितः पुरुषस्यैव रत्यादिभावभोगोऽस्ति।

---

[11] भट्टनायकस्तु स्थायिनो विभावादीनां च भोज्यभोजकभावसम्बन्धाद्रसस्य निष्पत्तिर्भोग इति सूत्रार्थः। (रसचन्द्रिकायाम्, ४५)

[12] भोगश्च सत्त्वगुणोद्रेकात् प्रकाशते य आनन्दस्तत्त्वाख्यो. विवृणुते (प्रदीपे, का० प्र०, पृ० ६६)।

[13] स्थायिनो भावकत्वव्यापारेण साधारणीकृतत्वात् सत्त्वादीनां त्रयाणामुद्रेके सुखदुःखमोहाः क्रमात् प्रकाशन्ते। उद्रेकश्च स्वेतरद्वयाभिभव इति सांख्यसिद्धान्तादिति व्याचख्यौ। (रसचन्द्रिकायाम्, पृ० ४६)

[14] For this conception of Bhoga Bhatta Nayaka oppears to have taken the the….. Sankhya philosophers.(Some concepts of Alankarashastra, p. 103)

[15] (a) Bhatta Nayaka seems to follow the Sankhya doctrine. S. K. De, C. Some problems of Sanskrit Poetics, p. 20)

(b) Bhatta Nayaka in his Peculiar theory of aesthetic engoyment (Bhoga) is subatantially following the teaching of Sankhya philosopher.(S. K. De, History of Sanskrit Poetics, Vol. II, P. 12)

[16] आचार्यविश्वेश्वरकृतहिन्दीव्याख्योपेतः काव्यप्रकाशः, १०७।

[17] आनन्दप्रकाशदीक्षितविरचितः रससिद्धान्तः, पृ० ८१।

[18] सत्त्वोद्रेकप्रकाशानन्दमयनिजसंविद्विश्रान्तिलक्षणेन परब्रह्मास्वादसविधेन भोगेन परं भुज्यत इति। (नाट्यशास्त्रम्, अध्यायः – ६, अभिनवभारतीटीका, पृ. ६४५)

(अभि० भा०, भा० १, ५० २७७)

[19] Bhatta Nayaka it seems, in his exposition of aesthetic (Bhoga) mainly follows the teaching of Sankhya philosophy.

(The philosophy of Aesthetic pleasure, P. 139)

[20] सांख्यकारिका-१३।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

सत्त्वगुणस्य लघुप्रकाशकत्वाद् भोगोऽयं प्रकाशात्मिकैवम् अनुभूतिरस्ति। यस्यां सत्त्वधर्मसुखस्यैवानुभवो नहि रजस्तमःसन्निकर्षेण दुःखादीनाम्।

सांख्यदर्शनाश्रितस्य भट्टनायकसिद्धान्तस्य स्वीकारे इमा विप्रतिपत्तयः सन्ति –

(१) अभिनवगुप्तप्रस्तुतभट्टनायकसिद्धान्ते [21] "भोगः" अनुभवस्मृत्यादिज्ञानसामान्यरूपेभ्यो भिन्नः, एवं चित्तवृत्तिविस्तारविकासदशाभिर्युक्तो भवति। चित्तस्येमा दशाः सत्त्वरजस्तमसां नहि कारणं वक्तुं शक्यन्ते सत्त्वस्योद्रेकत्वात्।

(२) रसभोगाय प्रकाशानन्द इति कथनं सांख्यदृष्ट्यानुपपन्नं प्रकाशानन्दाय विशुद्धसत्त्वावकाशत्वात्, किन्त्वत्र रजस्तमोऽनुविद्धसत्त्वोद्रेकिचित्तनिरूपणमस्ति।

(३) रसदशायाः परब्रह्मास्वादसविधकथनमपि सांख्यदृष्ट्यानुपपन्नम्।

(४) सांख्यदृशा रससंविद्विश्रान्तिरपि वैषयिकसंस्पर्शेन नहि सम्भविनी। सांख्ये प्रवृत्तिविकारभूतचित्तम् अनुभवादिसमस्तप्रक्रियाधारोऽस्ति, निःसङ्गश्च पुरुषः; किन्तु भट्टनायकमते रससिद्धान्तवर्णित-संविद्वैषयिकसंस्पृशान्नहि निःसङ्गः पुरुषः। संक्षेपेण भट्टनायकभुक्तिवादे सांख्यगुणवादप्रभावो रजस्तमोऽनुविद्धसत्त्वोद्रेकिचित्तविवेचनान्न ह्यग्रेसरः।

**भट्टनायकभुक्तिवादाधारो मीमांसादर्शनम् –**

आचार्याभिनवगुप्तो [22] लोचनाभिनव-भारत्योः[23] भट्टनायकं जैमिनिमतानुयायिनम् उक्त्वा मीमांसकभावनासिद्धान्तं तद्रसव्याख्याघटितं प्रतिपादितवान्। अतः पूर्वमीमांसाया भावनावाद एव प्रथमं प्रकाशतेऽत्र।

**पूर्वमीमांसा-भावनावादः**- भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापार-विशेषः[24]। यज्ञेन स्वर्गप्राप्तिरिति सामान्यार्थः। भावनाक्रियावादि-मीमांसको यज्ञेन स्वर्गो भावितो भवतीति वक्ति। क्रियैव भावना, सा द्विविधा[25] – शाब्दी, आर्थी च। शाब्दी भावना सा या लिङ्त्वांशेनोच्यते। लिङ्श्रवणेऽयं मां प्रवर्त्तयतीत्यतो मत्प्रवृत्त्यनुकूलव्यापारवानयमित्यस्य

---

[21] भाविते च रसे तस्य भोगो योऽनुभवस्मरणप्रतिपत्तिभ्यो विलक्षण एव द्रुतिविस्तर-विकासात्मा रजस्तमोवैचित्र्यानुविद्धसत्त्वमयनिजचित्स्वभावनिर्वृत्तिविश्रान्तिलक्षणः परब्रह्मास्वाद-सविधः। (शिवप्रसादद्विवेदिसम्पादितः, ध्वन्यालोकः, लोचनटीका, उद्योतः-२, पृ. १९७)

[22] न च निःश्वासेनान्ध इवादर्शः स इव चन्द्र इति कल्पना युक्ता। जैमिनीयसूत्रे ह्य व योज्यते, न काव्येऽपीत्यलम्। (तत्रैव, पृ. १७२)

[23] यत्तु भट्टनायकेनोक्तं सिद्धेरपि नटादेरङ्गत्वं व्रजन्त्यास्तत्पक्षेऽयमिति ... केवलं जैमिनिरनुसृत इत्यलमनेन। (नाट्यशास्त्रम्, तृतीयो भागः, अध्यायः – २७, कारिका-६, अभिनवभारतीटीका, पृ. ४८४)

[24] भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः (अर्थसंग्रहे, पृ० २३)

[25] सा द्विधा - शाब्दी भावना, आर्थी भावना चेति। शाब्दी भावना तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः। सा च लिङ्त्वांशेनोच्यते। लिङ्श्रवणेऽयं मां प्रवर्तयति, मत्प्रवृत्त्यनुकूलव्यापारवानयम्" इति नियमेन प्रतीतेः। यद्यस्माच्छब्दान्नियमतः प्रतीयते तत्तस्य वाच्यम्। यथा 'गामानय' इत्यस्मिन् वाक्ये गोशब्दस्य "गोत्वम्"। (तत्रैव, २३ - ३०)

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

नियमेन प्रतीतिः। अनेन शब्देन यन्नियमतः प्रतीयते तत्तस्य वाच्यं यथा गामानयेति वाच्यं गोशब्दस्य गोत्वं शाब्द्यां भावनायां साध्यविषये तिस्रोऽपेक्षा भवन्ति[26] - साध्यं, साधनम्, इतिकर्तव्यताञ्च। प्रयोजनेच्छाजनित-क्रियाविषयव्यापार आर्थी भावनालक्षणम्[27]। आर्थ्यां भावनायामपि [28] शाब्दीभावनावदेव साध्यसाधनेति-कर्तव्यताः अपेक्ष्यन्ते। यथा यजनक्रियायाः[29] साध्यं स्वर्गादयः। यज्ञं तत्साध्यस्य साधनं करणं वा। प्रयाजादयो यज्ञक्रियाकलापा इतिकर्तव्यताः ।

आचार्याभिनवगुप्तो लोचने [30] मीमांसाभावनां भट्टनायकरससिद्धान्तपक्षे चर्चयन् साध्यत्वेन रसं, साधनत्वेन व्यञ्जनाम्, इतिकर्तव्यतात्वेन गुणालङ्काराद्यौचित्यं स्वीकरोति। भट्टनायकः शब्दस्य व्यापारत्रयम् अभिधा-भावना-भोगीकरणानि मिनोति। तेषु [31] वाच्यालङ्कारादयोऽभिधाविषयरूपेणोपतिष्ठन्ते। अनेनैव भावनाव्यापारेण श्रृङ्गारादि-रससमूहो भावितो भोगीकरणरूपसिद्धिरुपयुक्तपुरुषे विशेषरूपेणानुभूयते ।

भट्टनायकभुक्तिवादो मीमांसकभावनापक्षदर्शनेन प्रतीयते यद् अत्र रसः साध्यं विभावादि साधनं तथा साधारणीकरणमितिकर्तव्यता इति; किन्तु अभिनवगुप्तेन यद्व्यञ्जनासाध्यं मन्यते तद् भट्टनायकमतेनानुपपन्नं, भट्टनायकेन व्यञ्जनाव्यापारस्यामान्यत्वात्। शाब्द्यार्थीभावनारूपेण भट्टनायकसिद्धान्तालोचनेऽपि न रसस्य शाब्दी भावना युक्ता न चार्थी भावना, शाब्दीभावनायां शब्द-श्रवणादिनार्थस्य नियमेन प्रतीयमानत्त्वात्। यथा गोशब्देन गोत्वस्य; किन्तु रसप्रसङ्गे नहि शब्दश्रवणेन नियमतो रसप्रतीतिर्न हि रसो विभावादिवाच्यम् ।

भट्टनायकरससिद्धान्तार्थीभावनाऽपि न हि समीचीना, आर्थीभावनाया अर्थविषयकव्यापारत्वाद् यत्रोक्तं प्रयोजनस्य स्वर्गादिरूपस्य इच्छा रागविशेषः फलेच्छा-साधनमुपसंक्रामतीति न्यायेन। तेन च रागविशेषेण जनितो यो यागादिरागविषयः पुरुषस्य व्यापारविशेषः सार्थीभावनेत्यर्थः [32] । यथा

---

[26] सा च भावनांशत्रयमपेक्षते (१) साध्यम् (२) साधनम् (३) इतिकर्तव्यतां च । कि भावयेत् ? केन भावयेत् ? कथं भावयेत् ? इति । (तत्रैव, पृ. ३९)।

[27] प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थीभावना । तत्रैव पृ. ४८)

[28] साप्यंशत्रयमपेक्षते – (१) साध्यम्, (२) साधनम् (३) इतिकर्तव्यतां च। किम्भावयेत् ? केन भावयेत् ? कथं भावयेत्? इति। (तत्रैव, पृ. ५२)

[29] तत्र साध्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेनान्वेति। साधनाकाङ्क्षायां यागादिः करणत्वेनान्वेति। इतिकर्तव्यताकाङ्क्षायां प्रयाजाद्यंगजातमितिकर्तव्यतात्वेनान्वेति। (तत्रैव, पृ. ५२)

[30] तस्माद्व्यञ्जकत्वाख्येन व्यापारेण गुणालङ्कारौचित्यादिकये-तिकर्तव्यतया काव्यं भावकं रसान् भावयतीति त्र्यंशायामपि भावनायां करणांशे ध्वननमेव निपतति। (शिवप्रसादद्विवेदिसम्पादितः ध्वन्यालोकः, लोचनटीका, उद्योतः-२, पृ. २०१-२०२)

[31] अभिधा भावना चैव तद्भोगीकृतमेव च।
अभिधाधामतां याते शब्दार्थालङ्कृती ततः॥
भावनाभाव्य एषोऽपि श्रृङ्गारादिगणोऽभवत्।
तद्भोगीकृतरूपेण व्याप्यते सिद्धिमान् नरः॥
(मधुसूदनशास्त्रिसम्पादितनाट्यशास्त्रम्, अध्यायः – ६, अभिनवभारतीटीका, पृ. ६४७)

[32] प्रयोजनस्य स्वर्गादिरूपफलस्य येच्छा रागविशेषः फलेच्छासाधनमुपसंक्रामतीति न्यायात्, तेन च रागविशेषेण जनितो यो यागादिक्रियाविषयः पुरुषस्य व्यापारविशेष साऽऽर्थी

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

स्वर्गादीच्छुको यज्ञादिव्यापारविशेषप्रवृत्तो जन एव न हि तथा काव्यपक्षेऽत्र सामाजिकस्येच्छाश्रयत्वान्नटादि-रङ्गमञ्चोपस्थित-पात्राणां व्यापारविशेषत्वाच्च। अत एव वक्तुं शक्यते यन्मीमांसाभावनावादे भट्टनायकभुक्तिवादो न हि सुचारुरूपेण घटते।

**भट्टनायकभुक्तिवादाधारः - वेदान्तदर्शनम्**

डॉ० राममूर्तित्रिपाठी स्वग्रन्थे रसविमर्शाख्ये साधयति यत् भट्टनायक-रसव्याख्यायामद्वैतवेदान्त-प्रभावोऽस्ति, तदत्र तर्काः-

लोचनाभिनवकाव्यप्रकाशेषूपलभ्यमानभोग-सिद्धान्ताधारेणाद्वैतवादभूमिका-स्थितोऽयं प्रतिभाति। काव्यप्रदीपस्य विख्यातप्रभाटीकाकारवैद्यनाथपायुगुण्डे प्रदीपकारसांख्यपरकोक्तिविपरीतं पूर्णतोऽद्वैत-वेदान्तालोकेन व्याकुर्वन् काव्यरसमात्मानन्देन सम्बन्धेन वक्ति यत्सत्त्वोद्रेकेन चैतन्यात्मकानन्दावरणं दूरीभवति तथा निरावरणं चैतन्यानन्दसंवलित-स्थायिभावस्य रसात्मकभोगो भवति।

**भट्टनायकभुक्तिवादाधारः -शैवदर्शनम्**

काव्यप्रकाशस्य हिन्दीव्याख्याकारो डॉ० सत्यव्रतसिंहो भट्टनायकरससिद्धान्तं शैवदर्शनाश्रितं मन्यते।

(क) महाशैवदार्शनिकाभिनवगुप्तेनेश्वरप्रत्यभिज्ञा अभिनवभारत्याम् अनेकस्थलेषु प्रतिपादिता - संविद्विश्रान्तिविमर्शरूपाऽहं रूपादेवानन्दमयः। भट्टनायकोऽपि भोगस्वरूपं दर्शयन् संविद्विश्रान्तिशब्दं प्रयुङ्क्ते।

(ख) रसव्याख्याप्रयुक्तसत्त्वरजस्तमः स्वरूपमीश्वर-प्रत्यभिज्ञाविशिष्टानुरूपमस्ति। किन्तु भट्टनायकभोग-सिद्धान्तः शैवदर्शननिकषोपले न हि तथ्यतामाप्नोति। शैवदर्शनमनुसृत्य सत्त्वरजस्तमसां परिणामसुखदुःख-मोहातिरिक्तं नान्यद् भोग इति। विषयविशेषा-नुभूतिस्वरूपभोगो विषयिविषयद्वैतबोधकोऽस्ति। किन्तु अभिनवगुप्तः परब्रह्मास्वादसहोदर इत्युक्त्वा गुणातीतं मन्यते। विश्रान्तिकथनेनेयं शैवभोगस्थितिर्नहि, अपि तु भोगस्थितिर्भवति। परं भोगस्तु केवलं निरपेक्षानन्दोऽस्ति, आत्मस्थात्, अतो नहि भट्टनायकभुक्तिवादः शैवदर्शनाश्रित इति।

**भट्टनायकभुक्तिवादाधारः - सांख्यमीमांसादर्शने**

पी० बी० काणेमहोदयो भट्टनायकरससिद्धान्ते सांख्यमीमांसादर्शनप्रभावं मन्यते[33]। अभिनवगुप्तः प्रस्तुताभिनवभारतीलोचनयोरुद्धरणाभ्यामेव मीमांसक-भावनावादाधारेण भट्टनायकसिद्धान्तं मीमांसाश्रितं भुक्तिवादं च सांख्याश्रितमङ्गीकरोति। भट्टनायकरस-व्याख्यायाः सांख्यमीमांसकतत्त्वे सम्भाविता विप्रतिपत्तयः पूर्वमेव कथितास्तदत्राऽपि घटन्ते।

**भट्टनायकभुक्तिवादाधारः - सांख्यवेदान्तदर्शने**

डॉ० कान्तिचन्द्रपाण्डेयः स्वशोधग्रन्थे स्वतन्त्रकलानाम्नि वक्ष्यमाणोक्तीभ्यां भट्टनायकं वेदान्तप्रभावितं स्वीकरोति।

**(क)** भरतनाट्यशास्त्रस्य सर्वप्रथमश्लोकस्य ‘ब्रह्मणा यदुदाहृतम्’ इत्यस्य वेदान्तानुरूपव्याख्यां तनोति।

---

भावनेत्यर्थः। (अर्थसंग्रहः, रामेश्वरभिक्षुकृतमीमांसार्थसङ्ग्रह-कौमुदी, पृ. ४८)

[33] “न च कल्पना युक्ता। जैमिनिसूत्रे ह्येव योज्यते न काव्येऽपीत्यलम्”, इति। (पी० वी० काणे, संस्कृत काव्य शास्त्र का इतिहास, पृ. २८०)

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**(ख)** विशुद्धशब्दप्राधान्यं प्रतिपादयति यत् केवलं वेदान्तप्रभाववशात् सम्भवति। भट्टनायकभोगस्तेन सांख्यानुसारी स्वीकृतः।

**भट्टनायकभुक्तिवादाधारः शैवमीमांसादर्शने-**

डॉ० प्रेमस्वरूपगुप्तो [34] भट्टनायकभावकत्वव्यापारं मीमांसाभावनावादप्रभावितं मन्यमानो वक्ष्यमाणतर्कैः तद्भोजकत्वव्यापारं शैवदर्शनाश्रितमवोचत्–

(क)भट्टनायकस्य कतिपयश्लोकाः शैवागमिकैरुद्धृताः।

(ख) शैवसिद्धान्तश्रितैव

(ग) ब्रह्मणा यदुदाहृतमित्यस्य व्याख्या शैवागमानुसारिणीत्यपि साधु। अत्र भोगशब्दस्य शैवदर्शनमनुश्रित्य व्याख्यायामनुपपत्तयः प्रदर्शिताः। "ब्रह्मणा यदुदाहृतम्" इत्यस्य व्याख्याप्रसङ्गेन कथयितुं शक्यते यद्यदि भट्टनायकदृष्टिः शैवी भवेत् तर्हि नाट्यशास्त्र-प्रथमश्लोकव्याख्यायां जगत्कल्पनाभागो निःसारो नेत्युच्येत। अभिनवगुप्तेन कृता भट्टनायकमतानां शैवाधारिणी टीका नहि पुष्टा, यतो हि यदि शैवदार्शनिकाचार्यमतं पण्डितराजजगन्नाथेन वेदान्तानुगुणं व्याख्यातं तर्हि शैवत्वादभिनवगुप्तोऽपि भट्टनायकव्याख्यां शैवानुरूपिणीं कर्तुं शक्नोति स्म। उद्धरणप्रस्तुतीकरणमप्यपुष्टं कस्याप्युद्धरणविशेषस्य कुत्रापि पुष्टये स्थापनत्वात्।

**भुक्तिवादाधारमीमांसावेदान्तसांख्यदर्शनानि –**

रसचन्द्रिकाकारः पण्डितविश्वेश्वरपाण्डेयो भट्टनायकरससिद्धान्तं भावनाधारेण मीमांसया, सत्त्वरजस्तमोगुणाधारेण सांख्येन, भोगाधारेण च वेदान्तेन मन्यते। अत्र सम्भाविता विप्रतिपत्तयः प्रतिपादिताः।

अतः सम्पूर्णविवेचनया संक्षेपेण वक्तुं शक्यते यद् भट्टनायकभुक्तिवादः सांख्यवेदान्तप्रभावित इति समीचीनं प्रतिभाति।

## सहायकग्रन्थसूची


- काणे, पी. वी.। (प्रथमसंस्करणम्, १९६६)। *संस्कृत काव्यशास्त्र का इतिहास*। शास्त्री, इन्द्रचन्द्रः (अनुवादकः)। दिल्ली : मोतीलाल बनारसीदास।
- गुप्तः, प्रेमस्वरूपः। (१९६२)। *रसगङ्गाधर का शास्त्रीय अध्ययन*। आलिगडः : भारत प्रकाशन मन्दिर।
- पाण्डेयः, कान्तिचन्द्रः। (प्रथमसंस्करणम्, १९७८)। *स्वतन्त्रकलाशास्त्र*। वाराणसी : चौखम्बा विद्याभवन।
- मम्मटः। *काव्यप्रकाशः* (विश्वेश्वरसिद्धान्तशिरोमणि-कृतहिन्दीव्याख्यासहितः। (२०२१)। नरेन्द्रः (सम्पा.)। वाराणसी : ज्ञानमण्डल लिमिटेड।
- लौगाक्षिभास्करः। *अर्थसंग्रहः*। (२००९)। मुसलगाँवकरः, राजेश्वरशास्त्री (सम्पा.)। वाराणसी : चौखम्भा संस्कृत संस्थान।
- अभिनवगुप्तः। (१९६०)। *अभिनवभारती के तीन अध्याय* (प्रथम द्वितीय तथा षष्ठ)। नगेन्द्रः (सम्पा.)। दिल्ली : हिन्दी विभाग, हिन्दी विश्वविद्यालय।


[34] रसगङ्गाधर का शास्त्रीय अध्ययन, पृ०, १६२-१६५।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025


- भरतमुनिः। (१९८१)। नाट्यशास्त्रम् (तृतीयो भागः)। शास्त्री, मधुसूदनः (सम्पा.)। वाराणसी : वाराणसी-हिन्दु-विश्वविद्यालयः।
- आनन्दवर्धनः। (१९९८)। *ध्वन्यालोकः*। दाहालः, लोकमणिः (सम्पा.)। दिल्ली : भारतीय विद्या प्रकाशन।
- आनन्दवर्धनः। (२०१५)। *ध्वन्यालोकः*। द्विवेदी, शिवप्रसादः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- पाण्डेयः, विश्वेश्वरः। (१९८३)। रसचन्द्रिका। भण्डारी, विष्णुप्रसादः (सम्पा.)। वनारस : चौखम्बा संस्कृत सीरीज आफिस।
- भरतमुनिः। (१९७१)। नाट्यशास्त्रम् (अभिनवगुप्तप्रणीताभिनवभारतीसहितम्, तस्य प्रथमो भागः)। शास्त्री, मधुसूदनः (सम्पा.)। वाराणसी : काशीहिन्दूविश्वविद्यालयः।
- भरतमुनिः। (१९८९)। नाट्यशास्त्रम् (सटिप्पण-नाट्यचन्द्रिका-हिन्दी-व्याख्यासहितम्- प्रथमो भागः)। रस्तोगी, सुधी (सम्पा.)। वाराणसी : कृष्णदास अकादमी।
- भट्टाचार्यः, विश्वनाथपञ्चाननः। (२०१४)। न्यायसिद्धान्तमुक्तावली। शास्त्री, नारायणचरणः; शास्त्री, श्वेतवैकुण्ठः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत संस्थान।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# शाकुन्तले जनजातितत्त्वानि

**डॉ.लक्ष्मीकान्तषडङ्गी**
**सहाध्यापकः, संस्कृतविभागः, योगदा-सत्सङ्ग-पालपाडा-महाविद्यालयः**
**पश्चिमबङ्गः**

**प्रबन्धसारः**

*परमेश्वरेण सृष्टं जगदिदम् ।अत्र नास्ति केषामपि मनुष्याणाम् उच्चनीचभेदमनोभावः । सृष्टेः प्रारम्भे सर्वे अपि मानवाः विराट्पुरुषस्य शरीरात् समुत्पन्नाः । तस्मात् सर्वे अपि मानवाः ईश्वरस्यांशभूताः तथा सर्वेषां प्राणिनां हृदयेषु ईश्वरस्यावस्थानमस्ति । अस्मात् भारतीय-ज्ञानपरम्परायां जातिधर्मवर्णनिर्विशेषेषु सर्वेषां भारतीयानां समानता सर्वजनविदिता । अत्रापि भारतवर्षे यद्यपि प्राचीनकालात् गुणकर्मविभागशः चातुर्वर्ण्यं विदितमस्ति तथापि भारतीयजनसमुदायेषु जनजातीनां महत्त्वं, संस्कृतिः किञ्च प्राकृतिकपर्यावरणसंरक्षणे, स्वतन्त्रतासंग्रामे तेषामवदानमनस्वीकार्यम् । अतः भारतीय-ज्ञानपरम्परायां संस्कृतसाहित्ये तत्रापि कालिदासस्य शाकुन्तले महाकविकालिदासः जनजातितत्त्वस्य महत्त्वं सुचारुरीत्या प्रतिपादयति ।*

**कुञ्चीशब्दाः - उच्चनीचभेदमनोभावः, जगत्, ईश्वरः, संस्कृतिः, भारतीयज्ञानपरम्परा चेत्यादयः ।**

**********************************************************************

“**भारत आमार देश**
**आमरा सवाइ भारतवासी**”[1]

वैचित्र्यमयी खल्वस्माकं भारतभूमिः । परन्तु बहुषु वैचित्र्येषु ऐक्यं हि खल्वस्माकं भारतस्य बलम् । ऐक्यविधानम् ऐक्यरक्षणञ्चापि भारतवर्षस्य महल्लक्ष्यम् । वैचित्र्यपूर्णोऽयं भारतवर्षः विश्वस्य पुरतः अद्यापि तस्य सांस्कृतिकमूल्यबोधाय समादृतः । यत्र जाति-धर्म-भाषा-प्रकृति-आचार-व्यवहारादिषु सत्यपि विभेदे ऐक्यतायाः सुदृढबन्धनं भारतवर्षस्य ऐतिह्यं धारयति । कस्याश्चित् मनुष्यजातेः सम्यक् दर्शनं तेषां साहित्यादिभ्यः ज्ञायते । भारतीयसाहित्यग्रन्थाः स्मरणातीतकालाद् आरभ्य मुख्यतः संस्कृतभाषयैव निबद्धा विद्यन्ते । संस्कृतवाङ्मये एकोऽपि ग्रन्थस्तथा नास्ति यत्र भारतीयसंस्कृतेः सम्यक् दर्शनं नैव भवेत् ।[2] यस्य कस्यापि राष्ट्रस्यात्मा संस्कृतिः भवति । संस्कृत्या एव परिचीयते राष्ट्रस्य गौरवम् । रीतयो नीतयश्चापि प्रभाविताः भवन्ति तत्संस्कृत्या एव । राष्ट्रियसंस्कृतिरक्षायै सततं प्रयतते प्राणपणेनापि प्रत्येकं राष्ट्रम् । महनीया खलु भारतीया संस्कृतिः अतिशेते स्वगुणैरेषा निखिला अपि राष्ट्रस्तरीयाः संस्कृतीः । यतो हि अस्ति भारतीयसंस्कृतेः किञ्चित् विलक्षणं वैशिष्ट्यं यदस्य लक्ष्यञ्चेतरसंस्कृत्यपेक्षयाऽत्यधिकमुन्नतं महनीयमुदात्तं परमोपयोगि च । यथा राष्ट्रस्यात्मा संस्कृतिः भवति, तथैव तत्तत्संस्कृतेरपि भवति कश्चिदात्मा । सोऽयमस्माकं भारतीयानां संस्कृतिः त्यागमूला अध्यात्मप्रधाना च । तथाहि प्राणविनिमयेनापि अन्येषामुपकारसाधनमेव भारतीयसंस्कृतेः महत्

[1] बांला साहित्येर इतिहास.पृ.०३

[2] संस्कृत साहित्येर इतिहास.पृ.७६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

निदर्शनम्। अतः जनकोलाहलवर्जितानि परमशान्तानि रमणीयतराणि तपोवनानि भारतीयसंस्कृतेः जन्मभूमिः। तेषामेव कमनीयतमे स्वभावसरले क्रोडतले लालिता पालिता चेयम् अस्माकं संस्कृतिः। यया खलु मानवमस्तिष्कस्य संस्करणमभ्युदयो वा भवति सैव संस्कृतिरुच्यते। भारतीयानामस्माकम् एवंविधं तात्त्विकं कार्यजातं 'भारतीयसंस्कृतिः' इति शब्देन व्यपदिश्यते।[3]

भारतीयसंस्कृतेः प्रसङ्गः यद्युच्यते तत्तु आदिवासिसमाजमतिरिच्य नैव वर्त्तते। भारतस्य विविधेषु स्थानेषु उत्तरात् हिमालयादारभ्य कन्याकुमारीं यावत् पुनश्च पूर्वं सप्तपर्वतावृत्तारण्यस्य सजीवताया आरभ्य पश्चिमस्य मरुभूमिं यावत् सर्वत्रैव वयमेषाम् अवलोकनं कुर्मः। एषां भाषा, दैहिकगठनं, जीविका, धर्मः, विश्वासः जीवनधारणरीतिश्च अन्येभ्यः पृथगेव अस्ति। अपरपक्षेण सर्वे खलु आदिवासिनः समाजस्य भिन्नजाति-मनुष्येभ्यः पृथक् इति परिगणिताः सन्ति। साधारणतः एते आदिवासिसम्प्रदायाः अनग्रसरगोष्ठिरूपेण समाख्याताः सन्ति। समाजस्य मूलस्रोतोमनुष्याणां तुलनायाम् एते विविधरूपेणावहेलिताः भवन्ति। एते अनग्रसराः शिक्षायां, दारिद्र्यस्य करालग्रासेन च। 'आदिवासी' इति शब्दस्यार्थः भवति आदिम-निवासी। अर्थात् ये खलु एकदा अस्यैव देशस्य प्रथमा आदिवासिनः भवन्ति। इतिहासावलोकनेन जानीमः यदियं गोष्ठी एकदा मूलस्रोतसः जीवनस्य भावादर्शात् पश्चाद्वर्त्तिनी एका जातिः, या खलु, समाजस्य गतिवेगेन सह प्रचलितुं परिवर्त्तितुं चाक्षमा आसीत्। परवर्तिसमये एते एव आदिवासिरूपेण परिचिताः अभवन्। प्रकृतिनिर्भरशीलाः एते आदिममनुष्याः रक्षणशीलतायां तेषां स्वतन्त्रतां संस्थापयन्ति। अस्मात् अद्यापि अस्माभिः श्रोतुं शक्यते 'मादल' इत्यादिभिः वाद्यादिभि: सह वंशीसुरस्य समवेतपदध्वनिः। सुमधुरतालैः, छन्दोभिः, गानैश्च अस्माकं मनः किमपि सुदूरं समाकर्षयति, यत्र नास्ति प्रदूषणस्य अङ्गारस्य कृष्णधूमराशिः, संकीर्णमनसः द्वारः, सभ्यतायाः विषमयमुखस्य वेष्टनी च, प्रकृत्या सह निरवच्छिन्न-सम्पर्कः तेभ्यः यत्र असीमशक्तिं श्रद्धादिकं च प्रददाति। प्रकृतिनिर्भरशीलाः एते सम्प्रदायाः अद्यापि प्रकृतेः दानेन जीवनं यापयन्ति।[4]

संस्कृतवाङ्मयस्यावलोकनेन परिज्ञायते यत्, वैदिककालादेव प्रकृतिनिर्भरशीलाः खलु साधारणजनाः जनजातयः च। संस्कृतलौकिकसाहित्येऽपि नास्ति तस्य लेशोऽपि व्यतिक्रमः। लौकिकसंस्कृतसाहित्यजगति महाकविः कालिदासः प्रकृत्या सह जनजातेः सम्बन्धं सुमधुररीत्या बहुशो वर्णयति। कालिदासरचितस्य अभिज्ञानशाकुन्तलस्य **'धीवरवृत्तान्तः'** खलु साम्प्रतिकसमाजेऽपि सामाजिकमूल्यबोधं परिपुष्णाति। अस्यैव वृत्तान्तस्य अनुशीलनेन ज्ञायते यत्, कालिदासीयकाले सर्वासां वृत्तीनां समुचिता मर्यादा आसीत्। स्वीया वृत्तिः अपरदृष्ट्या 'निकृष्टा' इति जानन्तोऽपि जनाः स्ववृत्तिपालनाय कार्पण्यं नानुभवन्ति, प्रत्युत गर्वमेवानुभवन्ति। नाटकस्यास्य षष्ठाङ्कस्य प्रारम्भे दृश्यते राजश्यालकः तथा राजधानीनगरपालः जानुकः सूचकश्च

[3] नदिया जेलार इतिहास.पृ.०५

[4] नदिया जेलार इतिहास.पृ.०६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

महाराजदुष्यन्तनामाङ्कितमुद्रिकाहरणकारणात् धीवरम् एकं धृत्वा उत्पीडनजिज्ञासाभ्यां ज्ञातुमिष्टवन्तः यत्- '**मुद्रिकामिमां कस्मात् कथञ्च हृतवानिति**।' अस्यैव प्रश्नस्योत्तरे शक्रावतारवासी धीवरः अवदत् यत् **सः खलु जालोद्गालादिभिः मत्स्यान् आहृत्य परिवारं पोषयति** इति। तदा राज्ञः श्यालः धीवरस्य वचनमाकर्ण्य तम् अकथयत् - **विशुद्ध इदानीमाजीवः**। तदा धीवरः प्रत्युत्तरेण उक्तवान् यत् –'**भर्त्तः, मा एवं भण**।'

"**सहजं किल यद्विनिन्दितं न हि तत्कर्म विवर्जनीयम्।**

**पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः**॥[5]

अर्थात् यामेव वृत्तिमाश्रित्य जनाः जायन्ते सैव वृत्तिः अपरैः निन्दनीयाऽपि नैव परित्याज्या। यतो हि वेदज्ञः विप्रः अनुकम्पाशीलोऽपि यज्ञे पशुनिधनात् नैव निवृत्तः भवति । अत्र विशेषरूपेण लक्षणीयं यत्, महाकविकालिदासस्य समये तदानीन्तन-सामाजिक-अन्त्यजश्रेणी-जनाः स्वकीय-सहजवृत्त्या अपरैः विनिन्दिताः अपि तेन गर्वातिशयमनुभवन्ति न तु शोकाकुलिताः। न केवलमेतत्, अपि तु स्वमतप्रकाशे अपि सततमेव ते स्वतन्त्रा आसन्। श्रीमद्-भगवद्-गीतायां बहुषु स्थलेष्वपि अनुरूपं मन्तव्यं प्रतिपादितं भगवता श्रीकृष्णेन। यथा-"**सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्**"[6] इति।

अपि च-

"**श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वानुष्ठितात्।**

**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥**"[7] इति।

आलोचितेऽस्मिन् "**सहजं किल यद्......**" इत्यादिपद्ये नैके मन्यन्ते यत् अत्र बौद्धधर्मं प्रति विरोधः ब्राह्मणधर्मं प्रति समर्थनं च कालिदासेन प्रतिपादितम्। यतः '**अहिंसा एव बौद्धानां परमो धर्मः**'। यागयज्ञानुष्ठानं जीवहत्या च तेषां सन्निकटे अतीव विगर्हितकर्म इत्युच्यते। पुनश्च अपरस्मिन् पक्षे ब्राह्मणाः तेषां स्वधर्ममनुसृत्य अनुकम्पा-प्रवणा अपि यज्ञदिषु पशून् हत्वा सहजं कर्म सम्पादयन्ति। अस्मादत्र बौद्धधर्मं प्रति इङ्गितोऽस्ति इति केषाञ्चिन्मतमस्ति। परन्तु वयमेतत्तु जानीमः यत् कालिदासः धर्मप्रसङ्गे आसीत् नितरामुदारः सहनशीलश्च। विशेषतः शैवधर्मं प्रति कवेः परिलक्षितेऽपि समाकर्षणे शिवेन सह ब्रह्मणः, विष्णोश्च महिमा तेन प्रकाशितः। अतः विशेषरूपेण विचारविश्लेषणेन परिज्ञायते यत्, साधारणरूपेण धर्मान्तरं प्रति यद्यपि तेन अनाग्रहः न प्रकाशितः तथापि बौद्धधर्मं प्रति किञ्चित् अनादरः प्रदर्शितः। यद् भवतु नाम शाकुन्तले वर्णितधीवरवृत्तान्तात् तदानीन्तन- सामाजिकपरिस्थितेः एकं सुरम्यं चित्रं प्रदर्शितम्। तदा समाजे धीवरप्रभृतीनां जनजातीनां प्रतिदिनमाहृत्य भोजनव्यवस्था आसीत्। परन्तु परिश्रमस्य जातिगतवृत्तेश्च मर्यादाबोधः मनुष्येषु आसीदिति धीवरस्योक्त्या ज्ञायते। यज्ञे पशुवधः निन्दनीयः नासीदिति अनुमीयते। अस्मात् एतदपि बुध्यते यत् कालिदासस्य युगे ब्राह्मणधर्मस्यासीत् प्राधान्यं न तु बौद्धधर्मस्य। सुरक्षाकर्मिणः दुर्नीतिपरायणाः अत्याचारिणश्चासन्। संशयवशात् ते धीवरादिषु जनजातिषु प्रहारादिभिः दण्डैः

[5] अभिज्ञानशाकुन्तलम्.पृ.४२१

[6] श्रीमद्-भगवद्-गीता.१८.४८

[7] श्रीमद्-भगवद्-गीता.३.३५

स्वीकृतिमादातुं चेष्टितवन्तः। परन्तु धीवरादयः जनजातयः दृढसत्यपरायणा आसन्।[8]

एवञ्च नाटकेऽस्मिन् परिलक्ष्यते यत् दुष्यन्तशासिताः जनजातयः प्रजाः जात्या स्वभावेन च शुद्धाः शान्ताश्चासन्। यतो हि हीनवर्णेषु जायमाना अपि ते खलु सततं सत्पथमेव समाश्रयन्ते। तत्र कदापि न कोऽपि हीनवर्णस्य जनः सत्पथभ्रष्टः जायते। नाटकस्यास्य पञ्चमे सर्गे शारद्वतः दुष्यन्तस्य जनाकीर्णं राजभवनमालोक्य आत्मनः अस्थिरतां संसूचयन्नाह-

"**महाभागः कामं नरपतिरभिन्नस्थितिरसौ**
**न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते।**
**तथापीदं शश्वत्परिचितविविक्तेन मनसा**
**जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव**॥"[9]

अस्यायमेवार्थः राजा दुष्यन्तः कदापि स्वमर्यादायाः उल्लङ्घनं न करोति। पुनश्च वर्णेषु नीचः वर्णः शूद्रोऽपि कदाचित् विपथगामी न भवति अथवा कुकार्यं न सम्पादयति। किन्तु यतः सर्वदा मम मनः जनशून्यस्थाने संलग्नं भवति अतः एतत् पुरोदृश्यमानं लोकसङ्कुलं राजगृहम् अग्निपरिवेष्टितं गृहमिव चिन्तयामि। अस्मिन् श्लोके **'न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते'** इति वाक्यांशात् तत्रत्यानां जनजातीनां वर्णगतशुद्धतायाः परिचयः प्राप्यते। एवञ्च तपोवनादिवासिनां शारद्वतादिषु चित्तशान्तत्वं परिलक्षितम्। अतः अग्निपरिवृत्तं गृहं यथा प्राणभयात् परित्याज्यं, तथैव जनाकीर्णं स्थानं तेन निभृतवासिना त्याज्यमिति शारद्वतः मन्यते। जनशून्यप्रदेशे संवासाद् जनसंघट्टः तस्य सर्वथा असहनीयः स्यादिति भावः। निभृतस्थानवासिनः जनाः जनबहुले कोलाहलमुखरप्रदेशे कदापि क्षणमपि स्थातुं न शक्नुवन्ति। यतः एतादृशे प्रदेशे तेषाम् अवस्थानम् अभ्यासविरुद्धम्। अतः तदानीन्तकालीनाः जनजातयः निभृतस्थानवासिनः शान्तिप्रियाः सत्पथगामिनश्चासन् इत्यनुभूयते। एवञ्चाश्रमवासिनां रूपलावण्यादयोऽपि सातिशयमद्भूतपूर्वमासीदिति अभिज्ञानशाकुन्तलम् इति नाटकात् ज्ञायते। एतदपि प्रतिपादयितुं कालिदासेन दुष्यन्तमुखेन उक्तं यत्-

"**शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो जनस्य।**
**दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः**॥"[10]

अस्यार्थः यदि शकुन्तलारूपिणीनाम् आश्रमवासिनीनां मुनिकन्यानां रूपम् अन्तःपुरदुर्लभं भवति तर्हि एतदेव सत्यं यत् वनलताभिः यत्नपरिवर्धिता उद्यानलता अपि दूरीकृताः। यत्नकरणेन किं प्रयोजनं, यदि अयत्नपरिवर्धिताः वनलताः मधुराः दृश्यन्ते। अस्यायमेव विशेषः, यत् उद्यानलता उद्याने एव वर्धते, परं तु वनलता जीवति वनप्रदेशे। उद्यानलतावनलतयोर्मध्ये नूनमेव प्रभेदो वर्त्तते। उद्यानलता खलु अतीव यत्नेन लालिता सती वर्णगन्धैः मनोहारिणी भवति। पुनः वनलता अयत्नलालिता अपि सौन्दर्यसौगन्धादिभिः जनचित्तं सन्तोषयति। एवं स्वभावजाता अयत्नलालिता वनलता यदि गुणैः उद्यानलतामतिशेते, तर्हि तत्सत्यमेव विस्मयप्रदं भवति। आश्रमबालां दृष्ट्वा राजर्षि-दुष्यन्तः एवमवदत्। वनबालानां चित्तहारि रूपं प्रेक्ष्य राजा एतादृशं रूपलावण्यं राजान्तःपुरे अपि सुदुर्लभमिति

[8] अभिज्ञानशाकुन्तलम्.पृ.४२४

[9] अभिज्ञानशाकुन्तलम्.१.१६ पृ. १२६

[10] अभिज्ञानशाकुन्तलम्.५.१०

मन्यते। अनेन जनजातितुल्यानामुपवसतां आश्रमवासिनां सौन्दर्यमपि अतुलनीयमासीत् इति ज्ञायते।

महाकवेः कालिदासस्य असमान्यप्रतिभया क्षुद्रेऽस्मिन् प्रबन्धे जनजातीनां सहजकर्मणः, असामान्यसौन्दर्यस्य, सत्परायणस्य च अपूर्वं चित्रं सुरम्यशैल्या प्रस्फुटितम् इति दिक् ।

## सहायकग्रन्थसूची


- अभिज्ञानशाकुन्तलम्, हरेकृष्णशतपथी, कितावमहल, कटक, ओडिशा।
- नदीया जेलार इतिहास, लोकसंस्कृति ओ आदिवासी संस्कृति केन्द्र, तथ्य ओ संस्कृति विभाग , पश्चिमवङ्गः ।
- वांला साहित्येर इतिहास, पुस्तकभण्डारः, कोलकाता ।
- श्रीमद् भगवतगीता, गीताप्रेस्, गोरक्षपुर, उत्तरप्रदेश ।
- संस्कृत साहित्येर इतिहास, युधिष्ठिरगोप, संस्कृत वुक डिपो, कोलकाता।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# ‘कुट्टनीमतम्’-काव्ये प्रदर्शनकलायाः शास्त्रीयं सामाजिकं चानुशीलनम्

**डॉ. परिमल मण्डलः**
**सहायकाध्यापकः, संस्कृतविभागः, स्वर्णमयी योगेन्द्रनाथ महाविद्यालयः**
**पूर्वमेदिनीपुरम्, पश्चिमबङ्गः**

**प्रबन्धसारः**

*शोधपत्रमिदं कुट्टनीमतमिति नाम्ना संस्कृतकाव्ये वर्णितप्रदर्शनकलानां शास्त्रीयसामाजिकयोः सौन्दर्यशास्त्रीयानुशीलनं प्रस्तौति। अष्टमशतकजेन विदुषा दामोदरगुप्तेन विरचितोऽयं ग्रन्थः मुख्यत्वेन गणिकायाः मालत्याः प्रदर्शितकलात्मकशिक्षायाः व्यवहारिकचातुर्यस्य चादर्शस्वरूपोऽस्ति। अत्र वर्णितानां चतुःषष्टिकलानां गानवाद्यनृत्याभिनयादीनां तथा मञ्चसंवादादिविषयाणां मुद्राभिः विशेषरूपेण प्रदर्शनकलाः प्रतिपादिताः। इदमनेन ग्रन्थेन स्पष्टीक्रियते यद्गणिकादयः न केवलं शृङ्गारस्य आश्रयिकाः अपि तु समाजेन सह संवादस्य गहनकलात्मकसाधनायाश्चात्माभिव्यक्तेः मूर्तयः अपि बभूवुः।*

*शोधेऽस्मिन् ग्रन्थस्यास्य प्रासङ्गिकश्लोकानां सन्दर्भमाश्रित्यासां कलानां प्रौद्योगिकीगभीरताशास्त्रीयानुशासनं सामाजिकप्रभावादयश्च दरीदर्शयिष्यन्ते। अध्यायेनानेन न केवलं कुट्टनीमतं साहित्यिककाव्यरूपेणालोच्यते अपितु भारतीयप्रदर्शनकलापरम्परायाः सांस्कृतिकनिदर्शनस्य च चलत्स्रोतोरूपेण पुनःपरिभाषितं करिष्यते।*

**कुञ्चीशब्दाः- प्रदर्शनकला, गायनं, वाद्यं, नृत्यम्, अभिनयः, रसः, गणिका चेत्यादयः।**

*****************************************************************************

**प्रस्तावना**

संस्कृतसाहित्ये मध्यकालीनकाव्यधारायां कुट्टनीमतमिति काव्यं विशिष्टं स्थानमाधत्ते। काव्यमिदम् अष्टमशतकस्य उत्तरार्धे भट्टदामोदरगुप्तेन विरचितोऽतीवमहत्त्वपूर्णो ग्रन्थः इति तु सुप्रतिष्ठितमेव। अस्मिन्नेव काव्ये तदानीन्तनसमाजराजनीतिप्रदर्शनकलादीनामत्यन्तं सजीवं यथार्थं च चित्रमङ्कितं कविना। ग्रन्थोऽयं काश्मीरनरेशस्य जयापीडस्य शासनकाले विरचितो यदा दामोदरगुप्तः राज्ञः जयापीडस्य प्रमुखामात्यः आसीत्। राजतरङ्गिण्यां कल्हणेन चोच्यते –

स दामोदरगुप्ताख्यं कुट्टनीमतकारिणम्।
कविं कविं बलिरिव धुर्यं धीसचिवं व्यधात्॥[1]

एवमेव स्वयं कविना अस्यैव ग्रन्थस्यान्ते पुष्पिकायां स्वपरिचयः प्रदत्तः। तद्यथा-

“इति श्रीकाश्मीरमहामण्डलमहिमण्डलराजजयापीड-मन्त्रिप्रवरदामोदरगुप्तविरचितं कुट्टनीमतं समाप्तम्॥”[2]

कुट्टनीमतमिति काव्यस्य लोकप्रियतायाः प्रमाणं सुभाषितवल्यां काव्यप्रकाशेऽलङ्कार-सर्वस्वादिषु चानेकेषु ग्रन्थेषूपलभ्यते। हेमचन्द्राचार्येण निदर्शनकाव्यरूपेणास्य काव्यस्य प्रतिपादनं कृतं स्वरचितकाव्यानुशासनविवेके। तद्यथा-

“धूर्तविटकुट्टनीमतमयूरमार्जारादिके लोके।
कार्याकार्यनिर्णयस्वरूपमिह निदर्शनं तदपि॥”[3]

---

[1] राजतरङ्गिनी प्रथम भाग ४९६

[2] कुट्टनीमतम् पुष्पिका

[3] कुट्टनीमतम् , अध्यापकः त्रिदिवनाथरायः, भुमिकांशः

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

अस्यायमाशयः, काव्ये धूर्त-विट-कुट्टनी-मयूर-मार्जारादिभिः चरित्रैः कार्याकार्याणां विवेचनं प्रस्तूयते, किञ्च एतदर्थं काव्यमिदम् एकं शिक्षोपदेशात्मकं निदर्शनम् अस्तीति काव्यानुशासनकारेण हेमचन्द्रेणाभिहितम्। कुट्टनीमताख्ये काव्ये व्यञ्जनायाः प्राधान्यं, तथा च व्यङ्ग्यस्य शृङ्गाररसस्य च दृढाभिव्यक्तिः काव्यमिदं श्रेष्ठपद्यकाव्यरूपेण परिचाययति। अत्र हास्यकरुणशान्तादीनाम् अन्येषां रसादीनां परोक्षरूपेणोपस्थितिरपि विशेषत्वमुत्सृजति। वास्तवदृष्ट्या वात्स्यायनस्य कामसूत्रे 'वैशिक अधिकरणे' वर्णितानां सिद्धान्तानां प्रतिच्छविः काव्यमयरूपेण काव्येऽस्मिन् प्राप्तास्ति। एवञ्च काव्यस्यास्य भट्टिकाव्यसमतुल्यतयैव काव्यशास्त्रीय-कृतिरूपेणापि मन्यतास्ति[4]। पूर्णरूपेण आर्याछन्दसा रचितोऽयं ग्रन्थः शृङ्गाररसप्रधानोऽस्ति। कविदामोदरगुप्तः तत्कालीनसमाजे परिव्याप्त-नैतिकपतनाद्व्यथितः सन्ननेन काव्यरचनामाध्यमेन धूर्त-लम्पटादीनां किञ्च कामुकपुरुषाणां वास्तवचरित्राणि प्रकटयति स्म। कुट्टन्याः धूर्तता, तस्याः व्यवहारिकबुद्धिः छलनीतिश्चात्यन्तं यथार्थतयास्मिन् काव्ये प्रदर्शिता। कविः स्वयमेवास्य ग्रन्थस्य रचनायाः समुद्देश्यं सुस्पष्टीकर्तुं कथयामास–

"काव्यमिदं यः शृणुते सम्यक्काव्यार्थपालनेनासौ।
नो वञ्च्यते कदा चिद्विटवेश्याधूर्तकुट्टनीभिरिति॥"[5]

तथाहि, ये जनाः काव्यमिदं ध्यानपूर्वकं शृण्वन्ति भावार्थं च सम्यक्तया गृह्णन्ति, कदापि ते गणिकायाः कुट्टन्याः धूर्तपुरुषस्य ठगजनस्य च वशवर्तिनो न भविष्यन्ति इति कवेरभिप्रायः। काव्यस्यास्य कथासंरचनायां वृद्धा गणिका एकां नवयौवनां गणिकामेतत् शिक्षयति यत् कथं सा चाटुकारितयाभिनयेन कृत्रिमप्रेम्णा केवलधनप्राप्तेरिच्छामाध्यमेन पुरुषान् आकर्षति। अनेन शिक्षणमाध्यमेन गायनवादननृत्याभिनयादीनां मुद्रादीनां संवादकलानां च नैकासां प्रदर्शनकलानां प्रतिच्छविः ग्रन्थेऽस्मिन् समुपलभ्यते। अस्य शोधस्य समुद्देश्यं कुट्टनीमते समुल्लिखितानां प्रदर्शनकलानां शास्त्रीयविश्लेषणं, सामाजिकसन्दर्भा-नुशीलनं तथा च सौन्दर्यशास्त्रीयमूल्याङ्कनं चेति।

कुट्टनीमतं न केवलं शृङ्गारादीन् विषयान् प्रतिपादयति, अपि तु एतत् काव्यं सङ्गीतवाद्यकलादीनामपि समुत्कर्षं साधयति। प्रसङ्गमिदं ग्रन्थकारः दामोदरगुप्तः नैकैः श्लोकैः प्रमाणयति। यथा-

ब्रह्मोक्तनाट्यशास्त्रे गीते मुरजादिवादने चैव।
अभिभवति नारदादीन्प्रावीण्यं भट्टपुत्रस्य॥[6]

अर्थात् ब्रह्मणा प्रणीते नाट्यशास्त्रे वाद्यवादनादिषु गायनकार्येषु भट्टपुत्रस्य प्रावीण्यमेवमासीत् यत् नारदादीन् देवर्षीन् अपि स्वदक्षतया असौ पराजितवान्। अस्मिन् श्लोके भट्टपुत्रस्य सङ्गीतविद्यायाः वाद्यकौशलस्य चात्यन्तम् उच्चकोटीरं चित्रितमस्ति। सङ्गीतस्य इमामात्मिकानुभूतिं तथा भावप्रधानच्छायां चादाय ग्रन्थकारः लयस्य स्वरसंयोजनस्य चाद्भूतं कौशलं समुल्लिखति -

[4] कुट्टनीमतम् , अध्यापकः त्रिदिवनाथरायः, भुमिकांशः

[5] कुट्टनीमतम् १०५९

[6] कुट्टनीमतम् ७५

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

तन्त्रीवाद्यविशेषानुद्दामानन्यजन्मनस्तस्याः ।
कुहरितरेचितकम्पितसम्पादननैपुणं करोति जडान् ॥[7]

अर्थात् रतिकाले मालत्याः कण्ठात् यथा सुललितकोकिलस्वरस्य समुत्पत्तिर्भवति स्म, तस्यां कालवेगस्य, श्वासकम्पनस्य, स्वरसंयोजनस्य च या निपुणता आसीत्, तदद्वितीयमासीत्। कुशलाः वीणावादकाः अपि तस्याः समीपे न्यूनाः जाताः। अत्र मालत्याः गायनं तथा तस्याः स्वरस्य लयात्मकतायाः वर्णनं क्रियते। अस्याः ताने एवं माधुर्यं चाञ्चल्यम् आत्मीयत्वं चासीत् यत्, यथा वीणावाद्यमपि तस्याः गायनस्य सम्मुखे प्रभाहीनं जातम्। सङ्गीतमिदम् एवम् आसीत्, न केवलाभ्यासेन अपि तु अन्तःप्रेरणया भावानुभूत्या चापि जातं तत्। वाद्यकलायामस्याः लयबद्धतायाः वैचित्र्यपूर्णतामालोचयामासापरेण श्लोकेन ग्रन्थकर्ता।

गम्भीरमधुरशब्दं परिरक्षितगीतविविधभङ्ग्युतम्।
दर्शयतो वैचित्र्यं न भ्रष्टो वादकस्य लयकालः ॥[8]

अर्थात् यः वादकः गम्भीरेण मधुरेण च ध्वनिना सह सङ्गीतस्य विविधाः भङ्गिमाः संरचयन् सङ्गीतस्य नाव्यतां प्रदर्शयति, असौ लय-तालयोः समये कदापि विचलितः न भवति। अयं श्लोकः प्रदर्शयति यत् आदर्शः वादकः न केवलं ध्वनिं सङ्गीतं च साधयति, अपि च लयसमयस्याप्यनुशासनं पूर्णरूपेण करोत्येव। एवं तस्मिन् युगे न केवलं वाद्यकलायाः प्रदर्शनमासीत् अपि तु अनुशासिताभ्यासस्य लयसंवेदनायाश्च चरमपरिणतिरासीत् ।

एवं सङ्गीतसंवेदनायाः लयात्मिकानुशासनस्य च छाया नाट्यशास्त्रादिषु सङ्गीतरत्नाकरादिषु च ग्रन्थेषु परिलक्ष्यते यत्र लय-ताल-वाद्यानां सञ्चालनस्योपरि भूयान् विचारः कृतः।

कुट्टनीमतग्रन्थे नृत्यं मुद्रा च पृथक् पृथग्रूपेण विभज्य तुल्यशास्त्रीयपरम्परया चित्रितास्ति। यद्यपि ग्रन्थेऽस्मिन् सुस्पष्टतया नृत्यस्य मुद्रायाश्चेति शब्दद्वयस्य प्रयोगः सीमिततया समुपलभ्यते, तथापि नाट्यशास्त्रे कामशास्त्रे च प्रतिपादितायाः नृत्यात्मकभङ्गिमायाः शारीरिकसङ्केतस्य च प्रयोगः सहजपद्धत्या गणिकादीनामाचरणप्रदर्शनासु कलासु च प्रत्यक्षीक्रियते। तेषामुपयोगः न केवलं शारीरिकसौन्दर्यप्रदर्शनं यावत् सीमितः अपि तु नाट्यशास्त्रस्योपरि आधारितैकानुशासितविद्या-रूपेण अभिनवव्यञ्जकत्वमप्यस्ति। ग्रन्थकारस्य दामोदरगुप्तस्य बहुषु श्लोकेषु अस्य प्रमाणानि समुपलभ्यन्ते। यथास्मिन् श्लोके-

भुजपतनगात्रसंस्थितिलालित्योद्वहनपार्श्वबलितानि ।
अनयैव निर्मितानि स्थानकशुद्धिश्च चातुरस्र्यं च ॥[9]

अर्थात् भुजानां पतनस्य गतिः, शरीरस्य सन्तुलितस्थिरता, कोमलता, अङ्गानामुपरि उत्थानं पार्श्ववलितानि च एतानि सर्वाण्यनया निर्मितानि। एवमेव दण्डायमानस्य शुद्धा विधिसमूहस्वरूपा चतुरस्रमुद्राप्यनया रचिता। श्लोकेऽस्मिन् नृत्यस्य शास्त्रीयमुद्रायाः अङ्गविन्यासस्य गहनं चित्रणमपि समुपलब्धम्। अनया शारीरिकशुद्धतया सह मुद्रात्मकानुशासनस्य सम्बन्धमाविष्करोति ग्रन्थकारः। अग्रेऽपि नायिकायाः भावाभिनयस्य

[7] कुट्टनीमतम् ५७६

[8] कुट्टनीमतम् ९४२

[9] कुट्टनीमतम् ८५

रसनिष्पत्तेश्च एतादृशीं क्षमतां वर्णयति, यदस्याः दिव्यतायाः स्तरं यावत् साधयति। यथा-

प्रविभक्तैर्भावरसैरभिनयभङ्ग्या परिक्रमैश्चित्रैः।
रम्भामप्यतिशेते किमुतेतरमर्त्यनर्तकीलोकम्॥[10]

अर्थात् सेयं नायिका स्वविभक्तभावैः रसैरभिनयभङ्गिमाभिः चित्ताकर्षकपरिक्रमाभिश्च रम्भामपि पराजयति तत्र अन्यासां वा साधारणनर्तकीनां का कथा? पद्येनानेन सुस्पष्टं यत् नायिकायाः नृत्यं न केवलम् अङ्गचालनम् अपि तु भावाभिनयस्य रसनिष्पत्तेश्च समुज्ज्वलं निदर्शनमस्ति। अस्यां संरचनायां यदभिनयस्य भङ्गिमा, नाट्यगतपरिक्रमा किञ्च रसानां स्पष्टता परिलक्ष्यते, तेन न केवलं मानवः कलाकाररूपेण परिणमति अपितु दिव्यस्तरस्य साधकरूपेण परिवर्तते। परन्तु इयं दिव्यता न सहजसाध्यास्ति। यतो हि अस्य कृते कठोरसाधना, अभ्यासः, शारीरिकपीडा चापेक्षते। अस्याः नृत्यकलायाः साधनात्मककठिनतामपि ग्रन्थकारः प्रदर्शयति । यथा-

भुजगाः पररन्ध्रदृशः खण्ड्यन्ते प्रियतमाधरा यत्र।
सूचीव्यथानुभूतिर्नृत्याभ्यासप्रवृत्तानाम्॥[11]

अस्य श्लोकस्य स्तरद्वयेन अर्थः करणीयः। प्रथमं तावत्, यत्र सामाजिकपरिवेशं सङ्क्षेपयति, यत्र कोऽपि कमपि न निन्दति, यत्र सर्वेषां ध्यानं केवलं स्वलक्ष्यस्योपरि जायते, तत् प्रेम भवतु कला वा। द्वितीयं तावत् सूचीव्यथा अर्थात् सूचीस्पर्शः यथा तीव्रानुभूतित्वेन पीडायाः सङ्केतः अस्ति। अनेनाङ्गसंयमस्य मुद्राणां गतीनां च अभ्यासेन शरीरं सोढुं योग्यं भवेत्।

अयं श्लोकः एतत् स्पष्टीकरोति यत् ८६-तमे श्लोके वर्णितोऽयं दिव्याभिनयो रम्भायै अप्सरसेऽपि लज्जां प्रददाति। अस्याः ग्रन्थियुग्मेषु पीडां परिश्रमं च प्रददाति। इयम् एतादृश्याः कलायाः साधनमस्ति यत् एकां गणिकां 'भद्राम्' अर्थात् कलां प्रति समर्पिता साधिका इति सम्पादयति। अयं नृत्यविन्यासः नाट्यशास्त्रे वर्णितानां चारीणां, स्थानकानां च परिकल्पनां स्मारयित्वा तेन सह अत्रापि अभिनयदर्पणे उल्लिखितानाम् अङ्गविन्यासानां प्रतिबिम्बानि प्रदर्शयति। नृत्यस्य मुद्राणां च शास्त्रीयपरिपक्वतायाम् अग्रे गत्वा कुट्टनीमतस्य गणिकाः अभिनयकलासु अपि पूर्णतः सुदक्षसाधिकारूपेण वर्णिताः। तासामभिनयेषु भावानां सम्प्रेषणीयता, रसानां स्पष्टप्रभावपूर्णप्रस्तुतिश्च दर्शकानां मनःसु गभीरमनोवैज्ञानिकप्रभावं समुत्पादयितुं सामर्थ्यमावहति। तासां कृते न केवलं दृश्यं प्रदर्शितमस्ति अपि तु आत्माभिव्यक्तेर्माध्यमः एवास्ति। येन स्वसौन्दर्येण सह आन्तरिकसंवेदनानामनुभूतीनां च मनोभावः अपि सजीवरूपेण प्रकटितः अस्ति। एवं रसाभिव्यक्तेः अद्वितीयताम् आश्रित्य ग्रन्थकारः दामोदरगुप्तः कुट्टनीमते नैकेषु स्थलेषु अतिसूक्ष्मसौन्दर्यशास्त्रीयां रीतिं प्रकाशयति। यथा-

रूपं यौवनचित्रितमनङ्गविकृतानि नाट्यदीप्तानि।
शमिनामपि शमगर्वं मुष्णन्त्यविकल्पितं तस्याः॥[12]

[10] कुट्टनीमतम् ८६

[11] कुट्टनीमतम् १९१

[12] कुट्टनीमतम् ९७०

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

अर्थात् अस्याः गणिकायाः रूपेण यौवनेन च चित्रितं शृङ्गारिको भावावेगो नाट्यदीप्तानीत्येतत् सर्वं मुनिनां शान्तिमप्यपहरति। अयं श्लोकः नायिकायाः नाट्यदीप्तशृङ्गाराभिनयस्य शक्तिं प्रदर्शयति। अस्याः सौन्दर्याभिनयः एवं प्रभावशाली यत् इयम् आत्मानं संयमी इति वक्तुकामं मुनिमपि शृङ्गाररसे विचालयति। इयमेव रसाभिव्यक्तेः चरमसीमा भवति। यत्राभिनयं न केवलमधिमञ्चं सीमितमस्ति अपि तु दर्शकानाम् अन्तरात्मन्यपि प्रविशति। तथा च तेषां मानसिकस्थिरतामपि परिवर्तयति। एतत् शृङ्गारप्रभावम् अभिनयस्य चुम्बकीयशक्तिं चाश्रित्य ग्रन्थकारः अपरेऽस्मिन् श्लोके दर्शकानां मनोदशां प्रदर्शयति। यथा-

विज्ञानेन ख्यातां कुसुमलतां त्वं तु वर्णयस्यनिशम्।
नृत्यन्तीं मृगदेवीं विस्फारितलोचनः पश्यन्॥[13]

अर्थात् त्वमहोरात्रं स्ववशीकरणविद्यया प्रसिद्धकुसुमलतां प्रशंससि। यतस्तव दृष्टिः नृत्यन्त्याः मृगदेव्याः उपरि तिष्ठति, यं त्वं विस्फारितनेत्राभ्यां पश्यसि। श्लोकोऽयं प्रदर्शयति यत् मृगदेव्याः नृत्याभिनयस्य प्रभावः एवं तीव्रः यत् दर्शकानां मानसिकोपस्थितिः एवमभूत्, यस्य वाणी कुसुमलतां प्रशंसति, वास्तवदृष्ट्या पूर्णरूपेण मृगदेव्याः आकर्षणेन इयम् आकर्षिता जाता। एषा नेत्राभिनयस्य आकृष्टदृष्टेः आन्तरिकमोहनस्य च प्रतीकस्वरूपास्ति –

यत्र कला दर्शकस्य चेतनां स्ववशे नयति, यत्र एकस्य रसाभिनयस्य आन्तरिकमनोदशा प्रभाविता जाता, तत्र ग्रन्थकारः तं व्यापकसामाजिकानुभवरूपेणापि प्रस्तौति।

विस्मयभावाकृष्टः प्रोत्फुल्लविलोचने ततो विसृजन्।
नृत्यति पौरजनौघे प्रोवाच वयस्य पश्य पश्येति॥[14]

अर्थात् अत्र दर्शकः विस्मयभावेन समाकृष्टः सन्, नेत्रं विस्तार्य नृत्यमिदं पश्यति स्म। किञ्च तदा सः मित्रं कथयति पश्य पश्य। अयं श्लोकः अभिनयस्य नृत्यस्य च जनसामूहिकप्रतिक्रियां चित्रयति। अत्राभिनयस्य शक्तिः इत्थं प्रभावशालिनी यत् न तत्केवलं व्यक्तिगतम् अपि च सामूहिकं विस्मयं समुत्पादयति। दर्शकः विस्मितः सन् न तदा केवलं पश्यति, अपि च अन्यान् अपि दृश्यमिदमित्येवंरूपेण समाकर्षयति। एतदेव नाट्यशास्त्रे वर्णितायाः रसनिष्पत्तेः चरमस्थितिरस्ति। यत् भावरसयोः प्रस्फुटनं केवलमात्रं कलाकारं यावत् न सीमितमस्ति, अपि तु समुच्चयदर्शकेषु समुदायरूपेण प्रसारितमस्ति। कुट्टनीमतस्य ग्रन्थस्यैवं रसात्मकप्रस्तुतिः तथ्यञ्च नाट्यशास्त्रे वर्णितायाः रसनिष्पत्तेः तथा भावाभिनयस्य च सङ्कल्पानां न केवलं स्मारकं, तेनैव सह ध्वन्यालोके वर्णितस्य रसध्वनेः सिद्धान्तस्यापि सम्भावकम्। तत्र रसध्वनिसिद्धान्तस्य छायानुभवः कर्तुं शक्यते। नाट्यं संवादश्च-

कुट्टनीमतस्य न केवलं नृत्यसङ्गीताभिनयकलाद्यवधि, अपि तु अत्र नाट्यकलाचेतनायाः मञ्चनसूक्ष्मतायाः, प्रेक्षकसमीक्षकयोः, प्रतिक्रियायाश्च महत्त्वपूर्णविचारः

---

[13] कुट्टनीमतम् ५२५

[14] कुट्टनीमतम् ८८८

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

परिलक्ष्यते। एतत् केवलं न प्रदर्शनरूपमस्ति, तेनैव सह संवादविवेचनसौन्दर्यबोधानां सम्मेलनमप्यस्ति। ग्रन्थकारः दर्शकानां दृष्टेः, काव्यस्य समीक्षात्मकमूल्याङ्कनस्य, कलात्मकविन्यासस्य च त्रयाणां समुचितमहत्त्वं प्रददाति। अतः ग्रन्थकारेण दामोदरगुप्तेन उल्लिखितमस्ति-

अङ्के जातसमाप्तौ गीतातोद्यध्वनौ च विश्रान्ते।
प्रेक्षणकगुणग्रहणं नृपसूनुः प्रववृते कर्तुम्॥[15]

अर्थात् अङ्कस्य समाप्त्यनन्तरं यदा गीतवाद्ययोः ध्वनिः शान्तः जायते तदा राजपुत्रः काव्यगुणस्य प्रेक्षणकस्य च विवेचनायां प्रवृत्तः भवति। अयं श्लोकः काव्यस्य समीक्षाबोधं च स्पष्टीकरोति। मञ्चप्रदर्शनस्य समाप्त्यनन्तरं यदा ध्वनिवाद्ययोः आडम्बरः शाम्यति तदा एकः गम्भीरः दर्शकः प्रेक्षणकगुणम् अर्थात् नाट्यरचनात्मकताविन्यासम्, अभिनयं, संवादादीनां च समीक्षां करोति। इयं दृष्टिभङ्गिः दर्शकं न केवलम् उपभोगकर्तृरूपेण, अपि तु विवेचकरूपेण सहसर्जकभूमिकारूपेण च प्रतिष्ठापयति। ग्रन्थकारः दामोदरगुप्तः विषयेऽस्मिन् वक्ति -

नाट्यप्रयोगतत्त्वं मतयो न विशन्ति मादृशां प्रायः।
वाहनयजनपदातिग्रामादिककार्यदत्तहृदयानाम्॥[16]

काव्यप्रयोगस्य मर्म ममसदृशबुद्ध्या न बोद्धुं शक्यते, यतोहि मम चित्तं तु सदा वाहन-यज्ञ-सेना-ग्राम्यकार्यादिषु मग्नं भवति। अत्र एकं पात्रम् आत्मस्वीकृतिं प्रददाति यत् तस्य रुचिः अभ्यासश्च नाट्यसौन्दर्यं व्यञ्जनातत्त्वं च बोद्धुं न समर्थः। अयं श्लोकः प्रेक्षणकवर्गेषु विकासशीलस्य सामान्यजनस्य मध्ये भेदं प्रस्तौति। यत्र एकस्य, पुनः कतिपयदर्शकानां सौन्दर्यस्य रसेषु निमज्ज्य काव्यं विश्लेषयति, तत्र किमपि मनोरञ्जनं यावत् सीमितम् अस्ति, नाट्यकलायाः व्यापकं प्रभावं अभिलक्ष्य ग्रन्थकारस्य राज्ञः पात्रादपि काव्यस्य प्रेक्षणमपेक्षते–

विज्ञापयाम्यतस्त्वां निर्मितनाट्ये प्रजासृजा सदृशम्।
अवलोकयाङ्कमेकं मा भवतु मम श्रमो वन्ध्यः॥[17]

अर्थात् हे राजन्! अतः अहं भवतः निकटे प्रार्थयामि यत् कृपया अस्य काव्यस्य एकाङ्कं पश्यतु येन मम श्रमः व्यर्थः न भवेत्। अयं श्लोकः कलायाः सत्तायाश्च सम्बोधनं सूचयति। यत्र कलाकारः राज्ञः सकाशात् केवलम् एकाङ्कस्य प्रेक्षणं याचते। यत्र प्रेक्षणकस्य महत्त्वं, कलाकारस्य संवेदना, कलायाः सामाजिकसमर्थनं, कलायाः सामाजिकसमर्थनस्यावश्यकता चेति त्रयाणामेतेषामेव सूक्ष्मरूपेण प्रस्तुतिः क्रियते। नाट्यकला न केवलं दर्शकानां कृते आकर्षणस्य माध्यममात्रमपि तु एतदेव सामाजिकसंवादस्य मान्यतायाश्च आकाङ्क्षां संस्थापयति। अस्य खण्डस्य प्रस्तुत्या नाट्यशास्त्रे वर्णितस्य प्रेक्षणकस्य तथा च आलोचनासम्बन्धिनाम् अवधारणादीनां प्रतिध्वनिं श्रावयति। किञ्च अनेन सह नाट्यदर्पणे उल्लिखितस्य मञ्चसम्प्रेषणस्य पात्रविन्यासस्य च स्मृतिमपि जागरयति।

**उपसंहारः-**

कुट्टनीमतं न केवलमेकं काव्यमस्ति भारतीयप्रदर्शनकलापरम्परायाः एकं विशिष्टं

[15] कुट्टनीमतम् ९२९

[16] कुट्टनीमतम् ९३०

[17] कुट्टनीमतम् ८७९

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

सांस्कृतिकं निदर्शनमप्यस्ति। यत्र वर्णिताः गणिकाः न केवलं शारीरिकसौन्दर्यशृङ्गारयोः प्रतीकाः भवन्ति अपि तु ताः कलानुशासन-शिक्षणात्माभिव्यक्तीनां जीवत्प्रतिमूर्तयः सन्ति। प्रदर्शितगायन-वाद्यकला-नृत्याभिनय-मञ्च-संवादादयश्च न केवलं तत्कालीनसौन्दर्यबोधं प्रदर्शयन्ति, तेन साकं समाजे कलायाः उपादेयतां नैतिकतां संवादात्मकशक्तिं च जागरयन्ति ।

दामोदरगुप्तद्वारा प्रस्तुतः अयं ग्रन्थः कलानां न केवलं मनोरञ्जनस्य माध्यमः अस्ति, सामाजिकप्रभावस्य सांस्कृतिकशिक्षायाश्च आधारोऽप्ययं ग्रन्थः इति मान्यते यत्र गुरुशिष्यपरम्परा-आत्ममूल्याङ्कन-मञ्चप्रतिक्रिया-दर्शकानामंशग्रहणं प्रभृतीनां परिष्कृतचित्रणं सम्पादितं ग्रन्थकारेण। कुट्टनीद्वारा गणिकां प्रति प्रदत्तकलात्मकशिक्षया एतदपि सिध्यति यत् प्राचीनभारते प्रदर्शितकला एका समर्पितसाधनाविद्या जीवनशैली चासीत्। एतत् काव्यं साम्प्रतिकयुगेऽपि प्रासङ्गिकताम् आवहति। यतो हि एतत् अस्मान् स्मारयति यत् कलायाः उद्देश्यं न केवलं भावविनोदनमस्ति, व्यक्तित्वनिर्माणं समाजसंवादयोः सांस्कृतिकचेतनायाश्च जागरणमप्यस्य लक्ष्यम्। अत्र वर्णितस्य कलात्मकपक्षस्य सङ्गतिः नाट्य-सङ्गीत-शृङ्गारादीनां विषयाणां शास्त्रीयचर्चा नाट्यशास्त्राभिनयदर्पणसङ्गीतरत्नाकरकामसूत्रादीनां सांस्कृतिकछायाम् अपि अनुभावयति इति शम्।

## सहायकग्रन्थसूची


- गुप्तः, दामोदरः। (१९६१)। *कुट्टनीमट्टम्*। विद्यालङ्कारः, अत्रिदेवः (अनुवादकः)। वाराणसी : इन्डोलाजिकल् वुक् हाउस्।
- गुप्तः, दामोदरः। (१९९१)। *कुट्टनीमट्टम्*। त्रिपाठी, तनसुखरामः (सम्पा.)। वाराणसी : कृष्णदास अकादमी।
- गुप्तः, दामोदरः। (१३६० बङ्गाब्दः)। *कुट्टनीमट्टम्*। रायः, त्रिदिवनाथः (सम्पा.)। कोलकाता : वसुमती साहित्य मन्दिर।
- भरतमुनिः। (२०२३)। *नाट्यशास्त्रम्*। चट्टोपाध्यायः, गौतमः (सम्पा.)। वाराणसी : इण्डियान माइण्ड।
- वात्स्यायनः। (२०२४)। *कामसूत्रम्*। गोयेलः, सतीशः (सम्पा.)। दिल्ली : डायमण्ड पाकेट वुकस् प्राइवेट लिमिटेड।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# नैषधीयचरितस्य प्रथमसर्गे विरहावस्थावर्णनम्

**विनयकुमार-वरः**
**शोधच्छात्रः, साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः (भोपालपरिसरः)**
**भोपालम्**

**प्रबन्धसारः**

*संस्कृतसाहित्ये महाकविः श्रीहर्षः सुप्रसिद्धः। तद्रचितं द्वाविंशतिसर्गविशिष्टं 'नैषधीयचरितम्' इति महाकाव्यं बृहत्त्रय्यां परिगण्यते। तत्रापि "उदिते नैषधे काव्ये क्व माघः क्व च भारविः" इति कथनात् एतन्महाकाव्यस्य श्रेष्ठत्वं स्वीक्रियते। किञ्च "नैषधं विद्वदौषधम्" इत्युक्तिः महाकाव्यस्यास्य सकलशास्त्रप्रयोगक्षेत्रमिति सूचयति। नलदमयन्त्योः कथा या महाभारतस्य वनपर्वणि विद्यते तामादाय नैषधीयचरितं रचितमस्ति। अत्र मुख्यः रसः शृङ्गारः। कदाचित् नलेन सह दमयन्त्याः क्वचित् दमयन्त्या सह नलस्य मिलनविच्छेदवर्णनादत्र सम्भोगः विप्रलम्भोऽपि दृष्टिपथारूढो भवति। रसेषु शृङ्गारः आद्यः। तदुक्तं विश्वनाथेन साहित्यदर्पणे –"शृङ्गं मन्मथोद्भेदस्तदागमनहेतुकः। उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ॥" काव्यपाठकाः सहृदया अपि शृङ्गारेण सिक्ताः भवितुमधिकं कामयन्ते इति तु सत्यम्। तदर्थं मतिर्मे उदिता नैषधीयचरितस्य आद्यसर्गे कविना श्रीहर्षेण कथं शृङ्गारस्य तत्रापि विप्रलम्भस्य वर्णनं कृतम् इति। कथ्यते न विना विप्रलम्भेन शृङ्गारः पुष्टिमश्नुते। अतः नैषधीयचरितस्य प्रथमसर्गे विप्रलम्भविचारः शोधपत्रेऽत्र क्रियते।*

**कुञ्चीशब्दाः – श्रीहर्षः, नैषधीयचरितम्, शृङ्गाररसः, विप्रलम्भशृङ्गारः, विरहावस्था चेत्यादयः।**

*****************************************************************************

**भूमिका**

महाकविश्रीहर्षप्रणीतं नैषधीयचरितमहाकाव्यं संस्कृतवाङ्मयस्य अनुपमं काव्यरत्नम्। एवंभूतस्य अद्वितीयमहाकाव्यस्य महत्त्वविषये आभाणकद्वयं प्रसिद्धम्। तद्यथा- 'नैषधे पदलालित्यं', 'नैषधं विद्वदौषधम्' चेति। प्रथममाभाणकं प्रमाणयति यत् नैषधस्य पदलालित्यं सर्वातिशायि विद्यते। द्वितीयम् आभाणकं संसूचयति यत् नैषधं विदुषां कृते औषधस्वरूपम् अस्ति। औषधं यथा रोगं नाशयति तथा नैषधकाव्यं विदुषाम् अहङ्काररूपकं सर्वज्ञत्वरूपकं च रोगं विध्वंसयति। नानारसपरिपूर्णे अस्मिन् महाकाव्ये शृङ्गाररसः प्राधान्यं भजते। तत्र विप्रलम्भशृङ्गारस्य चारुता सर्वातिशायिनी।

**नैषधीयचरिते विप्रलम्भ(विरह)-विचारः**

रसेषु शृङ्गारः आद्यः सर्वेषां हृदि रतिभावस्य विद्यमानत्वात्। अन्येभ्यः रसेभ्यः विलक्षणानन्दोपगमाच्च शृङ्गारस्य महत्त्वं सर्वैः स्वीक्रियते। तत्र ध्वन्यालोककारेण आनन्दवर्धनेन ध्वन्यालोके कविमहिमवर्णनप्रसङ्गे उच्यते-

"अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥
शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत् ॥"[1]

---

[1] ध्वन्यालोकः, ३य उद्योतः, पृ. ५८७

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

अत्र शृङ्गारी इति पदं प्रयुज्य तेन तस्य रसस्य महत्त्वमपि सूच्यते। न केवलमेतत्, अलङ्कारशास्त्रजनकेन भरतमुनिनाऽपि नाट्यशास्त्रे रसभेदप्रसङ्गे आदौ शृङ्गारस्य नाम उल्लिखितम्। विश्वनाथकविराजोऽपि साहित्यदर्पणे शृङ्गारस्य आदौ समुल्लेखं करोति। किञ्च, साहित्यपर्दणकारः शृङ्गाररसस्य लक्षणं स्पष्टीकुर्वन् निगदति- "शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः। उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते॥"[2]

अत्र शृङ्गारः उत्तमप्रकृतिप्रायः इति कथनेन अस्य उच्चकोटिकत्वं प्रकाश्यते। इह खलु कविपरम्परावाहिनि संसारे अक्षिलक्षीभवन्ति नानाविधानि नानारसावच्छेदकानि काव्यानि। परं निर्विवादमिदं यत् मुख्यत्वेन शृङ्गाररसपरकाणां काव्यानामपेक्षया अन्यरसरसान्वितानि काव्यानि बहुलतया नोपलभ्यन्ते। तत्र प्रसिद्धेषु काव्येषु नैषधीयचरितं सर्वजनहृद्यमिति मुक्तकण्ठं स्वीक्रियते। महाभारतस्य वनपर्वणि अन्तर्गता नलदमयन्तीकथा अत्र महाकविना श्रीहर्षेण उद्धृता। परिवर्त्तनमपि प्रयोगानुसारं लक्षणानुकूलं क्वचित् विहितम्। नैषधं विद्वदौषधमिति उक्तिः एतस्य महत्त्वे प्रमाणमस्ति इदमपि शृङ्गाररसप्रधानस्य उत्कृष्टं महाकाव्यम्। नलदमयन्तीकथा शृङ्गाररसाश्रिता, तयोः प्रेमपरिणयमुख्यप्रसङ्गत्वात्। शृङ्गारश्च सम्भोगविप्रलम्भ-रूपेण द्विविधः। अत्र सम्भोगशृङ्गाररसस्य मुख्यत्वेऽपि विप्रलम्भस्य बाहुल्यं दृश्यते।

द्वाविंशसर्गात्मके नैषधीयचरिते आरम्भात् त्रयोदशसर्गान्तं विप्रलम्भः नायकनायिकयोः दृश्यते। ततः तयोः सम्भोगः तत्रापि क्वचित् मानहेतुकः विप्रलम्भः लक्ष्यते। सम्भोगविप्रलम्भयोः विप्रलम्भः विशिष्यते इति मे मतिः। तत्रापि "न विना विप्रलम्भेन शृङ्गारः पुष्टिमश्नुते" इति सुवचनमेतत् समर्थयति। नैषधीयचरितस्य श्रेष्ठत्वे वृहत्त्रय्यां स्थानप्राप्तौ च विप्रलम्भशृङ्गारस्य औचित्येनोपनिबन्धनं कारणत्वेन अङ्गीक्रियते। विरहः वियोगः विप्रलम्भो वा समानार्थकाः। अस्य लक्षणं कुर्वता साहित्यदर्पणकारेण उक्तं – "यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ।"[3] तत्रापि पूर्वराग-मान-प्रवास-करुणात्मकोऽसौ चतुर्धा। नैषधीयचरितमहाकाव्ये प्रायः पूर्वरागविप्रलम्भशृङ्गारः दृश्यते। पूर्वरागो नाम -

"श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः।
दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते॥
श्रवणं तु भवेत्तत्र दूतवन्दीसखीमुखात्।
इन्द्रजाले च चित्रे च साक्षात्स्वप्ने च दर्शनम्॥"[4]

दमयन्ती नलमदृष्ट्वा साक्षात् तद्विषयं श्रृणोति। नलोऽपि तथा। श्रुत्वैव द्वयोः अनुरागः उत्पन्नः। परं मिलनं भवतीति कृत्वा दुःखमनुभवतः। अतः पूर्वरागः स्पष्टः। द्वयोः मानसिकावस्था अस्वस्था जाता। एषा कामावस्था स्मरदशा इति वा कथ्यते। अस्मिन् प्रसङ्गे साहित्यदर्पणकारः भणति-

"अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंप्रलापाश्च।
उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः॥"[5]

कैश्चित्तु उक्तमस्ति-

"नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽर्थसङ्कल्पः।

---

[2] साहित्यदर्पणः, ३/१८३, पृ. १४७

[3] साहित्यदर्पणः, ३/१८७, पृ. १४७

[4] साहित्यदर्पणः, ३/१८८-१८९, पृ. १४८

[5] साहित्यदर्पणः, ३/१९०, पृ. १९०

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

निद्राच्छेदस्तनुता, विषयनिवृत्तिस्त्रपानाशः ॥
उन्मादो मूर्च्छामृतिरित्येताः स्मरदशा दशैवा स्युः ॥"[6]

नयनप्रीतिः प्रथमं, चित्तासङ्गः ततोऽर्थसंकल्पः निद्राच्छेदः तनुता विषयनिवृतिस्त्रपानाशः उन्मादो मूर्च्छा मृतिरित्येता दशा एव स्मरदशा । आलोचिताः इमाः सर्वाः कामावस्थाः (मरणं विहाय) नलदमयन्त्योः दृश्यन्ते। तद्वत् विप्रलम्भे औग्र्य-मरण-आलस्य-जुगुप्साख्याः चत्वारः व्यभिचारिभावाः न वीक्ष्यन्ते। अन्ये ऊनत्रिंशत् व्यभिचारिभावाः दृश्यन्ते। भरतमुनिस्तु वदति -

"निर्वेदग्लानिशङ्काख्यास्तथासूया मदः श्रमः ।
आलस्यं चैव दैन्यं च चिन्तामोहः स्मृतिर्धृतिः ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
सुप्तं विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥"[7]

प्रोक्ताः सर्वेऽपि व्यभिचारिभावाः (मरणं विहाय) नलदमयन्त्योः नायकनायिकयोः भृशं विलोक्यन्त एव। विशेषतः प्रथमसर्गे चतुर्थसर्गे च विरहः प्रकृष्टतां गतोऽस्ति। तदत्र सर्गानुसारं क्रमबद्धरीत्या अधः प्रदर्श्यते।

**नैषधचरितस्य प्रथमसर्गे विरहावस्थावर्णना -**

नैषधचरितस्य प्रथमसर्गः नलदमयन्त्योः पूर्वरागप्रसङ्गमालोचयति। एषो रागः दूतवन्दिसखीनां मुखात् श्रवणेन जातोऽस्ति परं न तौ परस्परं चक्षुर्भ्यां दृष्टौ। एषः अनुरागप्रसङ्गः प्रथमसर्गे यथालोच्यते तदत्र प्रदर्श्यते। अनुरागविषये प्रथमसर्गस्यादौ नलं प्रति दमयन्त्याः, ततः दमयन्तीं प्रति नलस्य अनुरागं कविः वर्णितवान्। श्लोकः यथा- तदुक्तम् "आदौ वाच्यः स्त्रिया रागः पुंसां पश्चात् तदिङ्गितैः"। श्लोकसंख्या ३२ तः ४१ यावत् दमयन्त्याः पूर्वरागः वर्णितः। तथैव नलस्य अनुरागः श्लोकसंख्या ४२तः ५५तमं श्लोकं यावत्। पुनश्च ७८ तः १०४ तमं श्लोकं यावत् कविः कृतवान्। एतेषु श्लोकेषु विप्रलम्भस्य व्यभिचारिभावाः तथैव पूर्वरागस्य कामदशायाश्च भावाः येऽस्यादौ उक्ताः ते सर्वे अक्षिलक्षीभवन्ति, तदत्र विविच्यते। पूर्वरागस्य कामावस्थाभिलाषः आद्यः। दमयन्ती निषधदेशेभ्यः आगतेभ्यः दूतवन्दिमुखेभ्यः नलगुणं रूपं च श्रुत्वा चित्रं च दृष्ट्वा तस्मिन् अनुरागं प्रदर्शयति स्म। एषः मनोभावः शृङ्गारस्य, तत्रापि विप्रलम्भशृङ्गारस्य तत्रापि पूर्वरागस्य। पूर्वरागः दूतादिमुखश्रवणात् जायते। सा भीमनरेन्द्रनन्दना निजरूपसम्पदाम् अनुरूपश्रुतिं गते नले मनः दिदेश। सा कथं नलं श्रुतवती इति जिज्ञासायामुच्यते -

"उपासनामेत्य पितुः स्म रज्यते दिने दिने सावसरेषु वन्दिनाम्।
पठत्सु तेषु प्रतिभूपतीनलं विनिन्द्ररोमाजनि शृण्वती नलम् ॥"[8]

एतेन नलगुणश्रवणजन्यो रागः तस्यां रोमाञ्चेन व्यक्तोऽभूत्। ततः नलं विचिन्तयन्ती सा कृशतामाप। तदर्थं पञ्चत्रिंशत्तमे श्लोके 'तन्व्या' इति पदं प्रयुक्तमस्ति। नलविषयिणीं कथां काचिदन्या यदा कथयति तदा अन्यकर्मव्याप्तताऽपि सा तत् त्यक्त्वा अत्र

[6] साहित्यदर्पणः, ३य परिच्छेदः, १५१

[7] नाट्यशास्त्रम्, ६/ १८-२०, पृ. १०७

[8] नैषधीयचरितम्, १/३४, पृ. ११

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

कर्णौ ददातीति कथनेन तस्या हर्षः औत्सुक्यं च व्यज्येते। एतौ भावौ व्यभिचारिभावस्य विप्रलम्भे दृश्येते। अन्यस्य पुरुषस्य नाम यदि काचित् वदति तत्र अनुरक्ता सा ताम् अन्यस्य पुरुषस्य कथां श्रावयेति तावत् पर्यन्तं वदति यावत् नलनाम नागच्छति। अस्मात् तस्याः नले रागातिशयः द्योतते। नलस्य गुणकीर्त्तनश्रवणेन सा अनुभवितुम् इच्छति स्म। दमयन्ती निषधागतेभ्यः दूतद्विजवन्दिचारणेभ्यः व्याजेन नलस्य गुणान् पृच्छति तेभ्यः तद्गुणं निपीय विमनायमाना तिष्ठति। एषा अवस्थाऽपि नले तस्याः अनुरागातिशयं व्यञ्जयति। अपि च दूतादिव्यवधाने अयं च गुणकीर्तनलक्षणः प्रलापाख्यः इत्यनुभवो भवति। तदुक्तं कविना -

"नलस्य पृष्टा निषधागता गुणान्मिषेण दूतद्विजवन्दिचारणाः ।
निपीय तत्कीर्तिकथामथानया चिराय तस्थे विमनायमानया ॥"[9]

प्रतिकृतिस्वप्नदर्शनादयः विरहिणां विनोदोपायाः तदत्र कविः प्रदर्शयति। भीमजा कारुतरमाहूय त्रिजगज्जयश्रियौ प्रियं प्रियां च लिख इति वदति स्म। तथा नलस्तु जगति रूपवान् आसीत्। अतः चित्रे तं दृष्ट्वा आत्मनः रूपसाम्यं तत्र आपाद्य ईक्षते स्म। दर्शनं चतुर्धा भवति, इन्द्रजाले प्रत्यक्षे स्वप्ने चित्रे च। साहित्यदर्पणे तदुक्तम् – "इन्द्रजाले च चित्रे च साक्षात् स्वप्ने च दर्शनम्"। दमयन्ती नलं चित्रे तु पश्यति। पुनरपि स्वप्नेऽपि, तं विषयमपि कविः वर्णयति ऊनचत्वारिंशत्तमे श्लोके । यथा-

"मनोरथेन स्वपतीकृतं नलं निशि क्व सा न स्वपती स्म पश्यति ।
अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिम् ॥"[10]

अतः स्पष्टमत्र विप्रलम्भशृङ्गाररस्य पूर्वरागवर्णनम्। अपि च सुषुप्त्या एव सः महीपतिः नलः अस्याः भैम्याः महद्रहस्यमद्राक्षीत्। सुषुप्त्यवस्थावशात् स नल एव मम निरतिशयानन्दात्मरूपत्वेन स्फुरितः इति दमयन्तीविभावना विप्रलम्भविषयस्मारिका। सामान्यजनानां हेमन्ततौं दिनानि ह्रस्वानि, रात्रयः महत्यः। ग्रीष्मेऽपि दिनानि महान्ति, रात्रयः अल्पाः। परन्तु विरहिणां विरहिणीनां कृते विपरीतं भवति। अर्थात् तेषां तासां च कृते हेमन्ततौं दिनानि महान्ति रात्रयो अल्पाः, ग्रीष्मे दिनानि ह्रस्वानि रात्रयो महत्यः इतीत्थं भवति। सा दशा दमयन्त्या आसीत्। विरहित्वात् अतिवाहयितुमशक्यत्वात् तां प्रति विपरीता जाता। अत्र कवेः इत्थं वर्णनं विरहदशां दमयन्त्याः स्पष्टं प्रत्याययति।[11]

अथ नलस्यापि दमयन्त्यां तथा अनुरागं वर्णयति कविः यथा तस्यां वर्णितवान्। निषधाधिपः नलोऽपि युवधैर्यलोपिनं दमयन्त्याः सौन्दर्यसन्दोहं विदर्भेभ्यः आगतान् आगन्तुकान् श्रुत्वा कामविवेशो जातः। अत्र विप्रलम्भस्य श्रवणाख्यः पूर्वरागः कविना आश्रितः । तस्याः गुणश्रवणानन्तरं राजा तां प्रति मनः अर्पितवान्। कामदेवेनासौ जितः इति कवेः भावना। तन्मनसि दमयन्तीगुणश्रवणात् महान् मदनविकारः प्रादुर्भूतः। यतः तेन तस्याः गुणः श्रवणातिथिः अकारि।

---

[9] नैषधीयचरितम्,१/३७, पृ. १२

[10] नैषधीयचरितम्, १/३९, पृ. १३

[11] नैषधीयचरितम्, १/४१, पृ. १४

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

दैवसहायात् पुष्पेषोरेव पुरुषाकारः फलितः। यतः तेन मार्गणैः तस्य राज्ञः धैर्यकञ्चुकमभेदि। नलः तनुच्छायतया कामदेवं विजेतुं न शशाक इत्यत्र तनुच्छायपदात् विरहः व्यज्यते। यतः विरही सदा व्यथते चिन्तामुक्तो भवति, म्लानशोभा च दृश्यते। अतः अत्र कवेः वर्णनं साक्षात् विरहरूपं प्रत्याययति। जागरावस्था तु विरहिणां दृश्यते। एवं विबोधः इति व्यभिचारिभावोऽपि विद्यते विप्रलम्भे। अत्र कविः नलस्य जागरितावस्थां वर्णयति। तन्मतेन दमयन्तीं प्रति अत्याकृष्टः नलः रात्रौ शय्यायां न सुप्तवान्। यस्य साक्षिणी कोमला शय्या एव। नलः स्मरोपतप्तः आसीत्। अर्थात् स्मरेण अर्दितः असौ तथापि मानित्वात् तनयां भीमनरेन्द्राय न अयाचत परम् अधैर्यमसौ प्राप्तवान्। एतत्तु सत्यम्, एषा अवस्था विरहिणः। विरहकाले शरीरवर्णः परिवर्त्तते। तत्र शरीरं पाण्डुतावर्णं धारयति यथा कर्पूरविलेपनात् शरीरं दृश्यते तथा भवति शरीरवर्णः। दमयन्तीं विना विरहिणः नलस्य श्वासः दीर्घः भवति स्म शरीरवर्णः अपि पाण्डुतां जातः ।[12] परं सः मिथ्या दुःखस्याभिनयात् च्छलेन दीर्घश्वासं तथैव अधिकचन्द्रभागताविभावनात् पाण्डुतां निह्नुते स्म। साहित्यदर्पणः विरहिणाम् अवस्थामिमां समर्थयति। तदुच्यते साहित्यदर्पणे– "व्याधिस्तु दीर्घनिःस्वासपाण्डुताकृशतादयः ।"[13] अपि चासौ यदा समाजे (सभायाम्) भवति स्म तदा तां विभाव्य तस्मिन् ह्रीत्यागोन्मादमूर्च्छावस्थाः दृश्यन्ते इति कविः वर्णयति। व्यभिचारिभावस्य लज्जाभावः कामदशाभ्यः उन्मादमूर्च्छारूपे दशे च नले अदृश्यन्त। सभायामेषः अनुपस्थितया दमयन्त्या च भाषते स्म। कदाचित् मुमूर्च्छ। परं वीणावादनकाले एतत् सर्वं तस्मिन् भवतीति कृत्वा अन्यैः न अलक्षि। गच्छता कालेन नलः दमयन्तीमभिलक्ष्य संजातं मनसिजविकारं गोपयितुं शशाक। अतः धैर्यशालिनः तस्य त्रपायै तत् सर्वमासीत्। एषः त्रपाख्यः व्यभिचारिभावः तस्मिन् लक्ष्यते। अनुरागे प्रकृष्टतां गते सर्वे चञ्चलाः भवन्ति विवेकभ्रष्टाश्च जायन्ते इति कविः वर्णयति। नलः युक्तायुक्तविचारवान् अपि स्त्रीलाभरूपचापलं निरोद्धुम् असमर्थः अभवत् ।[14]

एतेन वियोगिनामवस्थाविषयम् आलङ्कारिकाः यत् प्रवदन्ति तदत्र नले संगच्छते। कन्दर्प इत्थं कारयति विरहिणं विरहिणीं च ते ताः अनङ्गचिह्नं मुर्च्छाप्रलापादिस्मरविकारम् अनङ्गचिह्नं गोपयितुं यत्नवन्तः अपि न शक्नुवन्ति स्म । इमं भावं स्पष्टयति कविः श्रीहर्षः प्रथमसर्गे। यदर्थं नलः राजाऽपि राज्यशासनं मन्त्रिणे दत्वा वनविहारार्थं गन्तुं प्रवृत्तो भवति। कामेन सर्वे वशा इति कथनमत्र प्रमाणितं भवति। नलः अनङ्गचिह्न-पाण्डुत्वकृशत्व-गोत्रस्खलनादि विना क्षणमपि स्थातुं यदा न शशाक तदा निर्जनत्वात् उपवनविहारमैच्छत्, तथा च अभूत् । सः उपवने स्थित्वा दमयन्तीं विस्मर्तुं चेष्टमानोऽपि तथा नाभूत्। अपि च वनप्रदेशः उद्दीपकत्वात् विरहः सातिशयम् अनुभूतवान्। तत्र नलः वनभ्रमणकाले अपूर्वपुष्पादिदर्शनोत्सुकः सन् आदौ केतकीपुष्पं ददर्श। तद्दर्शनेन तस्य विरहः द्विगुणायितः। यतः वियोगभाजां हृदि धीरता अस्य पुष्पस्य दर्शनेन अपगच्छति।

---

[12] नैषधीयचरितम्, १/५१, पृ. १५

[13] साहित्यदर्पणः, ३/१९२, पृ. १४८

[14] नैषधीयचरितम्, १/५४, पृ. १६

कामदेवः कण्टकैः कटुं कर्णिशरं स्थापयति विरहहृदि। अतः क्रुद्धः शिवः तं जज्वाल, केतकमपि त्यक्तवान्। इदं पुष्पं स्वीयपत्रधारया वियोगिनां हृदयं दारुणि दारयतीति दारुणायते तेषां हृदयम्। केतकप्रदर्शनात् वियोगिनोः स्त्रीपुंसयोर्धैर्यभङ्गः, पत्रदर्शनाच्च वियोगिनोः हृदयं विदीर्णं भवतीति कथ्यते। तदत्र नले दृश्यते। ततः नलः पलाशपुष्पमद्राक्षीत्। एतेन तन्मनः विक्षिप्तमभूत्। तत् पुष्पं विरहिहृदयविदारकं भवति। इदं पलं मांसम् अश्नातीति पलाशः इति नामसार्थकतां धत्ते। यतो हि एतस्य सौन्दर्यं दर्शं दर्शं प्रियं प्रियां वा विना कृशतां प्रयान्ति ते। अतः तत् पुष्पं कालखण्डजं खण्डम् इव आलोकते राजा नलः। एतेन तस्य विरहावस्था अतिशयतां गच्छति इति उच्यते। अग्रे गच्छन् राजा एकां नवां लतां ददर्श या पवनेन कम्पमाना भवति स्म। राजा तां दरादराभ्यां पश्यतीति कविकथनम्। दरः नाम भयम्। एतदेतदर्थं यतो हि तत्र लतायां नायिकारोपः वायौ नायकारोपः। तयोः लतापवनयोः व्यवहारः नायिकानायकव्यवहारवत् यतः भवति, अतः तदवलोकनेन तयोः उद्दीपकत्वात् तस्य नलस्य भयं जायते। परन्तु प्रियासादृशात् आदरोऽपि तस्यां नलमनसः आयाति । एतेन ज्ञायते यत् विरहिणः यत् किमपि पश्यन्ति तेषु उन्माददशात्वात् यादृशी भावना तेषामस्ति तां भावनां तस्मिन् आक्षिपन्ति। यथाऽत्र नलः कृतवान्। इत्थं वर्णनं नलस्य तीव्रविरहावस्थां द्योतयति। तदुक्तं कविना -

> "नवालतागन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः।
> दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे ॥"[15]

चम्पकपुष्पं भृशं कामोद्दीपकं भवति। कथ्यते विरही विरहिणी वा तत् दृष्ट्वा मरणमाप्नोति। राजा मनसिजस्य बलिदीपिकाः इव चम्पककोरकावलीः व्यलोकयत्। अपि च वियोगिनां कृते कुसुमपरागः उद्दीपकः। यथा भस्मपाते चक्षुषि न किमपि दृश्यते, तथा कुसुमपरागः वियोगिनं कामान्धं करोति । नलः कामपुष्पाणां परागं दृष्ट्वा कामान्धो जात इति भावः।[16]

कोकिलकूजनं भृङ्गाणां गुञ्जनं स्थलकमलिनीनां विकसनसौन्दर्यम् इत्यादिकं सर्वं विरहपीडावर्धनाय भवतीति अभियुक्तानां मतम्। अत्रापि नलः अनादरेण तानि अपश्यत्। अत्र श्लोके अनास्थया ददर्श इति पदद्वयमस्ति। अनास्था नाम अनादरः। अत्र किमर्थमित्थं भावः चेत् तत्र दमयन्तीविरह एव हेतुरित्यर्थः। इदमपि कामशास्त्रीयं मतं यत् विरहकाले नैके उद्दीपकाः उद्दीपयन्ति तामवस्थाम्। तेषु पिकात् 'कुहू कुहू' इति श्रवणं, द्विजेभ्यः कलरवः, भ्रमरस्य गुञ्जनं, ब्राह्मणानां रक्तनेत्रं च। कथनस्याभिप्रायः यत् पिकः स्वभावात् रक्तलोचनः। तस्य शब्दं श्रुत्वा पान्थानां मूर्च्छा तापश्च भवति। क्रुद्धाः ब्राह्मणाः अपि रक्तनेत्राः सन्तः शापं ददते। तदर्थमेतान् राजा नलः स्वखेदमैक्षिष्ट इति कविः कथयति ।

एतेन नलः असामान्यं व्यवहरति। न सामान्यमिति वक्तुं शक्यते। यतः असौ आसीत् विरही। अन्यथा अग्रे गत्वा नलः नागकेसरं दृष्ट्वा निकषमिव न चिन्तयेत्। न वा कन्दर्पस्य शराः वा इमे इतीत्थं न कल्पयेत्। इयं हि शङ्का नैषधस्य व्यभिचारिभावं

[15] नैषधीयचरितम्, १/८५, पृ. २२

[16] नैषधीयचरितम्, १/८७, पृ. २३

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

प्रकाशयति यः विप्रलम्भे दृश्यते। तद्वत् अग्रे पुनः पाटलपुष्पस्तवकं दृष्ट्वा मदनस्य तृणीरभ्रमः राजनि भवति। इत्थं भ्रमः शङ्का वा तस्य असामान्यत्वं सूचयति। मनोविज्ञानस्य प्रसङ्गोऽत्र उपस्थापितः कविना। प्रकृते वस्तुनि अन्यथा चिन्तनमसामान्यानाम् उन्मादावस्थाग्रस्तानां वा भवति। अत्र नैषधे दमयन्त्याः अभावः तं भावं जागरयति। तथैव अग्रे मुनिद्रुमं (अगस्त्यवृक्षं) दृष्ट्वा तस्य राहुरिव भावः पूर्वावस्थां सूचयति। असूयाख्यः व्यभिचारिभावः एकत्र नले दृश्यते। तत्रासौ यदा स्मरोपकरणहेतून् पुष्पवृक्षान् इव फलवृक्षान् विलोकयति। तदा स्मरोपकरणमिदमिति ज्ञात्वा आदरभावं न प्रकटयति। सः पराङ्गमुखः भवति। कन्दर्पस्य पुरुषस्य इमे पदार्था इति ज्ञात्वाऽसौ असूयां प्रकटयति। तस्मै एषः स्वभावः कामुकानाम्। एतत्तु विदितचरमेवास्ति समेषां यत् वियोगिने तुहिनदीधितिः दवदहन इव भवति। शाकुन्तले कालिदासः तथा दुष्यन्तस्य कृते तन्मुखेन उक्तवान्- “तव कुसुमशरत्वं शीतरश्मित्वमिन्दोर्द्वयमिदमयथार्थं दृश्यते मद्विधेषु”[17] इति । विक्रमोवर्शीये राजा विदूषकं कथयति- “कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो न च मलयजं सर्वाङ्गीणं न वा मणिषष्टयः”[18] इति। तथाऽत्र श्रीहर्षोऽपि नलाय वर्णयति। तद्यथा-

> “नृपाय तस्मै हिमितं वनानिलैः सुधीकृतं पुष्परसैरहर्महः ।
> विनिर्मितं केतकरेणुभिः सितं वियोगिनेऽदत्त न कौमुदीमुदः ॥”[19]

अर्थात् शौत्यादिगुणयोगेन दिवसतेजः सुखान्तरं तस्मै ददौ, कौमुदीमुदः न ददौ। एतेन स्पष्टं राजा वियोगी आसीदिति। एषः शब्दोऽपि श्लोके विद्यते तस्य विशेषणत्वेन। कथ्यते रक्तानि अशोकपुष्पाणि दृष्ट्वा पान्थाः व्यथन्त इति। कामस्य ज्वलदस्त्रजालक-माग्नेयास्त्रकाण्डम् इति चिन्तयित्वा एवं भावमुपगच्छन्ति। अत्र नलोऽपि विरही तथा अचिन्तयदिति कविः वर्णयति । विरही नलः उद्यानं भ्रमितुमुपगतवान् आनन्दावाप्तये भैमीविस्मरणाय च, परन्तु विपरीतमभूत्। कविरपि तथा वर्णयति। कोकिलगानं, शुकस्तुतिः भ्रमरगुञ्जनादिकं तु ब्रह्मानन्दमददुः नाम बहिरामोदभरं सौरभ्यातिरेकमेवाविन्दत परन्तु विदर्भसुभ्रूविरहेण हेतुना आन्तरमामोदभरं नाविन्दत। प्रत्युत दुःखमेवान्वभूत् ।

**उपसंहारः**

एवमेवात्र दिङ्मात्रं नैषधीयचरिते विप्रलम्भशृङ्गारप्रयोगविचारः प्रदर्शितः। विवेचनात् विना विप्रलम्भं सम्भोगशृङ्गारस्य आनन्दः नानुभूयते इति आचार्याणां कथनं साधु भवति। नैषधीयचरिते नायिकानायकोः दमयन्तीनलयोः विच्छेदमिलनवर्णनं मुहुर्मुहुः दृश्यते । तेन तस्य महाकाव्यस्य रामणीयकं सर्वातिशायि अस्तीति वक्तुं शक्यते।

[17] अभिज्ञानशाकुन्तलम्, ३/३, पृ. १७५

[18] विक्रमोवर्शीयम्, ३/१०, पृ. १२०

[19] नैषधीयचरितम्, १/९९, पृ. २५

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

## सहायकग्रन्थसूची

- आनन्दवर्धनः। (२००३)। *ध्वन्यालोकः*। द्विवेदी, शिवप्रसादः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन ।
- कालिदासः। (२००८)। *अभिज्ञानशकुन्तलम्*। चक्रवर्ती, सत्यनारायणः (सम्पा.), कोलकाता : संस्कृत पुस्तक भाण्डार ।
- कालिदासः। (१९४२)। *विक्रमोर्वशीयम्*। शास्त्री, सुरेन्द्रनाथः (सम्पा.)। मुम्बाई : निर्णयसागरमुद्रण-यन्त्रालयः ।
- विश्वनाथकविराजः। (२०२१)। *साहित्यदर्पणः*। रथः, सूर्यमणिः (सम्पा.)। पुरी : सांविदी-प्रकाशनम्।
- श्रीहर्षः। (१९०७)। *नैषधीयचरितम्*। शर्मा, शिवदत्तः (सम्पा.)। मुम्बाई : निर्णयसागरमुद्रण-यन्त्रालयः ।
- भरतः। (१९९७)। *नाट्यशास्त्रम्*। मालवीयः, सुधाकरः (सम्पा.)। वाराणसी : कृष्णदास अकादेमी।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# मृच्छकटिकनाटके वर्णव्यवस्था

**सुस्मिता-दे**
**SACT-अध्यापिका, संस्कृतविभागः, सबं-सजनीकान्तमहाविद्यालयः**
**पश्चिमबङ्गः**

**प्रबन्धसारः**

*शूद्रकविरचिते मृच्छकटिकम् इति प्रख्याते नाटके प्राचीनभारतीयसमाजस्य यथार्थचित्रणं दृश्यते। अस्मिन् नाटके वर्ण-व्यवस्था न तु कठोरशास्त्रीयरूपेण, अपि तु मानवीयव्यवहारप्रधानया सामाजिकदृष्ट्या निरूपिता अस्ति। नाटकस्य नायकः चारुदत्तः ब्राह्मणवर्णस्य प्रतिनिधिरूपेण चित्रितः।तस्य जीवनचर्या दर्शयति यत् ब्राह्मणधर्मः शीलप्रधानः भवति, न केवलं जात्याधारितः। अनेन कविः ब्राह्मणवर्णस्य आदर्शस्वरूपं मानवीयगुणैः संयोजयति। क्षत्रियवर्णस्य प्रत्यक्षनायकः नाटके न दृश्यते, तथापि राजसत्ता, दण्डव्यवस्था, न्ययप्रक्रिया च क्षत्रियधर्मस्य सूचकाः सन्ति। वैश्यवर्णस्य प्रतिनिधिरूपेण संवाहकपात्रं नाटके महत्त्वपूर्णं स्थानं वहति। शूद्रवर्णस्य पात्राणि – परिचारिकाः, चेटिकाः, सामान्यजनाश्च नाटके बहुलतया दृश्यन्ते।*

**कुञ्चीशब्दाः - वर्णः, जातिः, ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः, समाजः चेत्यादयः।**

*************************************************************************

भारतीयसंस्कृतौ वर्णव्यवस्थायाः गुरुत्वपूर्णं स्थानं वर्तते। वर्णव्यवस्था प्राचीनभारतीयसमाजस्य आधारशीला आसीत्। अस्माकं देशे जातिव्यवस्था प्राचीनकालादेव वर्तते। वैदिककालात् अद्यावधि निरन्तरं प्रवाहमानायाः भारतीयसभ्यतायाः सामाजिकस्थितौ वर्णव्यवस्थायाः महत्त्वपूर्णम् अवदानम् अस्ति। अद्यत्वे भारते वयं यत् जातिव्यवस्थां पश्यामः तस्य आधारः प्राचीनशास्त्रेषु उल्लिखिता जातिव्यवस्था एव। अस्या जातिव्यवस्थायाः मुख्यं लक्ष्यं सामाजिकविकासः आसीत्। जातिशब्दस्य पर्यायवाची शब्दः 'वर्ण' इति। भारतीयसभ्यतया सह वर्णव्यवस्थायाः विकासोऽपि विचार्यते। वर्णव्यवस्थायां प्रत्येकं वर्णस्य स्वकीयं वैशिष्ट्यं कर्तव्यं चास्ति। सर्वेषां वर्णानां तत्तत् कर्म वैज्ञानिकाधारेण निर्धारितमस्ति। वर्णव्यवस्थायाः उद्देश्यं भारतीयसमाजे मानवानां सर्वतोमुखी विकासः एव। सर्ववर्णानां जनाः समानाः किन्तु गुणकर्मदृष्ट्या भेदः अस्ति। भगवता श्रीकृष्णेन गीतायाम् उक्तं यत्,-

"चातुर्वर्णं मया सृष्टं गुणकर्मविभागशः।"[1]

ब्राह्मणक्षत्रियवैश्यशूद्राः गुणकर्माधारेण निर्मिताः। जातिः कर्मगता, न जन्मगता इति गीतायां प्रदर्शितम्। अद्यत्वे समाजे वर्ण-व्यवस्थायाः विषये प्रचलिताः बहवाः भ्रान्तधारणाः बद्धमूलाः सन्ति।

ऋग्वेदस्य पुरुषसूक्तस्यानुसारं ब्राह्मणस्य उत्पत्तिः ईश्वरस्य मुखात् अभवत्। क्षत्रियस्य उत्पत्तिः हस्तात्, वैश्यस्य उत्पत्तिः ऊरुतः, शूद्रस्य उत्पत्तिः च पद्भ्याम् इति मन्यते।

"ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत॥"[2]

---

[1]गीता ४.१३ (i)

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

यथा मुख-हस्त-ऊरु-पादानां शरीरे स्वकीयम् अस्तित्वं महत्त्वं चास्ति, तथैव चतुर्वर्णानामपि आवश्यकतानुसारं समाजे महत्त्वमस्ति।

ब्राह्मणस्य उत्पत्तिः मुखादेव, अतः ब्राह्मणस्य कार्यम् अध्ययनं शिक्षणं च। बाहुः बलसूचकः, अतः क्षत्रियाणां कार्यं शौर्येण वीरत्वेन च जनानां रक्षणम्। ऊरुकार्यं गमनम्, अत एव वैश्यः जनानां दैनन्दिनम् आवश्यकं वस्तु व्यवस्थापयति। यतः शूद्रस्य पादाभ्याम् उत्पत्तिः, अतः तस्य कार्यम् पूर्वोक्तब्राह्मणादीनाम् अपेक्षया अधममस्ति। शूद्रः वर्णत्रयस्य सेवां करोति। प्रस्तुते शोधपत्रे मृच्छकटिकनाटके वर्णव्यवस्थाविषये विस्तरेण चर्चा क्रियते।

'वृञ् वरणे' इति धातोः वर्णशब्दः निष्पन्नः भवति इति केषाञ्चित् वैयाकरणानां मतम्। वृधातोः वरणं चयनं वा। तस्मात् 'वर्ण' इति शब्देन विशिष्टस्य वृत्तेः कर्मणो वा चयनं बोध्यते। समाजशास्त्रदृष्ट्या वर्णः तादृशः समूहः, यः स्वस्वीकृतकर्माधारेण विनिर्दिष्टः भवति।

वैदिकसाहित्ये 'वर्ण'-शब्दस्य प्रयोगः प्रधानतया रङ्गार्थे आलोकार्थे वा दृश्यते[3]। ऋग्वेदे 'वर्ण'-शब्दः प्रकाशस्य, तेजसः अथवा आभायाः बोधकः वर्तते। अनन्तरकाले सामाजिकव्यवस्थायां कर्माधारितविभागसूचकत्वेन 'वर्ण'-शब्दः व्यवहृतः। प्रारम्भिककाले वर्णव्यवस्थायाः आधारः कर्म एवासीत्। यस्य प्रमाणं मनुस्मृतौ परिलक्षते।

"जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते।

वेदपाठाद्भवेद् विप्रः ब्रह्म जानाति ब्राह्मणः॥"[4]

अतः अनेन श्लोकेन स्पष्टं भवति यत् वर्णव्यवस्था जन्माधीना नास्ति, किन्तु संस्काराधीना, विद्यानिष्ठा च ज्ञानाधीना इति।

"स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥"[5]

यजुर्वेदेऽपि चतुर्वर्णानां परिगणना तेषां कर्मानुसारेण कृता –

'ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे शूद्रम्'।[6]

अत्र 'ब्रह्मणे' इति पदेन वेदाध्ययन-यज्ञसम्पादनात्मकं ब्राह्मणकर्म सूचितम्।

क्षत्राय इत्यनेन रक्षण-शासनप्रधानः क्षत्रियधर्मः निरूप्यते।

मरुद्भ्यः इति प्राणशक्तिस्वरूपदेवतासम्बन्धेन वैश्यस्य कृषिवाणिज्यादिकं कर्म बोध्यते।

तपसे इत्यनेन परिश्रम-सेवात्मकः शूद्रधर्मः प्रतिपाद्यते।

महाभारते वर्णव्यवस्था जन्मप्रधानत्वात् अधिकं गुण-कर्मप्रधानत्वेन निरूपिता दृश्यते। यथा-

"न जात्या ब्राह्मणो भवेन्न जात्या क्षत्रियो भवेत्।

न जात्या वैश्यशूद्रौ वा कर्मणा वर्णता स्मृता॥"[7]

शूद्रकस्य **मृच्छकटिकम्** इति दृश्यकाव्यं यथार्थदृश्यकाव्यमस्ति। मानवजीवनस्य समाजस्य च प्रायः सर्वेषां विषयाणां यथार्थचित्रं प्रस्तुतं भवति इति

[2] पुरुषसूक्तम्, ऋग्वेदः – १०.९१.१२

[3] "अस्मै वर्णं सुपेशसं दधातु।", ऋग्वेद – १.३९.५

[4] मनुस्मृति – २.८३

[5] मनुस्मृति – २.२८

[6] यजुर्वेदसंहिता – ३०.५

[7] महाभारतम्, शान्तिपर्व -१८८.५-६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

कारणतः संस्कृतसाहित्ये अस्य स्वकीयं विशिष्टं स्थानमस्ति। मृच्छकटिककाले तथा शूद्रकस्य समये वर्णव्यवस्था अधिकबलवती नासीत्। प्रत्येकं वर्णः जातिरूपेण विकसितः आसीत्। कदाचित् कुत्रचित् स्थानेषु एका जातिः अनेकजातिषु विभक्ता आसीत्। तत्कालीने समाजे चत्वारः वर्णाः आसन्। यथा- ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः च । चतुर्णां वर्णानां निम्नलिखितधर्माः आसन्।

**ब्राह्मणः –** मनुस्मृतौ भगवता मनुना ब्राह्मणस्य कृते षट् प्रकाराणि कर्माणि वर्णितानि सन्ति। एतानि तावत् – अध्ययनम्, अध्यापनं, यज्ञकरणं, दानं, दानग्रहणं च। यथा -

"अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्॥"[8]

परन्तु अस्मिन् काले ब्राह्मणाः स्वकार्यं त्यक्त्वा व्यापारं कर्तुं प्रवृत्ताः। चारुदत्तः ब्राह्मणः सन्नपि एकः सार्थवाहः आसीत्। 'अवन्तिपुर्या द्विजसार्थवाहो'। चारुदत्तस्य पिता पितामहः च धनिनः प्रतिष्ठिताः सार्थवाहाः (वणिजानां मुख्याः) आसन्।[9]

तथा च शर्विलकः चतुर्वेदविद्ब्राह्मणस्य पुत्रः सन् अपि चौर्यवृत्तिः वेश्यावृत्तिः चेत्यादि दुष्कर्म अपि कर्तुं आरब्धवान्। शर्विलकः गणिकां मदनिकां प्रति आसक्तः अभवत्।[10]

एतेन वर्णव्यवस्था क्रमशः शिथिला भवितुम् आरब्धा इति ज्ञायते। मैत्रेयः स्वयमेव तत् स्वीकरोति। "यथा सर्वनागानां मध्ये डुण्डभस्तथा- सर्वब्राह्मणानां मध्येऽहं ब्राह्मणः।"[11]

शूद्रकस्य मृच्छकटिकनाटके ब्राह्मणः समाजे अधिकप्रतिष्ठितः आसीत्। अस्मिन् काले अपि ब्राह्मणक्षत्रियवैश्याः शूद्रवर्णात् श्रेष्ठाः इति मन्यते स्म। अस्य प्रमाणं प्रथमाङ्कस्य द्वात्रिंशत्संख्यकात् श्लोकात् प्राप्यते। यस्मिन् 'यया भेलया ब्राह्मणक्षत्रियवैश्याः तरन्ति, तया एव शूद्रा जनाः अपि स्नानं कुर्वन्ति' इति उक्तम्।[12]

एतेन कथनेन समाजे ब्राह्मणानां विशेषस्थानमासीत् इति ज्ञायते। विशेषतः अपि ते भोजनार्थम् आमन्त्रिताः, दानादिभिः अलङ्कृताः च आसन्। मृच्छकटिकानुसारं ब्राह्मणाय दक्षिणादानं पवित्रं कार्यमासीत्। सामाजिकोत्सवेषु, अनुष्ठानेषु, उपवासादिषु, धार्मिककर्मसु च ब्राह्मणाय दक्षिणादानस्य महत्त्वमासीत्। यथा -

'आर्य! सम्पन्नं भोजनं निःसपत्नं च।
अपि च दक्षिणा कापि ते भविष्यति॥'[13]

---

[8] मनु- १.८८

[9] स खलु सार्थवाहविनयदत्तस्य नप्ता सागरदत्तस्य तनयः सुगृहीतनामधेय आर्यचारुदत्तस्य नाम श्रेष्ठिचत्वरे प्रतिवसति। – मृच्छकटिकम्, नवमोऽङ्कः, पृ.-४३७

[10] अयं हि चतुर्वेदविदोऽप्रतिग्राहकस्य पुत्रः शर्विलको नाम ब्राह्मणो गणिकामदनिकार्थमकार्यमनुतिष्ठामि – मृच्छकटिकम्, तृतीयोऽङ्कः, पृ. १७२ ।

[11] मृच्छकटिकम् - तृतीयोऽङ्क, पृ. १५७

[12] ब्रह्मक्षत्रविशस्तरन्ति च यया नावा तयैवेतरे।
त्वं वापीव लतेव नौरिव जनं वेश्याऽसि सर्वं भज॥ तत्रैव, १.३२

[13] मृच्छकटिकम्- अङ्कः-१ पृष्टा-११

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

धर्मशास्त्रेण तेभ्यः विशेषाधिकारः दत्तः आसीत्। अतः सः समाजे विशेषादरपुरःसरं जनैः स्वीकृत आसीत्।

तत्कालीनसमाजे ब्राह्मणाः केवलं धनिकगृहेषु पूजां कुर्वन्ति स्म। वसन्तसेना स्वमातरम् उक्तवती यत्,- अद्य अहं स्नानं न करिष्यामि, अतः ब्राह्मणः स्वयं पूजां समापयतु इति।[14] वसन्तसेनापि ब्राह्मणानां प्रति सम्मानं प्रदर्शयति। 'पूजनीयो मे ब्राह्मणजनः।'[15]

समाजे ब्राह्मणानाम् एतावान् आदरः आसीत् यद्यदा जनाः ब्राह्मणनामग्रहणपुरःसरं शपथं कृत्वा किमपि वदन्ति स्म तदा जनाः तत् सत्यमेव स्वीकुर्वन्ति स्म। ब्राह्मणस्य यज्ञस्य च वस्तूनि चौरा अपि न हरन्ति स्म। शकार उक्तवान् यत्,- 'विप्रस्वं न हरामि काञ्चनमथो यज्ञार्थमभ्युद्धृतम्।'[16] कस्यचित् वधस्य अनन्तरमपि ब्राह्मणानां कृते मृत्युदण्डस्य व्यवस्था नासीत्। किन्तु सः स्वसम्पत्त्या सह देशात् निर्वासयितुं शक्यते स्म। न्यायाधीशः राजा पालकः उपादिदेश,- 'ब्राह्मणः यदि पातकी अपि भवेत्, तथापि तस्य विभवाः(धनसम्पत्तयः) अक्षताः एव स्युः।'[17] इति।

तथापि राजा पालकः स्वस्य दुष्टतां दर्शयन् चारुदत्तं हन्तुमादिष्टवान्, यदस्ति अपवादभूतम्।

यदा चारुदत्तः स्वयं वध्यभूमौ स्थितः अभवत्, तदा स स्वोपवीतम् उद्घाट्य स्वपुत्राय रोहसेनाय दातुमैच्छत्। अपरपक्षे तु शर्विलकः यज्ञोपवीतं स्वस्य चौर्यकर्मणः उपयोगि इति उपहसति। ब्राह्मणानां कार्यशिथिलतायां सत्याम् अपि सः स्ववर्णेन गर्वितः आसीत्। विदूषकः चेटस्य कार्येण क्रुद्धः सन् चारुदत्तं प्रति क्रोधदीप्तवचनेन अवदत्,- 'एषा निम्नजातिः जलं गृहीत्वा ब्राह्मणस्य पादप्रक्षालनं कर्तुं मां याचते।'[18]

विटः शकारः च मुख्यपुरुषौ भूत्वा अपि विदूषकस्य पादयोः प्रणाममकुरुताम्। चारुदत्तः नवमेऽङ्के मृत्युदण्डस्य आदेशं प्राप्य अतीव क्रुद्धवाक्येन अवदत्,- 'हे राजन्! यदि निर्दोषः ब्राह्मणः हतः तर्हि त्वमपि पुत्रपौत्रैः सह नरकं गमिष्यसि'।[19]

एवं मृच्छकटिककाले समाजे ब्राह्मणानां मुख्यं स्थानम् आसीदिति वक्तुं शक्यते।

**क्षत्रियः –** मनुमते क्षत्रियधर्मः तावत् जनरक्षणं, दानं, यज्ञः, अध्ययनम्, आसक्तिः चेति।[20]

शस्त्राणि तेषां जीवनसाधनं जनरक्षणं च तेषां परमधर्मः। परन्तु क्षत्रियाणां स्वाध्याये रुचिरासीत्। अस्य प्रमाणं जनकः, अजातशत्रुः, प्रवहनः, जाबाली चेत्यादयः क्षत्रियराजानः आसन्। मृच्छकटिकमिति

---

[14] चेटि! विज्ञापय मातरम् – 'अद्य न स्नास्यामि। तद् ब्राह्मण एव पूजां निवर्तयत्विति'। - मृच्छकटिकम्, अङ्कः१,पृ. ९९

[15] मृच्छकटिकम् - पृ. १०४

[16] मृच्छकटिकम्, दशमाङ्कः, पृ. ५४५

[17] "अयं हि पातकी विप्रो न वध्यो मनुरब्रवीत्।
राष्ट्रादस्मात्तु निर्वास्यो विभवैरक्षतैः सह॥" ( मृ.क. – ९.३९)
"न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम्।
राष्ट्रादेनं वहिष्कुर्य्यात् समग्रधनमक्षतम्॥" (मनु. – ८.३३०)

[18] भो वयस्य! एष इदानीं दास्याः पुत्रो भूत्वा पानीयं गृह्णाति, मां पुनर्ब्राह्मणं पादौ धावयति। मृ.क.,तृतीयोऽङ्कः– पृ. १५६

[19] अथ रिपुवचनाद्वा ब्राह्मणं मां निहंसि।
पतसि नरकमध्ये पुत्रपौत्रैः समेतः॥ मृ.क.- ९.४३

[20] "प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥" (मनु.-१.८९)

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

नाटकस्य एकस्मिन् श्लोके क्षत्रियवर्णस्य समुल्लेखः अस्ति।

"ब्रह्मक्षत्रविशस्तरन्ति च यया नावा तयैवेतरे
त्वं वापीव लतेव नौरिव जनं वेश्यासि सर्वं भज॥"[21]

मृच्छकटिके क्षत्रियधर्मकार्ये शिथिलता दरीदृश्यते। ब्राह्मणः सन्नपि शर्विलकः क्रान्तिकारिणां नेता आसीत्। वीरकः राजापालकस्य मुख्यसेनापतिः आसीत्। अपि च चन्दनकः राजापालकस्य शान्तिरक्षकः इति पदे नियुक्त आसीत्। सर्वोपरि अत्र क्षत्रियकर्मणां जातिस्थानं नासीत्।

**वैश्यः** - वैश्य-शब्दः 'विश्' धातोः 'ष्यञ्' इति प्रत्यययोगेन निष्पद्यते। मनुस्मृत्यनुसारं पशुरक्षणं, दानदाक्षिण्यं, यज्ञकरणं, वेदाध्ययनं, व्यापारः, कृषिकार्यं च वैश्यानां मुख्यं कार्यमासीत्।[22] श्रीमद्भागवद्गीतायां कृषिः, गोरक्षणं, वाणिज्यं च वैश्यानां स्वाभाविकं कर्म इति उक्तमस्ति।[23] यः ब्राह्मणः क्षत्रियकार्यद्वारा जीवनयापनं कर्तुं न शक्नोति सः कृषिगोपालनं व्यापारं च वैश्यरूपेण कर्तुं शक्नोति इत्यपि मनुः प्रतिपादयति।[24] तस्य सुप्रयत्नेन राज्यस्य देशस्य च आर्थिकदशा सुदृढा भवति।

सम्भवतः अस्य प्रत्ययस्य आधारेण चारुदत्तस्य पितामहः पिता च व्यापारद्वारा प्रभूतं धनं प्राप्तवन्तौ। चारुदत्तः ब्राह्मणः सन् सार्थवाहः आसीत्। उज्जयिन्याः प्रसिद्धः गायकः रेमिलः अपि सार्थवाहः आसीत्। सः चारुदत्तस्य शर्विलकस्य च मित्रमासीत्। जूर्णवृद्धः अपि एकः व्यापारी आसीत्, यः तस्य कुसुमवासितमुत्तरीयं चारुदत्ताय प्रदत्तवान्। वैश्याः न केवलं स्वदेशे अपि तु परदेशैः सहापि व्यापारं कुर्वन्ति स्म। शूद्रकस्य काले नौकाः, भेलाः चापि व्यापाराय उपयुज्यन्ते स्म।[25] मृच्छकटिके वैश्यशब्दस्य पर्यायत्वेन श्रेष्ठी, वणिक् सार्थवाहः चेति शब्दाः प्रयुक्ताः। अन्यनगरेषु देशेषु वा व्यापारकाले नगरस्य व्यापारिणः सामूहिकभावेन एव गच्छन्ति स्म। अस्य समूहस्य नाम 'सार्थः' इति आसीत्। महाभारते सार्थस्य नेता 'सार्थवाहः' इति उच्यते।[26] अमरकोशस्य टीकाकारेण क्षीरस्वामिना उक्तं यत्,- "सार्थान् सधनान् सरतो वा पान्थान् वहति सार्थवाहः।"[27] मृच्छकटिकमिति ग्रन्थस्य द्वितीयाङ्के मदनिका वसन्तसेनां स्वप्रेमिणः विषये पृच्छति, "किं भवन्त एतादृशं युवानं व्यापारिणम् इच्छन्ति यः बहुनगराणि गत्वा बहु धनम् आनयति?"[28] वसन्तसेनायाः प्रतिक्रिया अस्ति, - "चेटि! व्यापारी प्रियं स्त्रियं त्यक्त्वा अन्यदेशं गत्वा विरहात् महद्

---

[21] मृच्छकटिकम् - प्रथमोऽङ्कः – श्लोकः - ३२

[22] पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च॥ (मनु.-१/९०)

[23] कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्। (गीता- १८.४४)

[24] उभाभ्यमप्यजीवंस्तु कथं स्यादिति चेद्भवेत्।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम्॥ (मनु.- १०.८२)

[25] विदूषकः- भवति किं युस्माकं यानपात्राणि वहन्ति? ( मृच्छकटिकम् – पृ.- ३०४)

[26] अहं सार्थस्य नेता वै सार्थवाहः सचीस्मते। (महाभारत – वनपर्व- ६१-१२२)

[27] अमरकोश – पृ. - २१८

[28] किमनेकनगराभिगमनजनितविभवविस्तारो वणिजयुवा वा काम्यते? ( मृच्छकटिकम् - द्वितीयोऽङ्कः – पृ.-१०४)

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

दुःखं जनयति" ।[29] वैश्याः व्याजेन धनम् ऋणरूपेण ददाति। विदूषकवचनेन अस्य प्रमाणं प्राप्यते। "भो चारुदत्तः धनिकस्त आदतः"[30]। एवं मृच्छकटिकनाटके वैश्यजातेः वैशिष्ट्यम् उल्लिखितम्।

**शूद्रः** – चतुर्णां वर्णानां सेवा शूद्रकर्म। मनुस्मृतौ शूद्रस्य एकमेव कर्तव्यं द्विजातिसेवा इति वर्णितम्।[31] श्रीमद्भगवद्गीतायां सेवा तस्य स्वाभाविकं कर्तव्यत्वेन दर्शितमस्ति।[32] मृच्छकटिके लौहकारः, चर्मकारः, मालाकारः चेत्यादीनां जातीनाम् उल्लेखः अस्ति। तस्मिन् काले जनाः स्वजातिविषये परस्परम् उपहसन्ति स्म। चन्दनकः वीरकं प्रति उक्तवान्, - 'पूज्यमानो बहुमानस्वात्मनो जातिं न स्मरसि?' वीरकः अपि स्वजातिविषये एवं प्रत्युवाच,- हे कटुभाषि! तव जातिः अतीव शुद्धा, माता भेरी, पिता पटहः, भ्राता करटकः, त्वमपि सेनापतिः अभवत्।[33] ते शूद्रजातिम् आगताः। दशमाङ्के यत्र चण्डालानां प्राधान्यम् अस्ति, तत्र अस्पृश्यतायाः लेशोऽपि नास्ति। चारुदत्तः चण्डालात् किमपि वस्तुं न गृहीतवान्। सेवकेन वर्धमानकेन चारुदत्तस्य पादप्रक्षालनं कर्तव्यमासीत्। समाजे गणिकाजात्याः किञ्चिदपि आदरणीयं स्थानं नासीत्। वसन्तसेनां प्रति 'मार्गजाता लतेव' इति उच्यते। सर्वे तस्या उपभोगं अकुर्वन्। नाटके व्यापारी, स्वर्णकारः, अन्यजातीयानां च उल्लेखः अस्ति। येन समाजस्य भिन्नाः पक्षाः प्रतिबिम्बिता भवन्ति।

उक्तशोधपत्रात् स्पष्टं भवति यत् न केवलं वर्तमानकाले अपि तु तस्मिन् कालेऽपि समाजे विभिन्नेषु वर्णेषु उच्चनीचभावः प्रबलः आसीत्। मृच्छकटिकनाटके तत्कालीनसमाजस्य जातिव्यवस्थायाः एतत् चित्रं प्रदर्शयति, यत्र भिन्नजातीयजनाः एकत्र निवसन्ति स्म, तयोर्मध्ये सामाजिकसम्बन्धश्च आसीत्।

## सहायकग्रन्थसूची


**वङ्गभाषाश्रितग्रन्थाः** -

- शुद्रकः। १४०७ (बङ्गाब्दः)। *मृच्छकटिकम्* । दे, अविनाशचन्द्रः; सिद्धान्तः, शुभेन्दुकुमारः (सम्पादकौ)। कलिकाता : संस्कृतपुस्तक-भाण्डार।
- वेदव्यासः। (२०२२) *महाभारतम् (तृतीयखण्डः)* / पाण्डेय, शास्त्री; दत्तः, रामनारायणः (अनु.)। गोरक्षपुर : गीताप्रेस्।
- मनुः। (२०१६)। *मनुसंहिता*। मुखोपाध्यायः, उपेन्द्रनाथ (सम्पा.)। कलिकाता : वसुमती साहित्यमन्दिरम्।
- मुखोपाध्यायः, विजया। (२०१६)। *संस्कृत नाटके प्राचीन भारतेर समाजचित्र (शूद्रकेर*


[29] चेटि, उपारूढस्नेहमपि प्रणयिजनं परित्यज्य देशान्तरगमनेन वणिजजनो महद्वियोगजं दुःखमुत्पादयति। (मृच्छकटिकम् - द्वितीयोऽङ्कः – पृ.-१०४)

[30] मृच्छकटिकम्- पञ्चमोऽङ्कः, पृ.- २७०

[31] एकमेव हि शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां सुश्रूषामनसूयया ॥
(मन्वर्थमुक्तावलीसंवलिता- १.९१)

[32] परिचर्यात्मकं कर्म शूद्रस्यपि स्वभावजम्। गीता- १८.४४

[33] जातिस्तव विशुद्धा माता भेरी पितापि ते पटहः।
दुर्मुख! करटकभ्राता त्वमपि सेनापतिर्जातः ॥ ( मृ.क.- ६.३२)

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

*मृच्छकटिक)*। कलिकाता : रामकृष्ण मिशन् इनस्टिटिउट् अफ् कालचार् ।

- वेदव्यासः। (२००७) *श्रीमद्भगवद्गीता (तत्त्वविवेचनी)* (सप्तमसंस्करणम्)। वन्द्योपाध्यायः, गायत्री (अनु.)। गोरखपुर : गीता प्रेस्,।

**हिन्दीभाषाश्रितग्रन्था –**

- झाँ, अनिलकुमार। (२००६)। *संस्कृत नाटको मे भारतीय समाज* (प्रथमसंस्करणम्)। जयपुर : हंसा प्रकाशन।
- शर्मा, चित्रा। (१९६९)। *संस्कृत नाटको मे समाज-चित्रण*। नई दिल्ली : मेहरचन्द्र लछमनदास पब्लिकेशन्स्।
- सुभाषः, विद्यालंकारः। (२०१५)। *महाभारत कथा*। दिल्ली : प्रतिभा प्रकाशन।

**संस्कृतभाषाश्रितग्रन्थाः -**

- (२०२३)। *ऋग्वेदसंहिता* (प्रथमसंस्करणम्), कुमारः, धर्मेन्द्रः (सम्पा.)। दिल्ली : दिल्ली संस्कृत अकादमी।
- कुमारः, सुरेन्द्रः। (२०१७)। *विशुद्ध मनुस्मृतिः* (अष्टमसंस्करणम्)। दिल्ली : आर्ष साहित्य प्रचार ट्रस्ट्।
- शूद्रकः। (२०२१)। *मृच्छकटिकम्*। मिश्रः, जगदीशचन्द्रः (सम्पा.)। वाराणसी : चौखाम्बा सुरभारती प्रकाशन।
- शूद्रकः। (२००९)। *मृच्छकटिकम्*। रांगेयः, राघवः (सम्पा.)। दिल्ली : राजपाल एण्ड सन्ज्।
- (२०१५)। *यजुर्वेदः*। व्यासः, रेखा (सम्पा.)। दिल्ली : संस्कृत साहित्य प्रकाशन।
- सिंहः, अमरः। (१९३७)। *अमरकोषः*। श्रीमन्नालालः, अभिमन्युः (सम्पा.)। वेनारस् : मास्टर् खेलाड़ीलाल एण्ड सन्स्,।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# संस्कृतभाषायां पाठसमीक्षणप्रक्रिया – एकं समीक्षणात्मकम् अध्ययनम्

**प्रलयशङ्कर-अधिकारी**
**सहायकाध्यापकः, संस्कृतविभागः, प्रभातकुमारमहाविद्यालयः**
**पश्चिमबङ्गः**

**प्रबन्धसारः**

*संस्कृतभाषा भारतीयज्ञानपरम्परायाः प्राचीनतमा, समृद्धतमा च भाषा मन्यते। वेदाः, उपनिषदः, दर्शनग्रन्थाः, काव्यनाटकानि, धर्मशास्त्राणि, आयुर्वेदग्रन्थाः चेत्यादयः अस्यां भाषायां विरचिताः सन्ति। एतेषां ग्रन्थानां यथार्थार्थबोधनाय शुद्धपाठस्य अत्यावश्यकता अस्ति। अत्रैव* ***पाठसमीक्षणम् (Proofreading)*** *नामकः विषयः विशेषमहत्त्वं प्राप्नोति।*

*अयं लेखः संस्कृतभाषायां पाठसमीक्षणस्य संकल्पनां, स्वरूपम्, ऐतिहासिकपृष्ठभूमिं, तस्य आवश्यकतां, सामान्यदोषप्रकारान्, पाठसमीक्षणे प्रयुक्तचिह्नानि, पाठसमीक्षकस्य भूमिकाम्, आधुनिकडिजिटलपरिप्रेक्ष्ये पाठसमीक्षणस्य स्वरूपं, समापनवाक्यस्य (Colophon) महत्त्वं च समीक्षणात्मकदृष्ट्या विवेचयति।*

*प्रथमं पाठसमीक्षणस्य परिभाषा, व्युत्पत्तिः, सम्पादनाद् भेदः च स्पष्टतया निरूपितः। ततः संस्कृतपाण्डुलिपिषु पाठसमीक्षणस्य ऐतिहासिकपरम्परा, लिपिकाराणां योगदानं, दक्षिणभारत-कश्मीरदेशयोः विशेषपरम्परा च विवृता। अनन्तरं संस्कृतग्रन्थेषु दृश्यन्ते ये सामान्यदोषाः– सन्धिदोषाः, समासदोषाः, कारकविभक्तिदोषाः, लिङ्गवचनपुरुषदोषाः, धातुरूपकालदोषाः, विरामचिह्नदोषाः– तेषां स्वरूपम् उदाहरणैः सह प्रदर्शितम्।*

*लेखे पाठसमीक्षणे प्रयुक्तानि सार्वत्रिकचिह्नानि यथा ↑, ¶, stet, = इत्यादीनां प्रयोगः संस्कृतपाठेषु कथं क्रियते, तदपि उदाहरणैः स्पष्टीकृतम्। पाठसमीक्षकस्य गुणाः, शब्दकोश-व्याकरणग्रन्थादीनाम् उपयोगः, तुलनात्मकपठनस्य आवश्यकता च विशदं विवेचिताः।*

*आधुनिकप्रसङ्गे डिजिटलसंस्करणे पाठसमीक्षणस्य भूमिका, OCR-दोषसंशोधनं, Google Input Tools, Sanskrit Heritage Reader इत्यादीनां उपयोगः अपि अस्मिन् लेखे सम्यगुपस्थापितः। अन्ते समापनवाक्यस्य परम्परा तथा अनुसन्धानकृत्ये पाठसमीक्षणस्य अनिवार्यता उपसंहारे प्रतिपादिता।*

*समग्रतः अयं लेखः संस्कृतपाठसमीक्षणं केवलं भाषाशुद्धिकरणस्य साधनं न, अपि तु ग्रन्थप्रमाणिकतायाः, अनुसन्धानस्य विश्वसनीयतायाः, तथा भारतीयज्ञानपरम्परायाः संरक्षणस्य अत्यावश्यकं वैज्ञानिकं कर्म इति सिद्ध्यति।*

**कुञ्चीशब्दाः - पाठसमीक्षणं, संस्कृतभाषा, पाठदोषाः, पाण्डुलिपिशोधनं, पाठसमीक्षकः, शुद्धपाठः, ग्रन्थप्रामाणिकता, डिजिटलपाठसमीक्षणं, OCR-दोषसंशोधनं, समापनवाक्यम्, अनुसन्धानपद्धतिः चेत्यादयः।**

*****************************************************************************

## प्रस्तावना

मानवसभ्यातायाः इतिहासे भाषा केवलं भावव्यक्तेः साधनं नास्ति, अपि तु ज्ञानस्य, संस्कृतेः, आध्यात्मिकतायाः, चेतनायाः च प्रमुखो वाहकः अस्ति। एतस्मिन् सन्दर्भे संस्कृतभाषा भारतीयज्ञानपरम्परायाः अमूल्यं निधिं वहति। तदस्ति काव्यादर्शे-

**संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः**[1]। इति दण्डिनः काव्यादर्शे, वेदे, उपनिषदि, दर्शने, साहित्ये, नाट्यशास्त्रे, आयुर्वेदे, ज्योतिषे, अन्येषु च

[1] काव्यादर्शः-१-३२

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

विविधशास्त्रेषु संस्कृतभाषया एव ग्रन्थाः रचिताः सन्ति। अद्यापि च तेषां ग्रन्थानां सम्यग् अध्ययनं, संशोधनं च गवेषणक्षेत्रे अत्यन्तं महत्त्वपूर्णं वर्तते। एवंविधेषु बहुषु प्राचीनपाण्डुलिपिषु पाठदोषाः, लिपिदोषाः, व्याकरणदोषाश्च दृश्यन्ते, ये पाठकानां, सम्पादकानां च कृते बाधायाः कारणं भवन्ति। स्वल्पोऽपि शब्ददोषः संस्कृतग्रन्थेषु गम्भीरार्थभ्रान्तिं जनयितुं शक्नोति। अस्यैव तथ्यस्य पुष्टिः प्रसिद्धस्य लेखकस्य मार्क्-ट्वेन्-इत्यस्य वाक्येन दृश्यते– **"The difference between the almost right word and the right word is really a large matter."**[2] अतो हि पाठसमीक्षणम् (Proofreading) अनिवार्यप्रक्रिया इति मन्यते। विशेषतः संस्कृतभाषायाम् इयं प्रक्रिया केवलं वर्णदोषपरिष्करणरूपेण न स्थिता, अपि तु अर्थगौरवविचारः, व्याकरणस्य नियमानां परीक्षणं, छन्दः, अलङ्कारः, प्रयोगसंगतता चैतेषां सम्यग्विवेचनरूपेण विस्तारिता भवति।

संस्कृतपाठसमीक्षणस्य इतिहासः अपि गौरवशाली अस्ति। दक्षिणभारते, कश्मीरप्रदेशे, जयपुरे, वाराणस्यां च सम्प्रदायशः पाठशुद्धिपद्धतयः विद्यमानाः आसन्। लिपिकाराः, सम्पादकाः च परिश्रमेण ग्रन्थेषु दोषपरिहारं कुर्वन्तः आसन्। अधुनातनकाले पाठसमीक्षणं विज्ञानसम्मतप्रक्रिया-निर्भरं बहुशः जातम्। अत्र विशिष्टानि संशोधनचिह्नानि (proofreading symbols), सॉफ़्ट्वेयराधारितोपकरणानि, देवनागरी-OCR, Google Input Tools, Heritage Reader इत्यादीनाम् उपयोगः च दृश्यते। एवं प्रकारेण "संस्कृतभाषायां पाठसमीक्षणप्रक्रिया – एकं समीक्षणात्मकम् अध्ययनम्" अस्मिन्गवेषणप्रबन्धे पाठदोषाणां विवेचनं, पाठशुद्धिपद्धतेः ऐतिहासिकपृष्ठभूमिः, पाठसंशोधकचिह्नानां प्रयोगः, पाठसमीक्षकस्य कार्यं, डिजिटलसमीक्षणस्य प्रक्रिया च सम्यक् समालोच्य प्रस्तूयते। अनेन गवेषणेन पाठकाः, गवेषकाः च संस्कृतग्रन्थानां शुद्धपाठनिमन्त्रणे समर्थाः भविष्यन्ति। अपि च पाठसमीक्षकस्य कौशलं, कार्यदक्षता च स्पष्टतया ज्ञातुं शक्नुवन्ति।

### १. पाठसमीक्षणस्य परिभाषा आवश्यकता च

**(Definition and Necessity of Proofreading)**

पाठसमीक्षणं नाम लिपिकृतग्रन्थस्य मुद्रितग्रन्थस्य वा पाठे विद्यमानानां त्रुटीनां परीक्षणं, परीक्षणात्परं तासां परिष्करणं च इति प्रक्रिया। अस्य मुख्यं लक्ष्यं शुद्धं, स्पष्टं च पाठं सुनिश्चितं भवति। विशेषतः संस्कृतभाषायां यत्र लघ्वी अपि त्रुटिः अर्थभङ्गं, व्याकरणदोषं, छन्दोभङ्गं च जनयति, तत्र पाठसमीक्षणं परमावश्यकं भवति। भर्तृहरिः 'वाक्यपदीये' भाषाशुद्धता एव ज्ञानस्य मूलम् इति निर्दिष्टवान्। तद्यथा- "तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।"[3] पाण्डुलिपिषु, मुद्रितग्रन्थेषु वा विविधप्रकाराः त्रुटयः दृश्यन्ते – वर्णविन्यासदोषाः, विरामचिह्नदोषाः, विभक्तिदोषाः, वाक्यरचनायाः असङ्गतयः च। एते सर्वे दोषाः पाठकस्य बोधं बाधन्ते, ग्रन्थस्य प्रमाणिकताम् अपि निहन्ति। अतो हि, संस्कृते प्रत्येकं शास्त्रीयग्रन्थानाम् अप्रकाशितपूर्वाणां यथावत् परीक्षितुं पाठसमीक्षणं करणीयम्। एषा प्रक्रिया न केवलं मुद्रणत्रुटिनिवारणाय, किन्तु भाषाशुद्धतायाः, छन्दः-

[2] Letter to George Bainton

[3] वाक्यपदीयं, ब्रह्मकाण्डं, कारिका 14

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

संगतेः, पदप्रयोगयुक्ततायाश्च सुनिश्चयाय अपि क्रियते। तदर्थं शास्त्रीयसंस्कृतग्रन्थेषु पाठसमीक्षणं गवेषणस्य, अध्ययनस्य च मूलाधारः इति द्रष्टव्यम्।

- **पाठसमीक्षणस्य परिभाषा (Definition of Proofreading)**

पाठसमीक्षणस्य परिभाषायां प्रथमं 'पाठसमीक्षणम्' इत्यस्य व्युत्पत्तिः ज्ञेया। 'पाठ' शब्दः पठ्-धातोः निष्पन्नः, यस्य अर्थः पठनीयवस्तु लेख्यं वा; 'समीक्षण' शब्दः सम् + ईक्ष् (धातुः) इत्यस्मात् निष्पन्नः, यः सूक्ष्मपरीक्षणं बोधयति। अतः पाठसमीक्षणं नाम ग्रन्थस्य लेख्यपाठस्य वा भाषा-शुद्धतां, व्याकरण-नियमानुगततां च परिशील्य निरीक्षणं, त्रुटीनां परीक्षणं, दूरीकरणं च वक्ति। तदस्ति वाक्यपदीये-

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धं इव ज्ञानं सर्वं शब्देन भासते ॥[4] इति।

अत्र उद्धरणं स्पष्टं करोति यत् विना शुद्धपाठेन ग्रन्थस्य प्रामाणिकता न केवलं हन्यते, किन्तु अध्ययनस्य, गवेषणस्य च आधारः दुर्बलः भवति।

- **सम्पादनकर्मणा पाठसमीक्षणस्य भेदः (Difference Between Editing and Proofreading)**

अत्र सम्पादनकर्मणा पाठसमीक्षणस्य भेदः अपि स्पष्टीकर्तव्यः। सम्पादनं सामान्यतः लेखनप्रक्रियायाः मध्यभागे क्रियते यत्र भावपरिष्कारः, अनुच्छेदयोजना, शैलीगौरवादीनां विचारः भवति; किन्तु पाठसमीक्षणं लेखनकर्मणः समाप्त्यनन्तरं क्रियते, यत्र वर्णदोषः, सन्धिदोषः, विरामचिह्नविपर्यासः, विभक्तिदोषः, लिङ्गवचनादि-दोषाः च परीक्ष्य निवार्यन्ते। विशेषतः संस्कृतग्रन्थेषु पाठसमीक्षणम् अतीवावश्यकं, यतः हस्तलिखितपाण्डुलिपिषु त्रुटिप्रसङ्गः बहुधा दृश्यते। अनेन कारणेन संस्कृतपाठसमीक्षणं न केवलं त्रुटिनिवारणकर्म, किन्तु मूलपाठस्य प्रमाणिकरूपेण स्थापने अतीवावश्यकः वैज्ञानिकः च प्रयासः इति मन्यते। **'Textual criticism is the science of discovering error in texts and the art of removing it.'**[5] एषा पद्धतिः पाठशुद्ध्यै, ग्रन्थस्य प्रामाणिकतायै च आधारभूतं विज्ञानम् इति स्पष्टं करोति।

- **पाठसमीक्षणस्य उद्देश्यम् (Objectives of Proofreading):**

➢ **शुद्धतायाः सुनिश्चितिः (Ensuring Accuracy):**

पाठसमीक्षणस्य प्रमुखं लक्ष्यं लेख्यपाठस्य शुद्धतानिश्चयो भवति। पाण्डुलिपिषु मुद्रितग्रन्थेषु वा लेखनकाले अपत्यक्तदोषाः, वर्णत्रुटयः, सन्धि-विच्छेददोषाः, विरामचिह्नदोषाः, लिङ्गवचनादयः व्याकरणदोषाः च समुपस्थिताः सन्ति। एतेषां सर्वेषां दोषाणां परिमार्जनं शुद्धपाठस्य स्थापनायै आवश्यकं भवति। पाठसमीक्षकः इमान् दोषान् सूक्ष्मरीत्या परीक्ष्य संशोधयति, येन ग्रन्थः भाषा-नियमानुगतः सुसम्बद्धः च भविष्यति।

➢ **ग्रन्थस्य प्रमाणिकतायाः स्थिरीकरणम् (Establishing the Authenticity of the Text):**

शुद्धपाठेन सह ग्रन्थस्य प्रमाणिकता अपि स्थिरीकृता भवति। विशेषतः संस्कृतवाङ्मये, यत्र

[4]वाक्यपदीयं, पदकाण्डं, कारिका 131

[5] The application of thought to textual criticism

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

अनेके प्राचीनग्रन्थाः शताब्देभ्यः पूर्वं विरचिताः सन्ति, तेषां यथार्थरूपस्थापनाय पाठसमीक्षणम् आवश्यकतमम् अस्ति। मूलपाठस्य आधारसहितं पाठान्तराणां परीक्षणं, तुलनात्मकपाठसमीक्षणं च कृत्वा प्रमाणिकपाठः स्थाप्यते। अनेन गवेषकाः, पाठकाः च विश्वसनीयपाठं प्राप्तुं शक्नुवन्ति।

- **गवेषणार्थे उपयुक्तपाठनिर्माणम् (Creating a Reliable Text for Research Purposes):**

गवेषणकर्मणि पाठस्य शुद्धता, संगतता च अनिवार्ये। यदि मूलपाठः दोषयुक्तः भवति तर्हि तस्मात् निष्कृष्टाः निष्कर्षाः अपि भ्रमजनकाः भविष्यन्ति। अतो हेतोः, अनुसन्धानार्थं यः पाठः उपयुज्यते, सः पाठसमीक्षणेन परीक्षितः, संशोधितः, प्रमाणीकृतश्च भवितव्यः। इयं प्रक्रिया अनुसन्धानस्य वैज्ञानिकतां सुनिश्चितयति।

एतानि उद्देश्यानि पाठसमीक्षणकर्मणः आधारस्तम्भरूपेण स्थाप्यन्ते, येन संस्कृतसाहित्ये सत्यं, शुद्धं च ज्ञानं प्रचारं लभते। तथाहि दृश्यते एका उद्धृतिः- **"पाठसमीक्षणं नाम न केवलं वर्णानां संशोधनम्, अपि तु मूललेखकस्य अभिप्रायस्य यथावत् रक्षणम्। यदा वयं पाठं शोधयामः, तदा वयं सत्यस्य अन्वेषणं कुर्मः।"**[6]

- **पाठसमीक्षणस्य आवश्यकता (Necessity of Proofreading)**

पाठसमीक्षणं ग्रन्थनिर्माणप्रक्रियायाः अत्यावश्यकः भागः। कारणं यत्, लेखनप्रक्रियायां विविधदोषाः सुलभतया प्रवेष्टुं शक्नुवन्ति। तथाहि उच्यते कपिलमहोदयेन – **"पाठसमीक्षणं तु ग्रन्थस्य चक्षुः इव वर्तते; येन विना विद्वान् अपि अन्ध इव मार्गच्युतो भवति।"**[7] इति। अत्र पाठदोषाणां सम्भाव्यता, त्रुटिपूर्णपाठस्य दुष्परिणामाः, शास्त्रीयग्रन्थेषु लघोरपि दोषस्य प्रभावः च विचारणीयबिन्दवः सन्ति।

- **पाठदोषाणां सम्भाव्यता (Possibility of textual errors)**

पाण्डुलिपिनिर्माणे, विशेषतः हस्तलिखितग्रन्थेषु, वर्णदोषाः, सन्धिविच्छेददोषाः, लिङ्गवचनविभक्ति-दोषाः, विरामचिह्नदोषाः च सुलभतया दृश्यन्ते। यः लिपिकारः लेखं करोति, सः मानवीयदोषाणां सम्भाव्यत्वात् किञ्चन स्खलनं करोति। तादृशा दोषा यदि समये न परीक्ष्यन्ते तर्हि ते ग्रन्थे स्थायीभवन्ति। अनेन पाठसमीक्षणम् अत्यावश्यकं येन सूक्ष्मरीत्या सर्वदोषाणां परीक्षणं विनिवर्तनं च शक्यम्।

- **त्रुटिपूर्णपाठस्य दुष्परिणामाः (Consequences of an incorrect text)**

यदि पाठसमीक्षणं न क्रियते, तर्हि पाठे ये अपशब्दाः, अपव्याकरणं वा दृश्यते, तस्य प्रभावेण पाठकमानसे द्वैविध्यमुत्पद्यते – (१) भ्रमजनकबोधः, (२) लेखस्य वा ग्रन्थस्य अप्रामाणिकत्वबुद्धिः। विशेषतः विद्वत्सभायां त्रुटिपूर्णपाठस्य प्रकाशनं लेखकरूपेण लज्जाजनकं च भविष्यति। अतः पाठसमीक्षणम् एकं विश्वसनीयतारक्षकमिव कार्यं करोति।

**शास्त्रीयग्रन्थेषु लघोरपि दोषस्य गम्भीरप्रभावः (Grave impact of even minor errors in classical texts)**

न्यायः, व्याकरणं, मीमांसा, वेदान्तः, साहित्यशास्त्रं चेत्यादिषु संस्कृतशास्त्रेषु लघुतमदोषः अपि अर्थभेदाय कारणं भवति। एकस्य स्वरस्य,

---

[6] संस्कृतपाठसमीक्षापद्धतिः. प्रथमावृत्तिः

[7] Sanskrit Sahitya ka Itihas.

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

एकस्य सन्धेः, एकस्य कारकस्य दोषात् सम्पूर्णपदस्य, वाक्यस्य वा अर्थः विपरीतः भविष्यति। उदाहरणतया – "धर्मेण" इत्यस्य स्थाने "धर्मे" इत्यस्य प्रयोगः अर्थविपर्यासं जनयति। अतो हि शास्त्रीयग्रन्थेषु शुद्धपाठप्रस्तावनायां पाठसमीक्षणं वैज्ञानिकपद्धत्या करणीयम्। अत एव महाभाष्यकारेण पतञ्जलिना उक्तं यत् – **'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः...'**[8] **इति।** अनेन स्पष्टं भवति यत् पाठसमीक्षणं विना शब्दस्य शक्तिः अर्थश्च नश्यति।

- **पाठसमीक्षणे त्रुटिपरिज्ञानम् (Identification of Errors in Proofreading)**

पाठसमीक्षणकर्मणि प्रमुखं कार्यं भवति – पाठे विद्यमानानां त्रुटीनां यथावत् परिज्ञानं निवारणं च। अत्र त्रुटयः विविधप्रकाराः दृश्यन्ते, यथा भाषासम्बद्धदोषाः, छन्दोविचलनानि, व्याकरणदोषाः, अर्थभ्रान्तयः च। एते सर्वे दोषाः पाठस्य गुणवत्तायाः ह्रासं कुर्वन्ति, अतः एषां सूक्ष्मतया परीक्षणं आवश्यकम्।

➢ **भाषाशास्त्रीयत्रुटयः(Linguistic Errors)**

भाषायाः प्रयोगे यदि अशुद्धिः भवति, तर्हि पाठकानां सम्यग्बोधनं बाध्यते। यथा अनुपयुक्तशब्दप्रयोगः, वाक्यरचनायाः अशुद्धता, प्रयोगविपर्यासः, सन्दर्भबाह्यपदप्रयोगः च भाषाशास्त्रीयदोषेषु गण्यन्ते। उदाहरणतः "वदामः" इत्यस्मिन् स्थाने "वदामि" इत्युपयोगः सर्वथा अव्यवस्थितः।

➢ **छन्दोविचलनम् (Deviation from Metre)**

यदा काव्यग्रन्थेषु पाठसमीक्षणं क्रियते, तदा छन्दसां सम्यक् पालनं आवश्यकम्। यदि छन्दसि यथा अनुष्टुप्, शार्दूलविक्रीडितं प्रभृतिषु लघुगुरुक्रमे दोषः दृश्यते, तर्हि श्लोकस्य सौन्दर्यम् अपि नश्यति। छन्दोविचलनं कविसङ्कल्पस्य विरुद्धं भवति, तस्मात् छन्दः परीक्षणीयम्।

**व्याकरणदोषः, अर्थभ्रान्तिः च (Grammatical Errors and Misinterpretation of Meaning)**

संस्कृतव्याकरणम् अतिसूक्ष्मं तथा नियमबद्धम् अस्ति। यत्र विभक्तिप्रयोगदोषः, लिङ्गवचनविरुद्धता, कारकदोषः, समयसम्बद्धक्रियापदप्रयोगः च दृश्यते, तत्र व्याकरणदोषः वर्तते। अस्य प्रभावः तात्त्विकार्थे अपि भ्रान्तिं जनयति। उदाहरणरूपेण – "रामः रावणं हन्ति" इत्यस्य स्थाने यदि "रामं रावणः हन्ति" इति लिख्यते, तर्हि कर्तृकर्मणोः विनिमयेन सम्पूर्णार्थभ्रान्तिः जायते। यथोक्तं राजशेखरेण काव्यमीमांसायाम् – **"अपशब्दो हि महान् व्याधिः, स च सर्वत्र वर्जनीयः। अशुद्धः पाठः काव्यस्य शरीरं दूषयति।"**[9] **इति।** एतेन ज्ञायते यत् व्याकरणदोषाः केवलं वर्णानां दोषाः न, अपि तु ग्रन्थस्य स्वास्थ्यं नाशयन्ति। पाणिनीयशिक्षायामपि दृश्यते- **"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।"**[10] **इति।**

- **पाठसमीक्षणं केन क्रियते? (Who Performs Proofreading?)**

पाठसमीक्षणम् एकं गम्भीरं सूक्ष्मं च कार्यम् अस्ति, येन केवलं पाठदोषपरिमार्जनं न, अपि तु पाठस्य वैज्ञानिकमूल्याङ्कनम् अपि भवति। अतः एतादृशं कर्म कर्तुं विशेषगुणसम्पन्नस्य पाठसमीक्षकस्य आवश्यकता भवति।

[8] Vyakaraṇa-Mahābhāṣya (Paspaśāhnika)

[9] Kāvyamīmāṃsā

[10] Pāṇinīya Śikṣā

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

- **पाठसमीक्षकस्य गुणाः (Qualities of a Proofreader)** पाठसमीक्षकः यः पाठस्य त्रुटीं परीक्ष्य तां परिष्कर्तुं समर्थः, सः सूक्ष्मदर्शी, धैर्यवान्, निरीक्षणकुशलः च भूयात्। लघुतमदोषम् अपि लक्ष्यीकर्तुं सामर्थ्यम् अस्य आवश्यकम्। पठने, लेखने, भाषाबोधे च प्रावीण्यं तस्य मुख्यगुणः।
- **शास्त्रानुभवयुक्ता व्यक्तिः (A Person Well-Versed in Scriptures)** - विशेषतः संस्कृतग्रन्थेषु पाठसमीक्षणं कुर्वन् जनः व्याकरण-मीमांसा-न्याय-वेदादिषु च शास्त्रेषु अनुभवी स्यात्। यतः केवलं सामान्यशिक्षया पाठसमीक्षणं न सम्भवति। अतः शास्त्रदृष्ट्या पाठसंगतिः प्रसङ्गयुक्ततया अवलोकनीया।

**व्याकरण-शब्दकोश-कोशज्ञानयुक्तः (Knowledgeable in Grammar, Lexicon and Traditional Dictionaries)** समीक्षकः सुबोधपाणिनीयव्याकरणनिपुणः स्यात्। एवं च नानार्थशब्दज्ञानं, शब्दकोशानां (यथा अमरकोशः, वाचस्पत्यम्) ज्ञानं, तदर्थसङ्गतिक्षमता च तस्मिन् दृश्यते चेत्, सः उत्तमः समीक्षकः मन्यते। **अत एव वामनाचार्येण उक्तं – 'लोको विद्या प्रकीर्णं च काव्याङ्गानि'**[11] इति। अत्र विद्या-शब्देन व्याकरण-कोश-छन्दश्शास्त्राणि गृह्यन्ते, यैः विना पाठसमीक्षणं न सिद्ध्यति। पुनः प्रासङ्गिकी उक्तिः मालविकाग्निमित्रे- **"सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः।"[12] इति।**

उपसंहारतः पाठसमीक्षकः केवलं त्रुटिनिवारकः न, अपि तु स मूलपाठस्य विश्वसनीयतायाः संरक्षकः इत्यपि अवगन्तव्यम्।

- **आधुनिकप्रसङ्गे पाठसमीक्षणम् (Proofreading in the Modern Context)**

आधुनिके काले ग्रन्थानां मुद्रणस्य बहु उपयोगिता अस्ति। मुद्रणसामग्रीषु पाठदोषाः भवेयुः, येषां शोधनार्थं पाठसमीक्षणम् अनिवार्यम्। मुद्रणात्पूर्वं द्रुतं, सूक्ष्मं च परीक्षणं कृत्वा त्रुटीणां निवारणं कर्तव्यम्। अतः मुद्रणसामग्रीषु पाठशुद्धिः गुणवत्तायाः आधारः भवति।

- **डिजिटल पठनसाधनानि(Digital Reading Tools)**

वर्तमानकाले पाठपठनाय कम्प्यूटर, टेब्लेट्, मोबाइल् चेत्यादीनां यन्त्राणां प्रयोगाः वर्धिताः। डिजिटलपाठसाधनानि, यथा PDF, ePub, OCR इत्यादयः अधिकं लोकप्रियाः। एतेषु पाठदोषाणां विश्लेषणं कुर्वन्तः पाठसमीक्षकाः विशेषमाध्यमं योजयन्ति। तत्र त्रुटिनिवारणं सज्जीकृतसॉफ्टवेयरैः सह कृतं भवति, येन कार्यं शीघ्रं, सुसङ्गतं च भविष्यति।

- **प्रकाशनात्पूर्वं पाठसमीक्षणं (Pre-publication Proofreading)**

ग्रन्थस्य प्रकाशनात् पूर्वं पाठसमीक्षणम् अतीव आवश्यकं, येन ग्रन्थः प्रमाणिकः, शुद्धः च भवेत्। सम्पादकाः, लेखकाः च सहकार्यं कुर्वन्ति, तेन त्रुटयः संशोधिताः भवन्ति। प्रकाशनपूर्वं सम्यक् निरीक्षणेन पाठस्य शुद्धता, व्यवस्थितता च सुनिश्चिता भवति, यया ग्रन्थस्य प्रामाणिकता वर्धते।

---

[11] Kāvyālaṅkārasūtravṛtti

[12] Mālavikāgnimitram, Act 1, Verse 2

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

सारतः आधुनिकप्रसङ्गे पाठसमीक्षणं मुद्रणयुगात् प्रारब्धं, डिजिटलसाधनैः पूरितं, प्रकाशनानन्तरं च पाठस्य शुद्धतां, प्रमाणिकतां च संरक्षितुम् अनिवार्यम् अस्ति ।

**२. संस्कृतपाण्डुलिपिषु पाठसमीक्षणस्य ऐतिहासिकं परिप्रेक्ष्यम्**

**(Historical Context of Proofreading in Sanskrit Manuscripts)**

• **प्राचीनलिपिकानां पाठशुद्धिकरणकार्यम्**

**(Text Correction by Ancient Scribes)**

प्राचीनकालादारभ्य एव लिपिकाः हस्तलिखितपाण्डुलिपीनां निर्माणकार्ये संलग्नाः आसन्, ते पाठशुद्धतायाः विषये अतीव जागरूका आसन् । पाण्डुलिप्यां लेखनात् पूर्वं ते मूलपाठं यथावत् मनसि स्थापयन्तः, पुनः पाठमेकाग्रचित्तेन आवृण्वन्तः, प्रत्येकं पदं विचार्य लिखन्ति स्म । त्रुटयः यदि काचित् दृश्यते तर्हि तां स्वतः त्रुटिमुक्तं कृत्वा चिह्नं योजयन्ति स्म । एषा परम्परा पाठसमीक्षणस्य प्राचीनतमं रूपं मन्यते ।

• **भाण्डारगृहाणां पाण्डुलिपिषु संशोधनचिह्नानि**

**(Correction Marks in Manuscript Libraries)**

भारते बहूनि प्राचीनपाण्डुलिपिभाण्डारगृहाणि (Libraries) सन्ति, यत्र विविधधर्मीय-शास्त्रीय-वाङ्मयानां पाण्डुलिपयः संरक्षिताः सन्ति । प्राचीनपाण्डुलिपिषु 'भेदचिह्नं', 'पुनर्लेखनरेखा', 'मूलपाठप्रदर्शनम्' इत्यादीनि चिह्नानि संशोधनस्य प्रमाणानि दृश्यन्ते । एतानि चिह्नानि पाठान्तरसम्बद्धसूचनायाः साधनानि भवन्ति । एतेषां चिह्नानां साहाय्येन पाठप्रवृत्तयः, सम्पुटनसमीक्षा, पाठमालापि ज्ञातुं शक्यते । एतत्सर्वं दर्शयति यत् पाठसमीक्षणं केवलम् आधुनिककालस्य विषयः न, अपि तु प्राचीनलिपिकानामपि चेतनपूर्वकं कर्म आसीत् । कतिपयेषु पाण्डुलिपीपत्रेषु "इति न पाठः", "संदिग्धः पाठः", "शोध्यः" इत्यादिलेखा अपि दृश्यन्ते, ये पाठसमीक्षणस्य साक्ष्यरूपेण मान्यन्ते ।

• **भारतस्य क्षेत्रविशिष्टशुद्धिपरम्परा (Regional Traditions of Textual Correction in India)**

दक्षिणभारतप्रदेशे यथा काञ्ची-मदुरै-तिरुवनन्तपुरादिनगर-कश्मीर-नीलमठ-शारदापीठादिषु स्थानेषु शास्त्रीयग्रन्थानां पाठसमीक्षणम् अत्यन्तगम्भीरतया क्रियते स्म । काश्मीरीयविद्वांसः सूत्रपाठस्य साम्प्रदायिकानुसारं निरीक्षणं कुर्वन्ति स्म, येन पाठः त्रुटिरहितः स्यात् । दक्षिणे तु ग्रन्थमालासु पाठभेदान् चिह्नयित्वा टीकाचिह्नैः, पादटीकाभिः, लघुपाठविभागैः पाठसमीक्षणं दीर्घकालं क्रियते स्म । एषा परम्परा पाठशुद्धतायाः ऐतिहासिकं प्रमाणं यच्छति ।

एवं दृश्यते यत् प्राचीनभारते अपि पाठसमीक्षणम् एकः वैज्ञानिकः, प्रणालीबद्धः च उपक्रमः आसीत् । संस्कृतपाण्डुलिपीनां संरक्षणे, सम्पादने च एषः अत्यन्तावश्यकः भागः आसीत् । इयं परम्परा अधुनापि विद्याविश्वविद्यालयेषु, अनुसन्धानकेन्द्रेषु च अनुसर्यते ।

**३. संस्कृतभाषायाः सामान्यदोषाः (Common Errors in Sanskrit Texts)**

संस्कृतभाषायां लेखनकाले विविधाः सामान्यदोषाः दृश्यन्ते, ये पाठसमीक्षणे विशेषेण परीक्ष्याः । अत्र प्रमुखदोषाणां वर्णनं दीयते–

• **सन्धिदोषाः (Errors of Sandhi)-**

सन्धिनियमानाम् अज्ञानात् पदयोर्योगे यथोचितपरिवर्तनं यदा न क्रियते, तदा सन्धिदोषः भवति । उदाहरणम् – अनु + गच्छति इत्यत्र अनु गच्छति इति लेखनं सन्धिदोषयुक्तं, यथासम्भवम्

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

अनुगच्छति इति भवेत्। एषः दोषः पाठस्य प्रवाहं अर्थं च विकरोति।

- **समासदोषाः (Errors in Compounds)-** समासरचनायां यथासम्भवविग्रहविचारः यदा न क्रियते, तदा समासदोषः भवति। उदाहरणं – जनग्रामः इत्यत्र ग्रामजनः इति यथोचितं रूपं स्यात्। समासदोषात् वाक्यस्य तात्पर्यम् अपशाब्दितं भवति।
- **कारकविभक्तिदोषाः (Errors in Case Endings)-** विभक्तिप्रयोगे औचित्यं न भवति चेत् कारकविभक्तिदोषः भवति। उदाहरणं – *सः गृहे गच्छति* इत्यत्र *गृहे* इति सप्तमी विभक्तिः अयुक्ता, यतः गमनक्रियायाः लक्ष्यं द्वितीयाविभक्त्या प्रदर्श्यते – *गृहं गच्छति* इत्येव युक्तम्। एषः दोषः वाक्यस्य अर्थविरोधं करोति।
- **लिङ्गवचनपुरुषदोषाः (Errors in Gender, Number and Person)-** पदयोः पदानां समूहस्य वा लिङ्गं, वचनं, पुरुषः च यदा अन्वितं न भवति, तदा अयं दोषः दृश्यते। उदाहरणं बालिकाः पठति इत्यत्र *पठति* इति एकवचनं, बालिकाः इति बहुवचनं – अतः वचनदोषः अस्ति। एते दोषाः व्याकरणदृष्ट्या ग्राह्याः न सन्ति।
- **धातुरूपदोषः / कालदोषः (Verb Conjugation / Tense Errors)-** क्रियापदेषु लकारस्य, पुरुषस्य, वचनस्य च प्रयोगः यथानियमं न भवति चेत् अयं दोषः भवति। उदाहरणं – *गच्छति* इत्यस्मिन् यदि भूतकाले प्रयोगः आवश्यकः स्यात्, तर्हि *अगच्छत्* इति रूपं युक्तं स्यात्। एषः दोषः कालानुसारं पाठस्य सुसम्बद्धतां बाधते।
- **विरामचिह्नदोषाः (Errors of Punctuation)-** विरामचिह्नानि यथा – ।, : ; - इत्यादीनि यथास्थानं न प्रयुज्यन्ते चेत्, तदा पाठग्रहणं क्लिष्टं भवति। उदाहरणं – दीर्घवाक्ये यदि पूर्णविरामः (।) न प्रयुज्यते, तर्हि पाठकस्य तात्पर्यबोधनं दुष्करं भवति। विरामचिह्नानि पाठे स्पष्टतां समृद्धयन्ति।

एते सर्वे दोषाः न केवलं भाषायाः सौन्दर्यं नाशयन्ति, अपि तु ग्रन्थस्य प्रामाणिकताम् अपि बाधन्ते। अतः पाठसमीक्षणे एतेषां दोषाणां परिशीलनम् अत्यावश्यकम्। अत एव वाक्यपदीये भर्तृहरिणा प्रोक्तं – **"यथैव दर्शनैः शुद्धैः नित्यं पश्यति चक्षुषा। एवं व्याकरणैः शुद्धैः शब्दैः पश्यति तत्त्ववित्॥"**[13] इति। अनेन स्पष्टं भवति यत् व्याकरणदोषाणां परिहारः केवलं भाषाशुद्धये न, अपि तु तत्त्वबोधाय अनिवार्यः अस्ति।

### ४. पाठसमीक्षणे प्रयोगे चिह्नानि (Proofreading Symbols used in Sanskrit Editing)

संस्कृतग्रन्थेषु पाठसमीक्षणं कुर्वन्तः विद्वांसः संशोधनार्थं विशेषचिह्नानि प्रयुञ्जते। एतानि चिह्नानि सम्पादनकार्ये शीघ्रता-सूक्ष्मताविधानाय साहाय्यं कुर्वन्ति। अधोलिखितानि प्रमुखानि चिह्नानि सन्ति यैः सह उदाहरणानि दत्तानि सन्ति –

- **↑ (उपरि लेखनीयम्) -** कश्चन वर्णः पदं वा यदा लुप्तं भवति, तदा तस्य लेखनम् उपरिस्थले सूच्यते।

---

[13] Vākyapadīya(Brahmakāṇḍa)

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**उदाहरणं** - यदि पाठे "राम स्यात्" इत्यस्ति, किन्तु तत्र *':'* विसर्गः लुप्तः। तर्हि "राम"-शब्दस्य पश्चात् ↑ : इति सूच्यते।

**शुद्धपाठः: रामः स्यात्।**

- **‿ (किञ्चित् विलोपनीयम्)-** यदा कोऽपि वर्णः अनावश्यकः द्वित्वेन वा लिप्तः स्यात्, तदा विलोपनार्थम् एतच्चिह्नं प्रयुज्यते।

**उदाहरणं** - यदि पाठे "गच्छ्छति" इत्यस्ति, तर्हि *छकारस्य* द्वित्वं अयुक्तम्। तर्हि "छ्" वर्णस्य उपरि ‿ इति चिह्नं दत्त्वा विलोपनं क्रियते।

**शुद्धपाठः- गच्छति।**

- **¶ (नवपरिच्छेदः आरभ्यते)** - नवीनविषयस्य अनुच्छेदस्य वा आरम्भे एतत् चिह्नं लिख्यते।

**उदाहरणं** - पूर्वे वाक्ये विषयः *रामचरितम्*, पश्चात् *हनुमद्भक्तिः* इत्यत्र विषयान्तरम्। तर्हि ¶ इत्यनेन चिन्हितं भवति। **लिप्यते** - ¶ हनुमान् रामस्य परमभक्तः।

- **= (द्वयं संयोजनीयम्)-** पृथग्लिखितयोः द्वयोः शब्दयोः यदा संयोजनं करणीयं, तदा एतत् चिह्नं प्रयुज्यते।

**उदाहरणं** - पाठे अस्ति – *राम अयनम्*। वस्तुतः *रामायणम्* इत्येकं समस्तपदं भवेत्।

**सूचना-** राम = अयनम् → रामायणम्।

- **/ / (लिखितं विलोपनीयम्)** - दोषयुक्तस्य पाठांशस्य विलोपनार्थं द्वौ *slash* चिह्नौ प्रयुज्येते।

**उदाहरणं** - पाठे अस्ति – *सः एकः राजा आसीत्*। 'एकः' अनावश्यकं चेत् –

**सूचना** - /एकः/

**शुद्धपाठः - सः राजा आसीत्।**

- **stet (पूर्वं यथावत् स्थापनीयम्)-** यदा पूर्वं विलोपितं पाठं पुनः स्थापयितुम् इच्छेत्, तदा stet इति लिख्यते।

**उदाहरणं** - यदा कोऽपि पाठसमीक्षकः "ज्ञानं" इत्यस्य स्थाने "बुद्धिः" इति लिखति, किन्तु उत्तरकाले निर्णयं करोति यत् "ज्ञानं" एव यथोचितं, तर्हि stet इति लिख्यते।

**सूचना-** stet = पूर्वं 'ज्ञानं' यथावत् स्थापनीयम्।

- **अन्यानि त्रुटिलक्षणानि च संस्कृतानुबद्धं स्पष्टीकरणीयानि**

यथादृष्टं त्रुटिलक्षणानि अपि प्रयुज्यन्ते –

- **[sp]** → spelling दोषः
- **[gr]** → grammatical error
- **[wt]** → wrong term
- **[punct]** → punctuation दोषः

एतानि चिह्नानि विशेषतः आधुनिकपाठसमीक्षण-सन्दर्भे प्रचलितानि।

**५.संस्कृतपाठसमीक्षणे प्रयुक्तचिह्नानाम् उदाहरणानि (Examples with Proofreading Symbols in Sanskrit Proofreading)**

- **उदाहरणम् १ – सन्धिदोषः (Sandhi Error)**
  - **त्रुटियुक्तं वाक्यम्-** गुरुः एव ज्ञानी अस्ति।
  - **दोषविवरणम्:-**अत्र "गुरुः एव" इत्यत्र सन्धिः न कृतः। "गुरुः" + "एव" इत्यस्मात् नियमतः **"गुरुरेव"** इति रूपं भवेत्। ": + ए" इत्यस्मात् रेव इत्याकारः भवति। अयं **विसर्गसन्धिदोषः** इत्याख्यायते।
  - **संशोधनचिह्नैः सह - गुरुः /एव ↑ = रेव → गुरुरेव ज्ञानी अस्ति।**
  - **चिह्नानां प्रयोगः:**

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

- **"/"** – 'एव' इति पदं विलोपनीयम् (सन्ध्यर्थम्)।
- **"↑ ="** – 'रेव' इति संयुक्तरूपेण लेखनीयम्।

➢ **शुद्धः पाठः** – गुरुरेव ज्ञानी अस्ति।

- **उदाहरणम् २ – विभक्तिदोषः (Vibhakti Error)**
  - ➢ **त्रुटियुक्तं वाक्यम्-** गुरु शिष्यं पाठयति।
  - ➢ **दोषः:** "गुरु" इति प्रथमाविभक्तेः रूपं "गुरुः" भवेत्।
  - ➢ **संशोधनचिह्नैः सह पाठः - गुरु ↑ः** शिष्यं पाठयति।
  - ➢ **व्याख्या:-** "↑" – अत्र ':' लेखनीयः।
  - ➢ **शुद्धः पाठः – गुरुः शिष्यं पाठयति।**
- **उदाहरणम् ३ – लिङ्गदोषः (Gender Error)**
  - ➢ **अशुद्धं वाक्यं - सीता सुन्दरः।**
  - ➢ **दोषः:** "सुन्दरः" इति पुंल्लिङ्गे अस्ति, "सीता" तु स्त्रीलिङ्गे, अतः "सुन्दरी" भवेत्।
  - ➢ **संशोधनचिह्नैः सह पाठः-** सीता सुन्दर /ः =ी।
  - ➢ **व्याख्या:**
    - "/" – ':' विलोपनीयः।
    - "=" – 'ी' स्थापनीयः।
  - ➢ **शुद्धः पाठः** – सीता सुन्दरी।
- **उदाहरणम् ४ – विरामचिह्नदोषः (Punctuation Error)**
  - ➢ **त्रुटियुक्तं वाक्यम्** - कृष्णो गच्छति अर्जुनः तिष्ठति।
  - ➢ **दोषः:** विरामचिह्नस्य अभावात् द्वयोरपि वाक्ययोः भेदो न ज्ञायते।
  - ➢ **संशोधनचिह्नैः सह पाठः -** कृष्णो गच्छति । ↑ अर्जुनः तिष्ठति।
  - ➢ **व्याख्या-** "↑" - नूतनवाक्यस्य आरम्भः।
  - ➢ **शुद्धः पाठः** – कृष्णो गच्छति। अर्जुनः तिष्ठति।
- **उदाहरणम् ५ – छन्दोविचलनम् (Meter Violation)**

➢ **त्रुटियुक्तः श्लोकः-** जननी च जन्मभूमिः स्वर्गादपि गरीयसी।

➢ **दोषः-** अत्र "च" इत्यस्य प्रयोगेण श्लोकस्य छन्दः (अनुष्टुप् छन्दः) विकृतः जातः। अस्य शुद्धरूपं "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।" एव।

➢ **संशोधितचिह्नैः सह पाठः-** जननी / च जन्मभूमिः ↑ = च स्वर्गादपि गरीयसी।

➢ **स्पष्टीकरणम्:**

- "/" – अत्र 'च' विलोपनीयः।
- "↑ = च" – "जन्मभूमिः" इत्यन्ते 'च' संयोजनीयः।

➢ **शुद्धः पाठः – जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।**

**६. पाठसमीक्षकस्य भूमिका (Role of a Proof-reader)**

**●योग्यपाठसमीक्षकस्य गुणाः**

**(Qualities of a Competent Proofreader)**

पाठसमीक्षकः तादृशः विद्वान् भवेत्, यः संस्कृतभाषायां गम्भीरं ज्ञानं धारयति। सः व्याकरणं, छन्दश्शास्त्रं, निरुक्तं, तर्कशास्त्रं च जानाति। सूक्ष्मबुद्धिः, धैर्यं, मनोयोगः च अस्य विशेषगुणाः

सन्ति। शुद्धलेखनाय तस्य एकाग्रता अनिवार्या। पाठसमीक्षकस्य मूलकार्यम् अस्ति–दोषान् अवलोक्य तान् परिष्कृत्य पाठस्य शुद्धरूपेण स्थापनम्।

**उदाहरणम्** - यदि कश्चन श्लोकः "विद्या ददाति विनयं" इत्यस्ति, किन्तु मूलपाठे "विनयं ददाति विद्या" इत्यस्ति, तर्हि सः तत्त्वतः निरीक्ष्य शुद्धरूपस्य स्थापनं करोति।

- **शब्दकोश-व्याकरणग्रन्थ-कोशसहितं समीक्षणकार्यम्**

**(Proofreading with the Aid of Dictionaries and Grammar Texts)**

पाठसमीक्षणे प्रमाणग्रन्थानां साहाय्यं परमावश्यकम्। विशेषतः अमरकोशः, वैयाकरणसिद्धान्तकौमुदी, पाणिनीयव्याकरणं चेत्यदीनि अस्य प्रमुखं साधनानि। सन्देहे वर्तमाने स कोशप्रमाणेन शुद्धं पाठं निर्धारयितुं समर्थः भवति।

**उदाहरणम्** - यदि 'सङ्गणकः' इत्येकं नवीनं पदं दृष्टं, तर्हि तस्य कोशे प्रामाणिकतां निरीक्ष्य लेखनं करणीयम्।

- **दत्तपाठस्य तुलनात्मकपठनम् (Comparative Reading of Given Texts)**

पाठसमीक्षकेण भिन्नभिन्नस्रोतःपाठानां तुलनां कृत्वा यः शुद्धः, प्रमाणिकः पाठः सः स्थापयितव्यः। प्राचीनपाण्डुलिपयः, छायानुवादः, सम्पादितमुद्रणं च अस्य तुलनायां प्रयोज्यम्। केवलमेकस्य पाठस्याधारेण निर्णयो न युक्तः।

**उदाहरणम्** - 'रामः वनं गच्छति' इत्यत्र किञ्चन पाठे 'रामो वनं गच्छति', अपरेऽस्मिन् 'रामः व्रजति' इत्यस्ति। अत्र छन्दः, व्याकरणं, सन्दर्भञ्च निरीक्ष्य उचितः पाठः निश्चेतव्यः।

## ७. डिजिटलसंस्करणे पाठसमीक्षणम् (Proofreading in the Digital Environment)

- **तन्त्रांशाधारितपाठसमीक्षणोपकरणानि (Software-based Tools for Proofreading)–**

आधुनिककाले पाठसमीक्षणकार्यं केवलं मानवदृष्ट्या न यथावत् सम्पद्यते, किन्तु अनेके तन्त्रांशाः (Software) अपि तत्र साहाय्यं कुर्वन्ति। संस्कृतपाठाय विशेषतः विविधानि तन्त्रांशसाधनानि **(Software tolls )** प्रयुज्यन्ते, यथा – **Baraha, Sanskrit OCR Tools, Spell-checkers, Transliteration Software** इत्यादयः। एते तन्त्रांशाः (Software) शब्ददोषान्, विरामचिह्नदोषान्, पुनरुक्तिं च चिन्वन्ति। तथापि एषां साहाय्यं मानवसमीक्षणस्य पूरकं, न तु विकल्पः।

**उदाहरणतः** - कश्चित् सम्पादकः LibreOffice इति MS Word इति वा मध्ये संस्कृतलेखं लिखन् अस्ति। तत्र 'कृष्णः' इति स्थाने 'कृषनः' इति टङ्कितम्। Spell-check इति प्रणालीद्वारा सः दोषः प्रदर्श्यते।

- **देवनागरीबिम्बपाठेषु OCR दोषसंशोधनम् (Correction of OCR Errors in Devanagari Scanned Texts)**

देवनागरीलिपिलेखस्य विम्बपाठेषु (scanned copy) OCR (Optical Character Recognition) नामकं तन्त्रज्ञानं प्रयुज्यते यत् हस्तलिखितं मुद्रितं लेखं वा यन्त्रपाठ्यं करोति। किन्तु अस्य प्रविधेः क्वचित् क्वचित् अनेके दोषाः सम्भवन्ति, यथा –अक्षरविकृतिः, सन्धिबाधः, विरामचिह्नविपर्यासः इत्यादयः। अतः OCR पाठस्य पाठसमीक्षणम् अतीवावश्यकम्।

**उदाहरणतः** – OCR द्वारा विम्बितपाठे 'गुरुः' इत्यस्य स्थाने 'गुयुः' इति प्रकटितम्। अयं दोषः केवलं मानवेन परीक्षितुं शक्यते।

- **Google Input Tools, Sanskrit Heritage Reader इत्यादीनां उपयोगः –**

Google Input Tools इत्येतद् एकम् उत्कृष्टं तन्त्रांशसाधनम् (software tool) अस्ति यत् देवनागरीलेखनं सुलभं करोति। एतेन टङ्कनम्, अक्षरविन्यासः च निर्दोषतया साध्यते। Sanskrit Heritage Reader इति तु पङ्क्तिपाठं विश्लेषयति, पदच्छेदं, रूपविचारं, धातुरूपं च प्रदर्शयति। एतानि उपकरणानि पाठसमीक्षणायात्यन्तोपकारीणि सन्ति।

**उदाहरणतः** - यदि वाक्यम् अस्ति – "रामो वनं गच्छति", Heritage Reader तत्र 'रामः' – प्रथमा एकवचनं, 'गच्छति' – लट्-लकारः, प्रथमपुरुषः, एकवचनम् इत्यादीनि स्पष्टयति।

**८. समापनवाक्यम् (Colophon in Proofreading)**

- **संशोधनकृतनाम, दिनाङ्कः, संस्करण-संख्या इत्यादीनां उल्लेखः**

पाठसमीक्षणस्य समाप्त्यनन्तरं ग्रन्थस्य अन्ते समापनवाक्यं लिख्यते। अस्मिन् समापनवाक्ये समीक्षकस्य नाम, तेन कार्यं सम्पन्नस्य दिनाङ्कः, तथा संस्करणसंख्या अपि निर्दिष्टा भवति। एषा परम्परा ग्रन्थस्य प्रमाणिकताम्, उत्तरदायित्वं च स्थिरीकरोति।

**उदाहरणम्** – "अयं ग्रन्थः प्राचीनपाण्डुलिपेः आधारेण संशोधितः। समीक्षकः – डॉ. रामशर्मा। दिनाङ्कः – १५ अगस्त २०२५। संस्करणम् – द्वितीयम्।"

एवं लेखनेन पाठकः जानाति यः ग्रन्थः पठ्यते, सः कदा, केन, केन प्रमाणेन च प्रकाशितः।

- **प्राचीनग्रन्थेषु समापनसूचनायाः परम्परा**

भारतीयपाण्डुलिपिषु प्राचीनकाले समापन-वाक्यस्य विशेषमहत्त्वं दृश्यते। ग्रन्थस्य अन्ते *"इति"* इत्यनेन पदेन पाठसमाप्तिः सूच्यते। केषुचित् ग्रन्थेषु लिपिकारः स्वनाम, ग्रामं, दिनाङ्कं च लिखति स्म।

**उदाहरणानि** –

- "इति श्रीमहाभारते शान्तिपर्वणि त्रयोदशोऽध्यायः।"
- "इति वामनपुराणे प्रथमोऽध्यायः।"
- "इति काश्मीरदेशीयलिपिकारश्रीहरिदत्तेन लिखितं, संवत् १२५०।"

एवं परम्परया ज्ञायते यत् ग्रन्थः केवलं लेखककृतिः न, अपि तु सम्पूर्णसंस्करणे शुद्धताप्रतिपादकं प्रामाणिकदस्तावेजं भवति।

अतः आधुनिकपाठसमीक्षणे अपि समापनवाक्यस्य प्रयोगः अनिवार्यः। एषः न केवलं प्राचीनपरम्परायाः अनुसरणम्, अपि तु ग्रन्थस्य शुद्धतां, स्थिरताम्, उत्तरदायित्वं च सुनिश्चितयति।

**९. उपसंहारः (Conclusion)**

- **संस्कृतभाषायां पाठसमीक्षणस्य महत्त्वम्**

संस्कृतभाषा भारतीयसंस्कृतेः मूलाधारः अस्ति। अस्यां भाषायां सहस्रशः ग्रन्थाः लिखिताः, येषु दार्शनिकं, धार्मिकं, साहित्यिकं, वैज्ञानिकं च ज्ञानं संगृहीतम्। यदि तेषां ग्रन्थानां पाठः दोषयुक्तः स्यात्, तर्हि अस्याः ज्ञानपरम्परायाः शुद्धता नश्येत। अतः संस्कृतभाषायां पाठसमीक्षणम् अतीवावश्यकम्।

**उदाहरणम्** – यदि *"धर्मेण हीनाः पशुभिः समानाः"* इत्यस्मिन् श्लोके *"धर्मेण"* इत्यस्य स्थाने *"धनेन"* इति लिख्यते, तदा सम्पूर्णः अर्थः विपरीतः भवति। अतो हि पाठसमीक्षणेन तादृशदोषः निवार्यते।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

- **शुद्धपाठेन ग्रन्थस्य प्रमाणिकता**

ग्रन्थः यावत् शुद्धः भवति, तावत् सः प्रमाणिकः इति स्वीकृतः। शुद्धपाठः एव लेखकस्य मौलिकविचारान् यथावत् दर्शयति। यदि पाठे संशयः, अशुद्धिः, त्रुटिः वा दृश्यते, तर्हि पाठकः, शोधकः वा ग्रन्थस्य प्रामाणिकतायां संशयापन्नो भवति।

**उदाहरणम्** – *भगवद्गीता* यदि सन्धिदोषैः, लिङ्गदोषैः, विरामचिह्नदोषैः च युक्ता स्यात्, तर्हि तस्याः आध्यात्मिकप्रामाणिकता नष्टा इव भवेत्। यदा तु शुद्धपाठः उपलब्धः, तदा तस्य ग्रन्थस्य आदरः विश्वासश्च स्थिरः भवति।

- **अनुसन्धानकृत्ये पाठसमीक्षणस्य अनिवार्यता**

अनुसन्धानकर्मणि यथार्थपाठः अनिवार्यः। यदि संशोधकः दोषपूर्णं पाठम् आधारीकृत्य कार्यं करोति, तर्हि तस्य निष्कर्षः अपि दूषितः भवेत्। अतः संशोधकानां कृते पाठसमीक्षणं प्रथमं चरणं भवेत्।

**उदाहरणम्** – इतिहासशोधकः यदि प्राचीनपाण्डुलिपेः अपूर्णं दूषितं वा रूपं स्वीकृत्य इतिहासं लिखति, तर्हि तस्य निष्कर्षाः असत्यं भवति। परन्तु यदा पाठसमीक्षणेन प्रामाणिकपाठः प्राप्तः, तदा संशोधनकार्यं वैज्ञानिकं विश्वसनीयं च भवति।

अतः निष्कर्षतः वदामः यत् संस्कृतभाषायां पाठसमीक्षणं केवलं शुद्धतारक्षणस्य साधनं न, किन्तु ज्ञानपरम्परायाः स्थिरत्वं, ग्रन्थस्य प्रामाणिकतां, अनुसन्धानस्य सत्यतां च निश्चिनोति।

## सहायकग्रन्थसूची


- Daṇḍin. *Kāvyādarśaḥ*. Edited by Rangacharya Raddi Shastri, Chaukhamba Sanskrit Series Office, 1938, 1.32.
- Twain, Mark. *Letter to George Bainton*, 15 Oct. 1888. *Mark Twain's Letters*, edited by Albert Bigelow Paine, Harper & Brothers, 1917.
- Bhṛtṛhari. *Vākyapadīya Brahmakāṇḍa*. Edited by Dravyeśa Jhā & Vedānanda Jhā, Chaukhamba Sanskrit Pratishṭhāna, 2002.
- Housman, A. E. *The Application of Thought to Textual Criticism*. London: Cambridge University Press, 1921.
- जोग, क.प. संस्कृतपाठसमीक्षापद्धतिः. प्रथमावृत्तिः, मुम्बई, संस्कृतविद्यापीठम्, १९९४, पृष्ठम् २३.
- द्विवेदी, कपिलदेवः। *संस्कृतसाहित्यस्य इतिहासः*। पञ्चदशसंस्करणम्, विश्वविद्यालयप्रकाशनम्, २०१२, पृ. ४५।
- पतञ्जलिः। *व्याकरणमहाभाष्यम् (पस्पशाह्निकम्)*। सम्पादकौ–एस्. डी. जोशी, जे. ए. एफ्. रूडबर्गेन्, प्रथमखण्डः, साहित्यअकादेमी, १९८६, पृ. ४२।
- राजशेखरः। *काव्यमीमांसा*। सम्पादकौ–सी. डी. दलालः, आर्. ए. शास्त्री, तृतीयसंस्करणम्, ओरियण्टल् इन्स्टिट्यूट्, बरोदा, १९३४, पृ. २१।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025


- *पाणिनीयशिक्षा*। सम्पादनं अनुवादश्च–मनमोहनघोषः, कलिकाताविश्वविद्यालयः, १९३८, पृ. २५।
- कालिदासः। *मालविकाग्निमित्रम्*। सम्पादकः–एम्. आर्. काले, षष्ठसंस्करणम्, मोतीलालबनारसीदासः, २०१०, पृ. ८।
- भर्तृहरिः। *वाक्यपदीयम् (ब्रह्मकाण्डः)*। सम्पादनं अनुवादश्च–के. ए. सुब्रह्मण्य अय्यरः, डेक्कनकॉलेजः, १९७१, पृ. ११।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# पौराणिकसमये स्त्रीधनविमर्शः

**डॉ. अविनाश गायेनः**
**सहायकाध्यापकः, संस्कृतविभागः, घाटाल-रवीन्द्र-शतवार्षिकी-महाविद्यालयः**
**पश्चिमबङ्गः**

**प्रबन्धसारः**

*पुराणेषु सामाजिकजीवनस्य सम्यक् चित्रणं दृश्यते, यत्र नारीणां स्थानम्, अधिकारः च विशेषतया वर्णितम्। पुराणकालीनसमये नारीणाम् आर्थिकस्वातन्त्र्यम्, उत्तराधिकारः, दानाधिकारश्चेत्यादयः महत्त्वपूर्णाः विषयाः आसन्। अत्र कश्चन महत्त्वपूर्णं तथ्यमस्ति यत् ताः केवलं गृहिण्यः न आसन्, अपि तु दानकर्त्र्यः, गृहकर्त्र्यः, व्यवसायिन्यः अपि आसन्।*

*ब्रह्मवैवर्तपुराणे, गरुडपुराणे, अग्निपुराणे च नारीणाम् अर्थसम्बन्धिनी भूमिका विस्तृतरूपेण वर्णिता अस्ति। पतिसम्पत्तौ भार्यायाः अधिकारः, कन्यायाः दायभागः, स्त्रीधनस्य सुरक्षणम्, एते विषयाः पुराणेषु स्पष्टतया निरूपिताः। विशेषतया "स्त्रीधनम्" इत्यस्य संरक्षणं धर्मशास्त्रेषु पुराणेषु च निर्दिष्टम्।*

*स्त्रीणां सामाजिकम् आर्थिकं च सशक्तिकरणं, तासां परिग्रहे स्थितं धनं, विवाहकाले प्राप्तं द्रव्यं, तस्य संरक्षणं च – एतेषां माध्यमेन ताः आर्थिकरूपेण आत्मनिर्भराः अपि आसन्। धर्मपत्नी पतिसहधर्मिणी मता, यथासम्भवं तस्या आर्थिकाधिकारः अपि तेन सह सङ्गतः। न केवलं गृहिजीवने, अपि तु कतिपये स्त्रियः पुराणेषु शिक्षिका, व्यापारिणी, विदुषी चेत्यादिरूपेण अपि उन्नीताः दृश्यन्ते। उदाहरणरूपेण सावित्री, गार्गी, मैत्रेयी इत्याद्याः स्त्रियः केवलं धार्मिकजीवने न, अपि तु तात्त्विकविमर्शेषु अपि प्रमुखं स्थानं प्राप्तवत्यः।*

*एवं दृश्यते यत्, पुराणकालीनसमये नारीणाम् आर्थिकभूमिका केवलं पारिवारसम्बद्धा न, अपि तु व्यापिका सामाजिकी च आसीत्। आर्थिकस्वातन्त्र्यं, दायभागाधिकारः, स्त्रीधनरक्षणं च – एतेषु विषयेषु पुराणेषु यथोचितं निर्देशः अस्ति। नवीनशोधदृष्ट्या अपि, एतेषां तथ्यानां परीक्षणेन ज्ञातुं शक्यते यत् नारीणाम् आर्थिकभूमिका भारतीयसंस्कृतेः मूले सुप्रतिष्ठिता आसीत्। एते दृष्टान्ताः आधुनिकस्त्रीसशक्तिकरणप्रयासानां प्रेरणास्रोतांसि अपि सन्ति।*

*अतः अस्य शोधस्य माध्यमेन नारीणाम् आर्थिकस्थितेः प्राचीनदृष्टिकोणतः सम्यक् विश्लेषणं क्रियते, यत् अस्मिन् वर्तमानकाले अपि प्रासङ्गिकम्।*

**कुञ्जीशब्दाः – पुराणसाहित्यं, स्त्रीधनं, दायभागः, आर्थिकस्वातन्त्र्यं, स्त्रीसशक्तिकरणं, सामाजिकभूमिका चेत्यादयः।**

**********************************************************************

**प्रस्तावना -**

पुराणं पुरातनमाख्यानमुच्यते। संस्कृते पुराणशब्दश्चिरन्तनपर्यायः। पुराणेषु भूता वर्त्तमाना भाविनश्चार्था वर्ण्यन्ते। इतिहासे तु भूता एवार्था वर्ण्यन्त इति पुराणेतिहासयोरन्तरम्। प्राचीनास्तु पुराणमपि इतिहासशब्देनाभिदधते। पुराणेषु पुराणलक्षणमित्थमुक्तं –

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥**[1]

वेदोपनिषत्सु विद्यमानानां गहनतत्त्वानां कथामाध्यमेन बोधनम् इत्येतत् पुराणानां प्रमुखं

[1]देवीभागवतम् – पूर्वार्द्धम् २।९८

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

प्रयोजनम्। एतद् अतिरिच्य भारतस्य प्राचीनयुगस्य इतिहासस्य पुनर्निर्माणे अपि एतत् साहित्यं महता प्रमाणेन उपकरोति इत्येतत् अवश्यं स्मर्तव्यम्। अष्टादशसु महापुराणेषु एकैकस्मिन् अपि भारतस्य विविधस्थलानां परिचयः, विविधकालस्य च निरूपणं दृश्यते। इतिहासे प्रसिद्धानां राजवंशानां विवरणं, राज्ञां विजयपराभवानां विवरणञ्च उपलभ्यते। तस्मिन् काले प्रसिद्धानां बहु जनानां प्रस्तावः दृश्यते। शुङ्ग-नन्द-मौर्य-इक्ष्वाकु-पुरूरववंशीयानां चरित्रं दृश्यते। भविष्यत्पुराणे चन्द्रगुप्त-विक्रमादित्य-पाणिनि-पतञ्जलि-कबीरदास-कृष्णचैतन्यादीनां विवरणं लभ्यते। ब्रह्माण्डपुराणे शातवाहन-आन्ध्रवंशस्य राज्ञां विवरणेन सह तस्य कालस्य राजनैतिकपरिस्थितेः उल्लेखः अपि दृश्यते। तेन सह धार्मिकपरिस्थितिः अपि निर्दिष्टा अस्ति। शैव-वैष्णवसम्प्रदाययोः विभिन्नता, देवालयानां माहात्म्यं, व्रतानां विवरणं, पुण्यक्षेत्राणां महिमा च वर्णितं दृश्यते। स्कन्दपुराणे सहस्राधिकानां पुण्यक्षेत्राणां भौगोलिक-ऐतिहासिकविवरणम् उपलभ्यते। चातुर्वर्ण्यव्यवस्था, देशाचार-कुलाचाराः, नित्यनैमित्तिककर्माणि, संस्काराः, पर्वाचरणं, स्वामि-भृत्यसम्बन्धः, राज-प्रजासम्बन्धः, पिता-पुत्रसम्बन्धः - इत्यादयः विषयाः अत्र निरूपिताः सन्ति। अग्निपुराणे वास्तुशिल्प-वर्णचित्र-नाट्यकलायाः प्रस्तावः अस्ति। अश्वचिकित्सा-हस्तिचिकित्सा-सर्पदष्टमन्त्रचिकित्सा-बालग्रहचिकित्सा च विवृता अस्ति। नारदपुराणे ज्योतिषस्य निरूपणमस्ति। आयुर्वेदस्य इतिहासनिर्माणे ब्रह्माण्डपुराणं सहकरोति। एवं पुराणानां विषयविस्तारः अस्ति सुमहान्।

पौराणिकसमये नारीणाम् आर्थिकदशा समुन्नताऽऽसीत्; परन्तु आधिक्येन राजवर्गीया उच्चतरवर्गीयाश्च स्त्रियः पित्रा पत्या वा अर्जितस्य धनस्य अधिकारिण्य आसन्। स्वार्जितसम्पत्तिर्निम्नवर्गीयाणां सेवाकार्यसम्पादिकानां वेश्यादिवृत्त्या जीवन-निर्वाहिकाणां स्त्रीणां समीपेऽप्यासीत्। स्त्रीणाम् आर्थिकदशायाश्चित्रणं मुख्यरूपेण परिच्छेदेऽस्मिन् दृष्टिद्वयेनावलोकनीयं -

(१) स्त्रीधनम् - अर्थाद् नारीणां पृथग्धनसम्पत्तिरिति,

(२) दायभागः।

अनयोरुभयोरुपरि विचारो विधास्यते।

**स्त्रीधनम्**

कौटिल्यस्य परिभाषेयं वर्तते यद् वृत्तिराबध्यं वा स्त्रीधनम्। परद्विसहस्रस्थाप्या वृत्तिः। आबध्यं नियमः।[2] अर्थाद् वृत्तिः (जीवनवृत्तिः) एवम् आबध्यं (यच्छरीरधारणं कृतं यस्या यथाऽऽभूषणम्) स्त्रीधनम्। स्त्रीधनस्य शाब्दिकोऽर्थः स्त्रीसम्पत्तिः। शुल्क-अन्वाधेय-अधिवेदनिक-बन्धुदत्ताः सर्वेऽप्येते स्त्रीधनमिति प्रोच्यन्ते। जीमूतवाहनेन प्रोक्तं "तदेव धनं स्त्रीधनमस्ति यद्धनस्य दानरूपेण प्रदानं कर्तुं विक्रयं कर्तुं तथा पतिनियन्त्रणं विना स्वतन्त्ररूपेण उपभोक्तुं स्त्रीणां पूर्णाधिकारो वर्तते" इति।

विवाहसमये कन्यानां कृते मात्रा पित्रा पत्या भ्रात्रा अन्यसम्बन्धिना च दत्तं धनं वस्तुजातं च तत्सर्वं स्त्रीधनमिति मन्तव्यम्। गौतम-नारद-आपस्तम्ब-विष्णु-व्यास-देवलादयः सर्वेऽपि स्मृतिकाराः स्त्रीधनोपरि स्त्रीसत्त्वस्य समुल्लेखं प्रकुर्वन्ति। एषु एकानुसारम् अन्न-वस्त्र-सम्पत्त्यादयः, याश्च स्वसम्बन्धिभिः प्राप्तास्ताः सर्वास्तस्या व्यक्तिगताः सम्पत्तयः सन्ति। सा तस्याः स्वयम् अधिकारिणी भवति। तद्धनोपरि तत्पतेर्नास्ति कश्चनाधिकार इति। मनुरपि नारीणां पृथक् सम्पत्तेरुल्लेखं करोति -

[2] कौटिल्य-अर्थशास्त्रम् - 3.2 ।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि ।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥[3]

विवाहकाले अग्निसन्निधौ यत्पित्रादिदत्तं तदध्यग्निस्त्रीधनम् । तदाह कात्यायनः -

विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसन्निधौ ।
तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितम् ॥[4]

यत्तु पितृगृहाद्भर्तुर्गृहं नीयमानया लब्धं तदध्यावाहनिकम् । तथा च कात्यायनः -

यत्पुनर्लभते नारी नीयमाना तु पैतृकात् ।
अध्यावाहनिकं नाम तत्स्त्रीधनमुदाहृतम् ॥
अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत् ।
पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत् ॥[5]

अन्वाधेयं व्याख्यातं कात्यायनेन -

विवाहात्परतो यत्तु लब्धं भर्तृकुले स्त्रिया ।
अन्वाधेयं तदुक्तं तु सर्वबन्धुकुले तथा ॥[6]

विवाहसमयेऽग्निसमक्षं यत् प्रदीयते तद्धनं बुद्धिमन्तो जना अध्यग्नि-स्त्रीधनमिति कथयन्ति। पतिगृहे गमनसमये यत्किञ्चित् पितृगृहात् स्त्री प्राप्नोति तद् अध्यावाहनिकं स्त्रीधनं कथ्यते। श्वश्रूश्वशुरद्वारा स्नेहवशाद् यत्किञ्चिद् दत्तं तथा वन्दनकरणसमये श्रेष्ठजनद्वारा यत्किञ्चित् प्राप्तं तत् प्रीतिदत्तं स्त्रीधनं प्रोच्यते। तच्छुल्कं स्त्रीधनं निगद्यते यत् पात्राणां भारवाहिपशूनां दुग्धदपशूनां दासानाम् आभूषणानां मूल्यरूपेण प्राप्तं भवति। विवाहोपरान्ते पतिकुल-पितृकुल-बन्धुजनैर्यत् किञ्चित्प्राप्तं तद् अन्वाधेय इति कथ्यते। स्त्रीधनसम्बन्धविषये विस्तृतविवरणं मनुस्मृतौ, याज्ञवल्कस्मृतौ च प्राप्यते।

पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम् ।
आधिवेदनिकं चैव स्त्रीधनं परिकीर्तितम् ॥[7]

कन्यादानसमये कन्यायाः पिता पुत्रीकृते अनेकानि आभूषणानि वस्त्राणि च ददाति। तत्सर्वं स्त्रीधनमेव भवतीति ध्येयम्। वायुपुराणे कन्यादानमन्त्रेषूल्लेखोऽयं वर्तते-

कन्यां कनकसम्पन्नां कनकाभरणैर्युताम् ।
दास्यामि विष्णवे तुभ्यं सर्वलोकचिकीर्षया ॥[8]

एतत्प्रकारकमेव वर्णनं लिङ्गपुराणेऽपि मिलति -

दासदासीधनाढ्यं च भूषणानि विशेषतः ।
क्षेत्राणि च धनं धान्यं वासांसि च प्रदापयेत् ॥[9]

अनेन भवति स्पष्टमेतद् यत् कन्यादानसमये कन्यायै स्त्रीधनरूपेण बहुधनं पितृभ्रातृव्यादिद्वारा योग्यतानुसारं प्राप्तमासीत्। पुराणाधारोपरि विवाहं कृत्वा प्रस्थानसमये दत्तस्त्रीधनस्योल्लेखो विधास्यते। अञ्जनाया विवाहसमये दत्तस्त्रीधनस्य सम्यगुल्लेखो द्रष्टव्यः -

ततः कालान्तरे विप्र ! केसर्याख्यो महाकपिः ।
यया चेमां ददस्वेति पितरं मे ततः पिता ॥
तस्मै मां दत्तवांश्चैव पारिबर्ह ददौ च सः ।
गवां लक्षसहस्राणि गजलक्षं महामनाः ॥
वाजिनामर्बुदं चैव रथानामर्बुदं तथा ।
वस्त्ररत्नान्यनेकानि दासदासीसहस्रकम् ॥
अन्तःपुरचरी नारी नृत्यगीतविशारदा ।
ददौ वासः सहस्रं च मया साकं महामते ॥[10]

एतादृश एव प्रसङ्गः स्त्रीधनदानस्य ब्रह्मवैवर्तपुराणे रेवती-बलरामविवाहप्रसङ्गे प्राप्यते -

---

[3]मनुस्मृतिः - ९/१९४-१९५
[4]तत्रैव - अध्याय ९/१९४
[5]तत्रैव – ९/१९४
[6]तत्रैव ९/१९५
[7]वायुपुराणम् – अ. ६६/१५
[8]तत्रैव – अ. ६६/१६
[9]लिङ्गपुराणम् - अ. ४०, श्लो. ५-६
[10]स्कन्दपुराणम्- २ वैष्णवखण्डः, अ. ३९, श्लो. १०-१३, पृ. १४७

प्रददौ रेवतीं कन्यां शश्वत् सुस्थिरयौवनाम् ।
अमूल्यरत्नभूषाढ्यां त्रिषु लोकेषु दुर्लभाम् ॥
बलाय बलदेवाय सम्प्रदानेन कौतुकात् ।
वयो यस्यागतं सत्ये युगानां सप्तविंशतिः ॥
दत्त्वा कन्यां विधानेन मुनिर्देवेन्द्रसंसदि ।
गजेन्द्राणां त्रिलक्षं च जामात्रे यौतिकं ददौ ॥
दशलक्षं तुरङ्गाणां रथानां लक्षमेव च ।
रत्नालङ्कारयुक्तानां दासीनां चापि लक्षकम् ॥
मणिलक्षं रत्नलक्षं स्वर्णकोटिं च सादरम् ।
विशुद्धं शुक्लं रम्यं च मुक्तामाणिक्यहीरकम् ॥[11]

अनेन निश्चयो भवति यद् विवाहसमये प्रदत्तस्य धनस्योपरि स्त्रीणामेव स्वामित्वं भवति । एतदतिरिक्तम् इदमपि बोधनीयं यद् भ्रात्रा पितृव्येन तथा सम्बन्धिभिश्च दत्तं सर्वं धनं स्त्रीणामेव । स्कन्दपुराणेऽपि दायभागस्य सुन्दरं विवरणं मिलति । तस्याः कुमार्याः पिता तत्कृते पुत्रसमानं विभज्य धनं सम्पत्तिं च प्रददौ । यद्यपि कुमारी स्वयं न वाञ्छति स्म, तथापि तां योग्यां मत्वा अन्यायोऽपि न भवेदिति प्रकृत्य च राजा पुत्रसमानं पुत्रीकृतेऽपि धनं ददौ -

अनिच्छन्त्यां कुमार्यां च वरं द्रव्यं च पार्थिवः ।
तथाऽन्यदपि प्रीत्याऽसौ यद् ददौ नृपतिः शृणु ॥
इदं भारतखण्डं च नवधैव विभज्य सः ।
ददावष्टौ स्वपुत्राणां कुमार्ये नवमं तथा ॥[12]

इत्थं च पश्यामो वयं यत् स्त्रीधने दायभागे च पुराणकाले स्त्रीणामेवाधिकारः । कल्किपुराणे तु कासाञ्चन सेविकानामपि समुल्लेखो मिलति, याश्च शिविकावहनकर्म कुर्वन्ति स्म । अनेनैव कर्मणा धनमुपार्जयन्ति स्म ।

निवार्यतां तां शिविकां वहन्तीं
नार्योऽतिमत्ता बलवत्तराश्च ।
पद्मा शुकोक्त्या तदुपर्युपस्था
जगाम ताभिः परिवारिताभिः ॥[1313]

कतिपयाः स्त्रियो राजपरिवारस्य अन्तःपुरस्य द्वारपालिकाकर्म-सेविकाकर्म च सम्पादयन्ति स्म । हैडिम्बीवर्णनमवलोकनीयम् । यथा-

दशसहस्रसंख्याभिश्चेटीभिः परिपूरितम् ।[14]

तस्या द्वारे द्वारपालिकाऽप्यासीत् । शिवपुराणे महानन्दादयो वेश्या अप्यासन् । उपरितनसमालोचनेन ज्ञायते यत् पुराणसमये स्त्रियोऽपि आर्थिकदृष्ट्या स्वतन्त्राः परिपुष्टाश्चासन् । एतावदपि अधिकांशाः श्रेष्ठकुलोत्पन्ना राजवंशीयाः स्त्रियोऽपि अर्थोपार्जनहेतुना कमपि व्यापारं व्यवसायं च न प्रकुर्वन्ति स्म अपि तु पितृपतिकुलात् प्राप्तस्त्रीधनोपरि दायभागोपरि च निर्भरा आसन् ।

**स्त्रीधनस्य प्रकाराः**

१. पितृद्वारा पारिबर्हे प्राप्तधनम् ।
२. पितृभ्रातृद्वारा दत्तं धनम् ।
३. कुटुम्बिजनैस्तथा सम्बन्धिभिः प्राप्तं धनम् ।
४. मित्रद्वारा दत्तं धनम् ।
५. पतिद्वारा तथा पतिसम्बन्धिभिः प्राप्तं धनम् ।

पुराणकालिकसमये अनेन सर्वप्रकारेण प्राप्तस्त्रीधनोपरि स्त्रीणामेव पूर्णाधिकारो बभूवेति । अस्य स्त्रीधनस्योपयोगः पुरुषैर्न विधातव्यः । यदि विपत्तिसमये पत्न्या आज्ञामादाय पुरुषः स्त्रीधनं गृह्णीयात् तर्हि तद्धनं द्विगुणीकृत्य अर्धद्विगुणीकृत्य च पत्नीकृते पुनः प्रदद्यात् । एतद् धनं स्त्री स्वस्य कृते

[11]ब्रह्मवैवर्तपुराणम् - ४ श्रीकृष्णजन्मखण्डः, अ. १०७, श्लो. २-६, पृ. १०८८ ।

[12]स्कन्दपुराणम् १ माहेश्वरखण्डः, अ. ३९, श्लो. ९-१०, पृ. ४०२ ।

[13]कल्किपुराणम् - अ. २, श्लो. १५ ।

[14]स्कन्दपुराणम् - १ माहेश्वरखण्डः, अ. ६०, श्लो. ५२ ।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

वस्त्र-आभूषण-दान-धर्म-जीविकोपार्जनादिषु व्ययीकर्तुं प्रभवति। पुराणसमयेऽस्य धनस्योपरि तस्याः स्त्रियाः पूर्णोऽधिकारः स्वामित्वं प्रभुत्वं चासीत्। पुत्र्याः स्त्रीधनस्योपरि पूर्णाधिकारसत्त्वस्योपरितनभागे विशदीकृत्य वर्णनमस्ति।[15] पुत्री यदि विवाहिता न भवेत् तर्हि सा पुत्रवत् पितुः सम्पत्तेरधिकारिणी भवितुमर्हति तथा न्यायतः साऽपि स्वभ्रातृवद् अधिकारिणी भवेदेवेति। कस्यचन पुरुषस्य पुत्रो न भवेत् केवलं पुत्री एव स्यादस्यां दशायां सैवाधिकारिणी। एतादृश्यः कन्या विवाहिताः स्युस्ताः पितुः पत्युर्वा पितृधनस्य पत्युर्धनस्य चोभयस्यापि अधिकारिण्यो भवन्त्येव। राज्ञो ययातेर्मुक्तिः पुत्रीपुत्रादेव सञ्जाता। दायभागरीत्या मिताक्षरारीत्या च पुत्रीपुत्रस्य तृतीयं स्थानं मन्यते। सर्वेऽपि धर्मशास्त्रकारा एकमतिकाः सन्ति विषयेऽस्मिन्।

पुराणसमयेऽप्यासां महत्त्वपूर्णस्थानमासीत्। स्कन्दपुराणे तु नारदद्वारा पार्वत्या हस्तरेखादर्शनस्य प्रसङ्गो मिलति। नारदः कन्याया महत्त्वं प्रदर्शयन् कन्यां दशपुत्रतुल्यां कथयामासेति -

दशपुत्रसमा कन्या दशपुत्रान् प्रवर्धयन् ।
यत्फलं लभते मर्त्यस्तल्लभ्यं कन्ययैकया ॥
तस्मात्कन्या पितुः शोच्या सदा दुःखविवर्धिनी ॥[16]

**दायभागः**

"दाय"शब्दोऽतिप्राचीनो वैदिकसाहित्येऽपि प्रयुक्त आसीत्। "ददातु वीरं शतदायमुक्थ्यम्"।[17] निरुक्ते च दाय-दायादशब्दा उद्धृतांशेषु प्रदर्शिताः। पाणिनिना च दायादशब्दस्य व्युत्पत्तिः प्रदर्शिता। तत्र सूत्रेष्वपि समागतोऽयं दायादशब्दः, यथा "दीयतेऽसौ दायः, तमादत्ते इति दायादः"[18] इति।

दायशब्दोऽर्थस्य वाचकः। विज्ञानेश्वरमतानुसारं दायः सा सम्पत्तिरस्ति यस्योपरि तस्य स्वामिना साकं सम्बन्धमात्रकारणेनैवापरव्यक्तेः स्वामित्वस्थापनं भवति'।[19] तत्र दायशब्देन यद्धनं स्वामिसम्बन्धादेव निमित्ताद् अन्यस्य स्वं भवति तदुच्यते। पितृसम्पत्तेरुपरि सन्तानस्याधिकारस्तत्पित्रा सह सम्बन्धकारणेन भवति। अयं च सम्बन्धो जन्मत एव जायते। अतो जन्मत एव अधिकारो ज्ञातव्यः। अपरं च जीमूतवाहनो दायशब्दोत्पत्तिं दानार्थधातुना प्रदर्शयन् कथयति यद् यो दीयते स एव दाय इति दाने दाता पुरुषः स्वाधिकारस्य त्यागं करोति। एवं तस्य स्वत्वनिवृत्त्या अपरपुरुषस्याधिकारस्तत्सत्त्वोपरि दृश्यते।[20]

'दीयते' इति व्युत्पत्त्या दायशब्दे ददाति-प्रयोगश्च गौणः, मृतप्रव्रजितादिस्वत्वनिवृत्तिपूर्वकपरसत्त्वोत्पत्तिफलसाम्यात्, न तु तत्र मृतादीनां त्यागोऽस्ति। ततश्च पूर्वस्वामिसम्बन्ध्यधीनं तत्स्वाम्योपरमे यत्र द्रव्यस्वाम्यं तत्र निरूढो दायशब्दः। पैतृकसम्पत्तावधिकारदृष्ट्या हिन्दूपरिवारः प्राक्तनैकसहस्रवर्षतः सम्प्रदायद्वये विभक्तो वर्तते। अनयोरुभयोर्मते उत्तराधिकारिप्रश्नमादाय मौलिकमतभेदो भवत्येव। प्रथमस्तु सम्प्रदायस्य प्रधानाधारस्य याज्ञवल्क्यस्मृतेः उपरि विज्ञानेश्वर-द्वारा १०७०-११०० ईशवीयमध्ये लिखिता मिताक्षरा नामिका टीकाऽस्ति। तथा परस्य मूलं १०९०-११३० ईशवीयमध्ये जीमूतवाहनद्वारा प्रणीतदायभागनामक-

[15] तदेव अ. २४, श्लो. ४६-४७ ।
[16] स्कन्दपुराणम् - १ माहेश्वरखण्डः, अ. ३९, श्लो. १२३-१२५।
[17] ऋ. सं. - २/३/२/४
[18] अष्टाध्यायी-२/३/३९ तथा ६/२/५
[19] याज्ञवल्क्य. २/११४ ।
[20] जीमूतवाहन-कृत - "दायभागः", १/४-५ ।

ग्रन्थोऽस्ति। याज्ञवल्क्येन विष्णुस्मृतिकारेण च विधवा स्त्री अपुत्रस्य पुरुषस्य सर्वप्रथममुत्तराधिकारिणी कथितेति।[21] बृहस्पतिना कात्यायनेन च तदधिकारस्य समर्थनमपि कृतम्। विधवाया अभावे कन्याऽपि उत्तराधिकारिणी सम्भवेदेव। ईशवीयपूर्वं चतुर्थशताब्द्यां कौटिल्येन तस्यै सर्वप्रथमं स्पष्टरूपेण दायादः स्वीकारितः।[22] मनुरीत्याऽपि विधवातः पश्चात् पुत्री एवोत्तराधिकारिणी भवितुमर्हति।[23] याज्ञवल्क्य-विष्णु-नारद-बृहस्पतीत्यादिभिः कन्याया अधिकारस्य समर्थनं कृतम्। कन्यानां दायग्रहणाय तारतम्यस्य सर्वप्रथमं कात्यायनेन विचारो विहितः। अविवाहितकन्या अपि अस्योत्तराधिकारिणी कथिता।[24] मृतस्य अपुत्रस्य पुरुषस्य च सम्पत्तौ अधः क्रमेण पूर्वपूर्वस्याभावे उत्तरोत्तरस्य अधिकारो भवति -

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुता गोत्रजा बन्धुः शिष्यः स ब्रह्मचारिणः॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः॥[25]

अर्थात् पत्नी-कन्या-दौहितृ-मातृ-पितृ-भ्रातृ-भ्रातृपुत्र-गोत्रज-बन्धु-शिष्य-सहपाठीत्यादयः सर्वेऽपि क्रमशोऽधिकारिणो भवेयुरिति।

याज्ञवल्क्यतः पश्चाद् उल्लेखनीयाः स्मृतिकाराः नारद-बृहस्पति-कात्यायन-देवलादयः सन्ति। नारदः पुत्रस्याभावे पुत्र्या अधिकारं बलपूर्वकं समर्थयति। यतो हि पुत्रः पुत्री चोभावेव पितुर्वंशस्य सन्तानप्रवर्द्धकौ स्तः -

पुत्राभावे तु दुहिता तुल्यसन्तानदर्शनात्।
पुत्रश्च दुहिता चोभौ पितुः सन्तानकारकौ॥[26]

बृहस्पतिना पत्नीं प्रति अधिकारान् समर्थयता याज्ञवल्क्यवद् दायादेषु प्रथमस्थानं प्रदत्तम्-

यस्य नोपरता भार्या देहार्धं तस्य जीवति।
जीवत्यर्धशरीरेऽर्थं कथमन्यः समाप्नुयात्॥[27]

मनुरीत्या अविवाहितपुत्रीकृते प्राचीनसमये पैतृकसम्पत्तितश्चतुर्थांशसम्पत्तिर्भातृसकाशात्प्राप्ता आसीत्।[28] वैदिकसमयेऽपि अविवाहिता याः कन्याः स्वपित्रा सह आजीवनं गृहे निवसन्ति स्म, ताः कन्या अभुजा इति संज्ञया कथ्यन्ते स्म जनैरिति। ता अपि सामान्यरूपेण पैतृकसम्पत्तेरुत्तराधिकारिण्यः सम्भवन्त्येव। पुराणसमयेऽपि स्त्रीणाम् आर्थिकचित्रणस्य सम्यग् विवरणं मिलति। स्त्रीधनस्य दायभागस्य च स्पष्टप्रमाणमपि प्राप्यते। अग्निपुराणे दायभागस्य स्त्रीधनस्य वा उत्तमोल्लेख इत्थमस्ति -

यदि दद्यात्समानांशान् कार्याः पत्न्यः समांशिकाः।
असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः॥
भगिन्यश्च निजादंशाद् दत्त्वांशं तु तुरीयकम्।
चतुस्त्रिद्व्येत्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः॥
औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः।
सुतांश्चैषां प्रभर्तव्या यावद् वै भर्तृसात्कृताः॥
अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः॥[29]

अर्थात् यदि पिता स्वपुत्रेभ्यः समानांशरूपेण द्रव्यं वितरति, तर्हि तस्याः पत्न्यः अपि तस्मिन् कार्ये समांशिकाः अर्थात् समानभागभागिन्यः स्युः। याः स्त्रियः असंस्कृताः सन्ति (विवाहादिसंस्काररहिताः),

[21] याज्ञवल्क्य. - २/१३५ ।
[22] कौटिल्य अर्थशास्त्रम् - ३/५ ।
[23] मनुस्मृतिः - ९/१३० ।
[24] मिताक्षरा - २/१३५ ।
[25] याज्ञवल्क्य. १/१३५-१३६ ।
[26] नारदसंहिता - १४/१७ ।
[27] दायभागः- १४९ ।
[28] मनुस्मृतिः - ८/११८ तथा कौटिल्य अर्थशास्त्रम् - ३/५ ।
[29] अग्निपुराणम् - अ. २५६ ।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

ताः पूर्वं संस्कृतैः भ्रातृभिः विधिपूर्वकं संस्कार्याः (विवाहादिना संयोज्याः) भवन्ति। भगिन्यः (स्वभगिन्यः) तु निजस्य दत्तांशात् तुरीयकं (चतुर्थांशं) दत्त्वा अवशिष्टभागं ग्राहयन्ति। ब्राह्मणानां पुत्राणां भागविभागः वर्णानुसारं चतुर्थः, तृतीयः, एकः इत्येवं क्रमशः विनिर्दिष्टः। (एषः विविधानां पुत्राणां वर्गः, तेषां ज्येष्ठत्वानुसारं वा वर्णविभागः अपि सम्भाव्यते।) यः पुत्रः धर्मपत्नीजातः (धर्मपत्नीसम्भूतः), सः औरसः इति कथ्यते, स एव मुख्यः। पुत्रिकायाः सुतः यदि पितृगृहगृहीतः (भर्त्रा स्वीकृतः) भवति, तर्हि सः अपि औरसपुत्रतुल्यः भविष्यति। एतेषां सुतानाम् अंशः यावत् भर्तृसात्कृतो भवति, तावत् प्रदेयः। याः स्त्रियः अपुत्राः (निःसन्ततयः) सन्ति, यदि ताः साधुवृत्तयः (सदाचारवत्यः, कुलीनवृत्तयः) स्युः, ताः स्त्रियः अपि एतेन एव (अर्थात् पुत्रैः) भर्तव्या, पालनीया च।

**आर्थिकस्वातन्त्र्यम्**

आर्थिकस्वातन्त्र्यम् इत्यस्य अर्थः अस्ति - धनसम्पत्त्याः विषये आत्मनिर्णयकत्वम्। प्राचीनभारतीयपरम्परायामपि स्त्रीणाम् आर्थिकविषये स्वतन्त्रता यथाशक्ति संरक्षिता आसीत्। विशेषतः स्त्रीधनं, दायभागः, दानकर्तृत्वं च एतत् सूचयन्ति यत् स्त्रियः केवलं भर्तृपराश्रिता नासन्, अपि तु आर्थिकरूपेण आत्मनिर्भराः अपि। पुराणेषु दृष्टं यत् धर्मपत्नी पत्या सह धर्मकार्येषु समानभागिन्यः अभवन्। विवाहे प्राप्तं स्त्रीधनं न केवलं तस्याः अधिकारः, अपि तु अपरस्पर्शनीयम् इति शास्त्रनिर्देशः। आर्थिकस्वातन्त्र्यस्य स्वरूपं स्त्रीधनस्य संरक्षणे, दानविधायित्वे, तथा व्यवसायमण्डले अपि दृश्यते। न केवलं धर्मशास्त्रेषु, अपि तु पुराणेषु अपि कतिपयाः स्त्रियः व्यापारिण्यः, शिक्षकाः, विदुष्यश्च अपि वर्णिताः। एषु उदाहरणेषु स्त्रीणाम् आर्थिकसामर्थ्यं, निर्णयक्षमता च प्रतिपाद्यते। अत्र आर्थिकस्वातन्त्र्यं न केवलं धनप्राप्तेः चिह्नम्, अपि तु आत्मसम्मानस्य आधारः अपि।

आधुनिकसमाजे यदा महिलाः अर्थव्यवस्थायाम् अग्रगण्याः भवन्ति, तदा एते प्राचीनदृष्टान्ताः प्रेरणास्रोतांसि सन्ति। आर्थिकदृष्ट्या स्वतन्त्रता स्त्रियै आत्मनिर्भरतां, सुरक्षितजीवनं, विकल्पस्वातन्त्र्यं च ददाति।

**स्त्रीसशक्तिकरणम्**

स्त्रीसशक्तिकरणं नाम केवलं बाह्यबलस्य वृद्धिः न, अपि तु ज्ञानस्य, आत्मविश्वासस्य, निर्णयस्वातन्त्र्यस्य च समुन्नतिः। एषा प्रक्रिया स्त्रियः सामाजिकरूपेण, आर्थिकरूपेण, बौद्धिकरूपेण च सशक्ताः करोति। भारतीयपुराणसाहित्ये सावित्री, गार्गी, मैत्रेयी, अनुसूया, दमयन्ती इत्याद्याः स्त्रियः अत्यन्तं तेजस्विन्यः, ज्ञानिन्यः, स्वनिर्णययुक्ताः च अभवन्। सावित्री यमराजं अपि ज्ञानबलतः पराजितवती, गार्गी ब्रह्मविद्यायां याज्ञवल्क्यं प्रश्नैः निरस्तवती। एवं स्त्रीणां सशक्तिकरणस्य जडा अस्माकं संस्कृतेः मूले सन्ति। प्राचीनकाले धर्मपत्नी, सहधर्मिणी इति दृष्ट्या स्त्रियः सम्मानिताः। एषा दृष्टिः स्त्रीपुरुषयोः समत्वं प्रतिपादयति।

वर्तमानकाले स्त्रीशिक्षा, धनोपार्जनसुविधा, निर्णायकत्वं, नियमसंरक्षणम् – एते सर्वे स्त्रीसशक्तिकरणस्य उपादानानि। परं यथार्थं सशक्तिकरणं तदा सम्पूर्णं भवति, यदा स्त्रियः आत्मविश्वासपूर्वकं स्वजीवननिर्णयान् स्वयमेव कर्तुं शक्नुवन्ति। अतः पुराणदृष्टान्तैः प्रेरितम् आधुनिकस्त्रीसशक्तिकरणं केवलम् अधिकारदायित्वेन सीमितं न स्यात्, अपि तु जीवनप्रेरणायाः मूलाधारः भवेत्।

**सामाजिकभूमिका**

सामाजिकसंरचनायां स्त्रीणां भूमिका सदैव महत्त्वपूर्णा आसीत्। माता, पत्नी, भगिनी, पुत्री, शिक्षिका, प्रशासिका इत्याद्याकारैः सा समाजे विविधदिशासु कार्यं कृतवती। प्राचीनभारते स्त्रीणां सामाजिकभूमिका केवलं गृहकार्ये सीमिता नासीत्, अपि तु धर्म-राजनीति-शिक्षा-कलादिषु अपि प्रसिद्धा।

भागवतपुराणे, देवीपुराणे, स्कन्दपुराणे च कतिपयाः स्त्रियः धर्मप्रचाराय, तपस्यायै, राजकार्याय अपि प्रेरिताः दृश्यन्ते। अनुसूया तपस्विनी, सीता समाजधर्मे स्थितप्रज्ञा, द्रौपदी न्यायप्रवर्तिनी च आसीत्। एषां भूमिकाः केवलं स्त्रीस्वरूपस्य शृङ्गारपरत्वं न, अपि तु धैर्यं, निर्णयशक्तिं, त्यागबुद्धिं च प्रतिपादयन्ति। सामाजिकभूमिकायाः महत्त्वं तदा वर्धते, यदा स्त्रियः शिक्षायां, चिकित्सायां, प्रशासने, राजनीतौ च अग्रगण्यं स्थानं लभन्ते। एषा भूमिका केवलं कर्तव्यरूपेण न स्यात्, किन्तु प्रेरणास्वरूपेण अपि प्रकटते।

आधुनिकसमाजे यदि स्त्रियः सामाजिकविकासे, निर्णयप्रक्रियायां, संस्कारवितरणे च भागं गृह्णन्ति, तर्हि एषा भूमिका सशक्तसमाजस्य आधारः भवति।

**निष्कर्षः**

एतद्विश्लेषणात् निष्कर्षरूपेण प्राप्यते यत् पौराणिकसमये नारीजनस्य दशा श्रेष्ठतमाऽऽसीत्। तासां स्त्रीधनदृष्ट्या दायधनदृष्ट्या च उच्चतरस्थानं प्राप्तमासीत्। भगिनीभ्रात्रोः सम्बन्धेऽस्मिन् नास्ति कश्चन मतभेदः। प्रत्येकस्मिन् प्रेम-सहानुभूति-आत्मीयभावनादयो गुणा आसन्। पुराणसमये परिवारे मातुः पितुश्च इदमेव प्रधानकर्तव्यं भवति स्म यत् सर्वा अपि सन्ततयः प्रेम्णा व्यवहरेयुरिति। अस्यैकमुदाहरणं स्कन्दपुराणे प्राप्यते। कुमारीनामकराजकन्यायाः समीपे तद्भ्रातरो गत्वा प्रार्थयन्ति यद् हे देवि! अस्माकं राज्यं विभज्य अस्मत्पुत्रेभ्यो दापय। अतः पुराणसमये भगिनीं प्रति भ्रातॄणां पूर्ण-प्रेम अधिकविश्वासश्चासीत्। भ्रातृजना मिलित्वा भगिनीपार्श्वे समागत्य प्रार्थयन्ति स्म।

स्त्रीणाम् आर्थिकस्वातन्त्र्यं, सशक्तिकरणं, सामाजिकभूमिका च – एते त्रयोऽपि अङ्गाः परस्परं सम्बद्धाः। एतेषां समुचितविकासेन स्त्रियः आत्मनिर्भराः, ज्ञानिन्यः, सृजनात्मिकाश्च भवन्ति। पुराणवाङ्मये न केवलं धार्मिकचिन्तनम्, अपि तु स्त्रीविषये सुदृढः दृष्टिपातः अपि दत्तः अस्ति। अतोऽस्माभिः एतेषां प्राचीनमूल्यानाम् आधारेण आधुनिकविकासः सम्यक् चिन्तनीयः।

शनैः शनैः परवर्तिकाले समागत्य परिवारस्य परिवारजनानां च भावना विचारश्च परिवर्तितः। संयुक्तप्रणाली विलुप्ता। अर्थस्य सम्पत्तेरुत्तराधिकारस्य च महत्त्वाकाङ्क्षा भगिनीभ्रात्रोः सौहार्दं नाशितवती। शनैः शनैस्तासामुत्तराधिकारित्वेऽपि प्रवञ्चना सञ्जाता। अतो वक्तुं शक्यते यत् पुराणकाले नार्य आर्थिकदृष्ट्या स्वतन्त्रास्तथा स्त्रीधनस्य दायभागस्याधिकारिण्यश्च समभवन्निति।

## सहायकग्रन्थसूची


- चाणक्यः। (१९९२)। *कौटिलीयार्थशास्त्रम्*। शास्त्री, रामानाथः (सम्पा.)। वाराणसी: चौखम्भा संस्कृत सीरीज।
- मनुः। (१९८५)। *मनुस्मृतिः*। विद्यारत्नः, रामनारायणः (सम्पा.)। वाराणसी : चौखम्भा संस्कृत भवन।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025


- याज्ञवल्कः । (१९३८) । *याज्ञवल्क्यसंहिता* । शास्त्री, कृष्णमाचारी (सम्पा.) । बम्बई: आनन्दाश्रमसंस्था ।
- विज्ञानेश्वरः । (१९६२) । *मिताक्षरा* (याज्ञवल्क्यस्मृतेः टीका) । जोशी, लक्ष्मणशास्त्री (सम्पा.) । पुणे : भारतीया विद्याभवनम् ।
- जीमूतवाहनः । (१९७२) । *दायभागः* । शास्त्री, के.पी.व. (सम्पा.) । कलकत्ता : बिड़ला फाउंडेशन ।
- नारदः । (१८८५) । *नारदस्मृतिः* । जॉली, जूलियस् जे. (सम्पा.) । लन्दन : ट्रूबनर एण्ड कम्पनी ।
- (१९८०) । *ऋग्वेदसंहिता* । मूलर्, मैक्स् (सम्पा.) । ऑक्सफोर्ड : ऑक्सफोर्ड यूनिवर्सिटी प्रेस् ।
- व्यासदेवः । (१९००) । *अग्निपुराणम्* । शास्त्री, विष्णुः (सम्पा.) । मुंबई : नीराजनप्रकाशनम् ।
- व्यासदेवः । (१९२४) । *लिङ्गपुराणम्* । शास्त्री, श्रीकृष्णः (सम्पा.) । वाराणसी: चौखम्भा ओरियण्टल् ।
- व्यासदेवः । (१९८८) । *स्कन्दपुराणम्* । शास्त्री, गणपतिः (सम्पा.) । दिल्ली : मोतीलाल बनारसीदास ।
- व्यासदेवः । (१८९३) । *ब्रह्मवैवर्तपुराणम्* । शास्त्री, श्रीधरः (सम्पा.) । कलकत्ता : संस्कृतप्रेस् ।
- व्यासदेवः । (१९९०) । *कल्किपुराणम्* । शास्त्री, केशवः (सम्पा.) । वाराणसी : चौखम्भा अमरभारती प्रकाशन ।
- व्यासदेवः । (१९७५) । *श्रीमद्भागवतम्* । स्वामितपोवनाचार्यः (सम्पा.) । ऋषिकेश: तपोवनप्रकाशनम् ।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# चतुःषष्टिकलाः भारतीयदर्शनञ्च – ज्ञानकौशलसङ्गमः

**डॉ. छबिलालन्यौपाने**
**सहायकप्राचार्यः, दर्शनविभागः, नागार्जुन-उमेश-संस्कृतमहाविद्यालयः**
**(का०सि०द०सं०विश्वविद्यालयस्याङ्गीभूतः)**
**बिहारः**

**प्रबन्धसारः**

*प्रस्तुतमिदं शोधपत्रं भारतीयसंस्कृतेः द्वयोः मूलभूताङ्गयोः - चतुःषष्टिकलानां भारतीयदर्शनस्य च – परस्परसम्बन्धम्, ऐक्यं च अन्वेष्टुं प्रयतते। शोधस्य मुख्यनिष्कर्षोऽस्ति यदेते द्वे अङ्गे परस्परपूरके स्तः, ययोः सङ्गमेन ज्ञानस्य कौशलस्य च अद्भुतः सङ्गमः प्रादुर्भवति, यः व्यक्तेः समग्रविकासाय, सामाजिकसमृद्धये च मार्गं प्रशस्तं करोति। शोधपत्रेण प्रथमतया चतुःषष्टिकलानां सविस्तरं परिचयः प्रस्तुतः, यत्र कामसूत्र-पुराण-नाट्यशास्त्रादिभ्यः स्रोतोभ्यः प्राप्ता सूची समाविष्टा अस्ति। ततः भारतीयदर्शनस्य षड्दर्शन-उपनिषद्-गीतादिषु निहितं ज्ञानकोषं सैद्धान्तिकं व्यावहारिकं च स्वरूपं च विश्लेषितम्। मुख्यतया, शोधपत्रेण तर्कविद्या, निरुक्तिः, प्रहेलिका, सम्पाठ्यं, काव्यकृतिः, निमित्तज्ञानं, छन्दोज्ञानम् इत्यादिभिः कलाभिः भारतीयदर्शनस्य सम्बन्धः प्रदर्शितः। अन्तिमे, शोधपत्रेण एतयोः सङ्गमस्य सामाजिक-सांस्कृतिक-आध्यात्मिकप्रभावः, गुरुकुलपद्धतौ तस्य भूमिका, आधुनिकयुगे शिक्षाक्षेत्रे, रचनात्मकतायां, कौशलविकासे, मानसिकसन्तुलने च तस्य प्रासङ्गिकता च उज्ज्वलीकृता। निष्कर्षतया, चतुःषष्टिकलाः भारतीयदर्शनञ्च भारतीयसंस्कृतेः आधारस्तम्भौ स्तः, ययोः संयोजनं जीवनस्य समग्रविकासस्य एकं सशक्तमाध्यमं प्रस्तौति।*

**कुञ्चीशब्दाः – चतुःषष्टिकलाः, भारतीयदर्शनं, कामसूत्रं, तर्कविद्या, छन्दज्ञानं, पुरुषार्थचतुष्टयं चेत्यादयः।**

******************************************************************************

**प्रस्तावना –**

भारतीयसंस्कृतिः विश्वस्य प्राचीनतमसंस्कृतिषु अन्यतमा। अस्याः मूले चतुःषष्टिकलाः भारतीयदर्शनं च गभीररूपेण निहिताः सन्ति, यत् ज्ञान-कौशलयोः अद्भुतसङ्गमं दर्शयति। चतुःषष्टिकलाः न केवलं कलायाः प्रदर्शनम्, अपि तु जीवनस्य समग्रविकासस्य मार्गदर्शनमपि कुर्वन्ति। भारतीयदर्शनम् आत्मनः, विश्वस्य जीवनस्य चोद्देश्यविषये गहनं चिन्तनं प्रस्तौति। अनयोः संयोजनं भारतीयसंस्कृतेः विशिष्टतां प्रकाशयति, यत् ज्ञान-कौशलयोः सङ्गमेन जीवनं समृद्धं निर्माति। प्रस्तुतं शोधपत्रमिदं चतुःषष्टिकला-भारतीयदर्शनयोः संगमस्य, ऐक्यतायाः, सामाजिकप्रभावस्य च विषये विश्लेषणं करोति।

**चतुःषष्टिकलाः – एकः परिचयः**

चतुःषष्टिकलाः भारतीयसंस्कृतेः बहुपक्षीयपरम्परायाः प्रतीकाः सन्ति। एताः कलाः जीवनं सौन्दर्येण, कौशलेन, ज्ञानेन च समृद्धं कर्तुं प्राचीनकाले विकसिताः आसन्। एताः कलाः भारतीयसंस्कृतौ जीवनस्य विविधक्षेत्रेषु निपुणतायाः प्रतीकभूताः सन्ति। वात्स्यायनस्य कामसूत्रे, कौटिल्यस्य अर्थशास्त्रे, अन्येषु च ग्रन्थेषु अस्याः प्रामाणिकं वर्णनं प्राप्यते। एतासु कलासु सङ्गीत-नृत्य-चित्रकला-शिल्पकला-युद्धकला-आयुर्वेद-गणित-ज्योतिष-काव्य-नाट्यादयः समाविशन्ति। एताः कलाः एव न, अपि तु जीवनस्य प्रत्येकं क्षेत्रं समृद्धं कर्तुं सक्षमाः भवन्ति। यथा सङ्गीतं न केवलं मनोरञ्जनाय, अपि तु मनसः शान्तये अपि उपयोगि

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

भवति। एवमेव युद्धकला, शारीरिकं मानसिकं च सामर्थ्यं वर्धयति।

एतासां कलानामुद्देश्यं केवलं व्यवसायिकं नास्ति, अपि तु एताः व्यक्तेः समग्रविकासं प्रोत्साहयन्ति। एतासु निपुणतां प्राप्तुं शिक्षायाः, अभ्यासस्य समर्पणस्य चावश्यकता भवति। एताः कलाः भारतीयसंस्कृतेः सामाजिक-सांस्कृतिक-आध्यात्मिकाधारं दृढं कुर्वन्ति।

**भारतीयदर्शनम् – ज्ञानस्य गहनचिन्तनभूतम्**

भारतीयदर्शनं विश्वस्य प्रमुखदर्शनेषु एकं विशिष्टं स्थानं धारयति। षड्दर्शनानि (न्याय-वैशेषिक-सांख्य-योग-मीमींसा-वेदान्तदर्शनानि), उपनिषद्, भगवद्गीता, बौद्धदर्शनं, जैनदर्शनं चैतानि अस्य प्रमुखाः आधाराः सन्ति। एषु दर्शनेषु आत्मनः विश्वस्य जीवनस्य उद्देश्यं प्रति गहनं चिन्तनं कृतं वर्तते।

भारतीयदर्शनं न केवलं सैद्धान्तिकम् अपि तु व्यवहारिकमपि अस्ति। यथा योगदर्शनं शारीरिकमानसिकस्वास्थ्यं प्रोत्साहयति, यस्मिन् ध्यान-प्राणायाम-आसनादीनि जीवनस्य अभिन्नाङ्गानि भवन्ति। वेदान्तदर्शनम् आत्मनः विश्वस्य चैकत्वविषये चिन्तनं करोति, येन व्यक्तिः जीवनस्य गूढार्थं प्राप्नोति।

अस्मिन् शोधपत्रे भारतीयदर्शनेन विशेषतः षड्दर्शनसम्बद्धानां कलानाम् ऐतिहासिकसन्दर्भस्य, सूच्याः, महत्त्वस्य च विस्तरेण चर्चा कृता अस्ति। भारतीय-संस्कृतौ शास्त्रेषु च विभिन्नस्थानेषु ६४ कलानां वर्णनं प्राप्यते। एताः कलाः प्राचीनभारतीयज्ञानस्य, कलानां, कौशलस्य च संग्रहरूपेण सन्ति, याः "चतुःषष्टिः कलाः" इति नाम्ना प्रसिद्धाः सन्ति। एताः मुख्यतया निम्नलिखितस्रोतःसु उल्लिखिताः सन्ति ।

**कामसूत्रम् (वात्स्यायनविरचितम्)** – वात्स्यायनेन लिखिते "कामसूत्रे" ६४ कलानां विस्तरेण वर्णनं विद्यते ।[1] अयं ग्रन्थः न केवलं प्रेमसम्बन्धेषु केन्द्रितोऽस्ति, अपि तु जीवनस्य विविधपक्षेषु निपुणतायै एताः कलाः सहायिका भवन्ति। अत्र सामाजिक-सांस्कृतिक-व्यक्तिगत-विकासाय एताः कलाः महत्त्वपूर्णाः इति मन्यन्ते ।[2]

**पुराणानि स्मृतयश्च** - एताः कलाः केषुचित् विष्णु[3]-भागवता[4]दिषु पुराणेषु मनुस्मृति[5]ग्रन्थेषु च उल्लिखिताः सन्ति। एतेषु ग्रन्थेषु उल्लिखिताः कलाः मानवजीवनं समृद्धं कुर्वन्ति।

**नाट्यशास्त्रम् (भरतमुनिविरचितम्)** – भरतमुनेः "नाट्यशास्त्रम्" इत्यत्र नृत्य-सङ्गीत-अभिनयादि-प्रदर्शन-कला-सम्बद्धानां बह्वीनां कलानां वर्णनं प्राप्यते। याः ६४ कला-सूच्या सह मिलन्ति। अयं ग्रन्थः भारतीयकलासंस्कृतेः आधारः इति मन्यते ।[6]

**ललितकलाः लोकपरम्पराश्च** – ६४ कलासु समाविष्टानि कानिचन कौशलानि यथा चित्रकला, शिल्पकला, वाद्ययन्त्राणि, शिल्पानि च, भारतीयलोकपरम्परासु, ललितकलाग्रन्थेषु च वर्णितानि सन्ति यथा "शिल्पशास्त्रम्" इत्यत्र

[1] कामसूत्रम्, विद्यासमुद्देशप्रकरणम् १.३.१५
[2] चतुःषष्टिः कलाः यास्ताः सर्वं जीवनसौन्दर्यम्।
[3] शिल्पविद्या-रथयात्रानिर्माण-धातुकर्मादिकलाः, विष्णुपुराणम् १.१७
[4] भगवतः श्रीकृष्णस्य वंशीवादनम्, श्रीमद्भागवतमहापुराणम्, दशमस्कन्धः
[5] धनुर्विद्यावर्णनम्, मनुस्मृतिः अध्यायः ७
[6] नाट्यशास्त्रम्, अध्यायाः २८-३३

शिल्पसम्बद्धाः[7] वास्तुकलासम्बद्धाश्च[8] कलाः प्राप्यन्ते।

**जैन-बौद्धसाहित्यम् –** एताः कलाः षट्खण्डागमादि-जैनग्रन्थेषु[9] बौद्धसाहित्येषु[10] च सन्दर्भरूपेण उल्लिखिताः सन्ति, यत्र एताः शिक्षायाः जीवनकौशलस्य च भागत्वेन वर्णिताः सन्ति ।

**लौकिकसाहित्यम् –** नृत्य-सङ्गीत-चित्रकलाश्च नायिकया शकुन्तलया अन्यपात्रैः सह चित्रिताः सन्ति।[11] राज्यसञ्चालनशिल्पं युद्धं च केन्द्रीकृत्य रचिते अर्थशास्त्रग्रन्थे धनुर्विद्या, रसायनविज्ञानम् इत्यादीनां कलानामुल्लेखः प्राप्यते।[12] आयुर्वेदीय-चरक-सुश्रुतादिसंहिताग्रन्थेषु रसायनविद्यायाः आहारविद्यायाश्चोल्लेखः प्राप्यते।

**चतुःषष्टेः कलानां सूचीस्वरूपम् –** कामसूत्रे प्रतिपादितं वर्तते यत्

**"धर्मार्थाङ्गविद्याकालाननुपरोधयन् कामसूत्रं तदङ्गविद्याश्च पुरुषोऽधीयीत।"**[13]

अर्थात् पुरुषेण धर्मशास्त्रस्य, अर्थशास्त्रस्य, एतयोः अङ्गीभूतविद्यानां, मध्ये मध्ये कामसूत्रस्य, तदङ्गीभूतविद्यानां चाध्ययनं कर्तव्यमिति। स्त्रीः विवाहात् पूर्वं पितृगृहे एताः विद्याः अधीयीत। यदि विवाहिता चेत् पत्यनुमत्या एताः विद्याः शिक्षेत।[14] स्त्रियः शास्त्रस्य अधिकारिण्यो न भवन्तीत्यतः तासाम् एतासु विद्यासु परिश्रमो निरर्थकः इति केषाञ्चनाचार्याणां मतमस्ति।[15] परं महर्षिवात्स्यायनः एतासां विद्यानामध्ययनाय अनुमतिं प्रयच्छति।[16] तेषामिदं कथनं यत् – **"प्रयोगस्य च शास्त्रपूर्वकत्वात्"** इति। अर्थात् व्यवहारिकप्रयोगेण विना सैद्धान्तिकज्ञानं समुचितरूपेण कर्तुं न शक्यते।

एताः कामसूत्रप्रतिपादिताः ६४कलाः सन्ति – **"गीतं, वाद्यं, नृत्यम्, आलेख्यं, विशेषकच्छेद्यं, तण्डुलकुसुमवलिविकाराः, पुष्पास्तरणं, दशनवसनाङ्गरागः, मणिभूमिकाकर्म, शयनरचनम्, उदकवाद्यम्, उदकाघातः, चित्राश्च योगाः, माल्यग्रथनविकल्पाः, शेखरकापीडयोजनं, नेपथ्यप्रयोगाः, कर्णपत्रभङ्गाः, गन्धयुक्तिः, भूषणयोजनम्, ऐन्द्रजालः, कौचमाराश्च योगाः, हस्तलाघवं, विचित्रशाकयूषभक्ष्यविकारक्रिया, पानकरसरागासवयोजनं, सूची-वानकर्माणि, सूत्रक्रीडा, वीणीडमरुकवाद्यानि, प्रहेलिका, प्रतिमाला, दुर्वाचकयोगाः, पुस्तकवाचनं, नाटकाख्यायिकादर्शनं, काव्यसमस्यापूरणं, पट्टिका-वान-वेत्रविकल्पाः, तक्षकर्माणि, तक्षणं, वास्तुविद्या, रूप्यपरीक्षा, धातुवादः, मणिरागाकरज्ञानं, वृक्षायुर्वेदयोगाः, मेषकुक्कुटलावकयुद्धविधिः, शुकसारिकाप्रलापनम्, उत्सादने संवाहने केशमर्दने च कौशलम्, अक्षरमुष्टिकाकथनं, म्लेच्छितविकल्पाः, देशभाषाविज्ञानं, पुष्पशकटिका, निमित्तज्ञानं, यन्त्रमातृका, धारणमातृका, सम्पाठ्यं, मानसी काव्यक्रिया, अभिधानकोशः, छन्दोज्ञानं, क्रियाकल्पः, छलितकयोगाः, वस्त्रगोपनानि, द्यूतविशेषः, आकर्षक्रीडा, बाल-क्रीडनकानि,**

[7] मृण्मयीकला, सूचीवायनकला प्रभतयः।

[8] मन्दिरनिर्माणम्, आभूषणनिर्माणम् आदयः।

[9] लिपिविद्या, गणितविद्या आदयः।

[10] जातककथासु संगीत-नृत्य-युद्ध-धनुर्विद्यानामुल्लेखः।

[11] अभिज्ञानशाकुन्तलम्, चित्रकला, नृत्यकला चादयः।

[12] अर्थशास्त्रम्, धनुर्विद्या, रसायनविज्ञानम् आदयः।

[13] कामसूत्रम्, विद्यासमुद्देशप्रकरणम् १.३.१

[14] कामसूत्रम्, विद्यासमुद्देशप्रकरणम् १.३.२

[15] कामसूत्रम्, विद्यासमुद्देशप्रकरणम् १.३.३

[16] कामसूत्रम्, विद्यासमुद्देशप्रकरणम् १.३.४

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**वैनयिकीनां, वैडयिकीनां व्यायामिकीनां च विद्यानां ज्ञानम्, इति चतुःषष्टरङ्गविद्याः।"**[17] एताः कलाः कामशास्त्रस्य "उपायभूताः कलाः" इति रूपेण परिगणिताः सन्ति। उक्तकलातः भिन्नाः चतुःषष्टिः कलाः पाञ्चालदेशप्रसिद्धाः सन्ति। परन्तु एतासां सूची व्याख्या च भिन्नग्रन्थेषु काचित् भिन्ना भवितुम् अर्हति।

एतानि प्रमाणानि दर्शयन्ति यत् ६४ कलाः भारतीयसंस्कृतेः अभिन्नभागाः अभवन्, तेषामुल्लेखः विविधग्रन्थेषु प्राप्यते। एताः न केवलं सैद्धान्तिकाः अपि तु व्यवहारिकजीवनेन सह अपि सम्बद्धाः सन्ति, येन प्राचीनभारतस्य समृद्धपरम्परां प्रतिबिम्बितां करोति।

**चतुःषष्टिःकलानां सांस्कृतिकं सामाजिकं च महत्त्वम्–**

**शिक्षा तथा व्यक्तित्वविकासः** - एताः कलाः व्यक्तिं बहुमुखीं कुर्वन्ति स्म, यः सामाजिकव्यक्तिगतजीवने सम्मानं प्राप्नोति स्म।

**आर्थिकयोगदानम्** - शिल्पकला, वास्तुकला, खाद्यकला च अर्थव्यवस्थां सुदृढां कृतवत्यः।

**आध्यात्मिकता** - सङ्गीतं, नृत्यं, काव्यञ्चेत्यादिकलाः आध्यात्मिकशान्तेः, ईश्वरसम्बन्धस्य च सहायिकाः आसन्।

**सामाजिकसङ्गतिः** - प्रदर्शनं लोककला च समुदायम् एकत्र आनयत्।

**चतुःषष्टिकलानाम् आधुनिकप्रसङ्गिकता**

भारतीयपरम्परायां चतुःषष्टिः कलाः सम्पूर्णजीवनस्य विकासाय अनिवार्याः मत्वा निरूपिताः। एतेषु गायनं, नर्तनं, चित्रकला, नाट्यकला, वास्तुकला, शयनविन्यासः, सम्प्रेषणकला, सूत्रकर्म इत्यादयः बहवः विषयाः अन्तर्भवन्ति।

**आधुनिककाले तासां प्रसङ्गिकता**

- **कलाक्षेत्रे रचनात्मकतायां च** - गीत-नृत्य-नाट्यादिकाः कलाः अद्यापि सांस्कृतिकक्षेत्रे उपयोगिन्यः सन्ति। एताः कलाः मनोरञ्जनस्य, आत्मप्रकाशनस्य च साधनानि सन्ति।
- **सामाजिकसम्प्रेषणकौशलविकासे** - संवादकला, हास्यनिर्माणं, वेशभूषाविद्या च अद्य प्रभाविसंचारक्षेत्रे, नाट्यशाला, विज्ञापनकला, जनसम्पर्कक्षेत्रे च उपयोगिन्यः सन्ति।
- **प्रौद्योगिकीक्षेत्रे परिकल्पनाक्षेत्रे च** - वास्तुकला, शयनविन्यासकला, वस्त्रविन्यासः, भूषणनिर्माणकला इत्यादयः कलाः कलावस्तुनिर्माणे, अन्तर्विन्यासे, वस्त्रशिल्पे च उपयोगिन्यः सन्ति।
- **कौशलविकासे आत्मनिर्भरत्वे च** - पाकविद्या, सूत्रकर्म, विन्यासकला, पुष्पविन्यासः च सूक्ष्मोद्योगेषु, स्वारम्भोद्योगेषु च अत्यन्तं सहायकाः।
- **शारीरिक-मानसिकसन्तुलने** - योगः, ध्यानं, धनुर्विद्या, अस्त्रविद्या च अद्य योगविज्ञानम्, आत्मरक्षा, मानसिकसन्तुलनम् इत्यादिषु उपयोगिन्यः सन्ति।

चतुःषष्टिकलाः केवलं स्त्रीशिक्षायाः विलासो न, अपि तु व्यक्तित्वविकासाय, कौशलवर्धनाय, समाजविकासाय च परमोपयोगिन्यः आसन्। यदि एताः कलाः अद्यतनरूपेण पुनः व्यवस्थापयितुं शक्नुमः, तर्हि एताः भाविसन्ततीनां कृते

[17] कामसूत्रम्, विद्यासमुद्देशप्रकरणम् १.३.१५

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

मूल्यनिष्ठशिक्षायाः, रचनात्मकतायाः, कौशलविकासस्य च सशक्तमाध्यमाः स्युः ।

**भारतीयदर्शनसन्दर्भे चतुःषष्टिः कला:**

चतुःषष्टिकला: भारतीयसंस्कृतेः समृद्धिं दर्शयन्ति। एताः कलाः जीवनं सौदर्येण, कौशलेन ज्ञानेन च समृद्धं कर्तुं प्राचीनकाले विकसिताः आसन्। वात्स्यायनस्य "कामसूत्रे" आसां प्रामाणिकसूची प्राप्यते, या एकस्य सुसंस्कृतपुरुषस्य आवश्यकत्वं दर्शयति। शोधपत्रमिदम् आसां कलानाम् ऐतिहासिक-सन्दर्भ-सूची-महत्त्वैः सह भारतीयदर्शनसम्बद्धकलासु विस्तृतं चर्चां करोति।

भारतीयास्तिकदर्शनस्य षड् शाखाः सन्ति – न्यायः, वैशेषिकं, सांख्यं, योगः, मीमांसा, वेदान्तश्च। एतानि दर्शनानि सत्यस्य आत्मज्ञानस्य चान्वेषणे केन्द्रितानि सन्ति। चतुःषष्टिकलासु निम्नलिखिताः कलाः भारतीयदर्शने सह सम्बद्धाः भवितुं शक्नुवन्ति-

**१. तर्कविद्या (वादविवादकला)** - तर्कशास्त्रस्य उपयोगेन सत्यप्राप्तिः। आधुनिकतर्कशास्त्रे वादे चास्याः विद्यायाः प्रासङ्गिकता वर्तते। न्यायसूत्रे[18] "प्रमाणात् प्रमितिः" इति, अर्थात् प्रमाणेन सत्यज्ञानं[19] प्राप्यते। कलेयं न्यायदर्शनस्य अनुमानप्रमाणेन शब्दप्रमाणेन च सह सम्बद्धा वर्तते। वाद-विवादे तर्कनियमाः पालयितव्याः। यथा हेत्वाभासेभ्यः (तर्कदोषेभ्यः) रक्षणम् अस्याः कलायाः आधारोऽस्ति। तर्कः शङ्कानिवर्तको भवति।[20] प्राचीनभारते तक्षशिला-नालन्दाप्रभृतिषु विश्वविद्यालयेषु तर्कविद्यायाः अभ्यासो भवति स्म, यत्र दार्शनिकाः शास्त्रार्थं कुर्वन्ति स्म। प्राचीनभारते बौद्ध-वैदिकविदुषोर्मध्ये शास्त्रार्थः, अस्याः कलायाः प्रमाणं वर्तते।

**२. निरुक्तिः (शब्दव्युत्पत्तिः, अर्थावबोधश्च) –** इयं कला शब्दोत्पत्त्या, अर्थेन व्याख्यया च सह सम्बद्धा वर्तते।[21] इयं भाषायाः गभीराध्ययनस्य शब्दानां सम्यक्प्रयोगस्य च विषयं सुद्रढयति। न्यायदर्शने "शब्दप्रमाणं" ज्ञानस्य स्रोतो भवति। निरुक्तिः वैदिकशब्दानां व्याख्यायां सहायिका भवति, या यास्कस्य निरुक्तग्रन्थेन[22] सहापि सम्बद्धा अस्ति। न्यायसूत्रे[23] शब्दस्य शक्तिविषये चर्चा वर्तते। दर्शनशास्त्रे आत्मादिशब्दाः गहनविश्लेषणस्य विषयीभूताः सन्ति। तथा च धर्मः, कर्म प्रभृतिशब्दानां व्याख्या दर्शनेषु गभीरविश्लेषणस्य विषयीभूता वर्तते।

**३. प्रहेलिका –** इयं कला बौद्धिकचातुर्यं तार्किकक्षमतां च वर्धयति। प्रहेलिकया समस्योत्पादनं तत्समाधानं च मानवमस्तिष्कस्य कार्यक्षमतां वर्धयति। न्यायदर्शने अनुमानप्रमाणेन (तर्केण) सत्यस्यान्वेषणक्रमे अस्याः कलायाः सम्बन्धो वर्तते। प्रहेलिकाः तर्कस्य नियमानां सम्भावनानाञ्च विश्लेषणे आधारिताः भवन्ति। यथा भारतीयपरम्परायां "ब्रह्मोद्यम्"[24] (ऋग्वेदीयदर्शनप्रहेलिका) अस्याः प्रहेलिकायाः प्राचीनरूपमस्ति। वैशेषिकदर्शने[25]

---

[18] न्यायसूत्रम् १.१.१

[19] न्यायसूत्रम् ४.१.१

[20] न्यायसूत्रम् १.१.३२

[21] योगसूत्रम् ३.१७

[22] निरुक्तम् १.१

[23] न्यायसूत्रम् २.१.४९

[24] ऋग्वेदः १.१६४.४५ (एकं सद्विप्रा बहुधा वदन्ति – प्रहेलिकाया आधारः)

[25] वैशेषिकसूत्रम् - १.१.४ (धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां

द्रव्यगुणकर्मणां परिज्ञानमनया कलया सह सम्बद्धमस्ति।

**४. सम्पाठ्यम् (शास्त्राणामध्ययनम् पठनञ्च) –** इयं कला शास्त्राणामध्ययनेन, तेषां सम्यगुच्चारणेन सह सम्बद्धा अस्ति। न्यायदर्शने शब्दप्रमाणरूपे वेदादीनां[26] स्वीकारः कृतो वर्तते। कलेयं दार्शनिकग्रन्थान् अवबोद्धुं तेषां व्याख्यां कर्तुं च सहायिका भवति। न्याय-मीमांसा[27]दर्शनयोः अध्ययने कलेयं आवश्यकी भवति।[28] उपनिषदां पठनम्, ॐ शब्दस्य चोच्चारणम् अस्याः कलायाः भागाः भवन्ति।

**५. काव्यकृतिः (काव्यरचना) –** इयं कला कवितायाः साहित्यस्य च रचनायाः क्षमतां दर्शयति। अस्याः साक्षात् सम्बन्धः न्यायदर्शनेन सह नास्ति तथापि भारतीयदर्शने उपनिषद्[29] भगवद्गीता[30] च काव्यात्मकशैलीयुक्ते स्तः। इयं कला भावनात्मकस्य तार्किकाभिव्यक्तेश्च सन्तुलनं निर्माति। कालिदासस्य रचनायां दर्शनस्य काव्यस्य च मिश्रणं वर्तते। सांख्ययोगदर्शनयोरपि[31] काव्यम् आत्मचिन्तनं प्रेरयति। यथा आदिशङ्कराचार्यस्य "भज गोविन्दम्" प्रभृतिकाव्यं दर्शनकलयोः सङ्गमो भवति।

**६. निमित्तज्ञानम् (शकुनविचारः) –** इयं कला सङ्केतानां शकुनानां चाधारेण भविष्यकथनेन सह सम्बद्धा अस्ति। न्यायदर्शने कलेयं प्रत्यक्षानुमानाभ्यां पराऽस्ति, परं सांख्ययोगदर्शने कारणकार्यसिद्धान्तेन सह अस्याः कलायाः सम्बद्धोऽस्ति। योगदर्शने प्रज्ञया (अन्तर्ज्ञानेन) सह अस्याः कलायाः सम्बन्धो भवति।[32] कलेयं लोकपरम्परया सह अधिकसम्बद्धाऽस्ति, दर्शनेषु प्रकृतिसङ्केतानां व्याख्या प्रासङ्गिकी भवति। प्राचीनकाले शकुनविचारः दैनन्दिनजीवनस्य भागः आसीत्। योगदर्शने सिद्धयः (अन्तर्ज्ञानशक्तयः) अस्याः कलायाः सूक्ष्मरूपाणि भवन्ति।

**७. छन्दोज्ञानम् (छन्दश्शास्त्रम्) –** इयं कला काव्ये छन्दसां[33] नियमैः संरचनाभिश्च सम्बद्धा अस्ति। मीमांसा-वेदान्तदर्शनयोः वेदानां छन्दोबद्धस्वरूपस्य व्याख्या महत्त्वपूर्णा अस्ति। छन्दोज्ञानं वैदिकमन्त्राणां सम्यगुच्चारणे अर्थावबोधने च सहायकं भवति। यथा गायत्रीमन्त्रस्य छन्दः। वेदाद्यनुष्ठानाय मन्त्राणां यथोच्चारणं, मीमांसादर्शने महत्त्वपूर्णम्।

एतदतिरिच्य अन्याः कलाः अपि भारतीयदर्शनेषु सह सम्बद्धाः भवितुं शक्नुवन्ति। यासां चात्र विस्तृतभिया वर्णनं नोपस्थाप्यते। ताः कलाः इमाः सन्ति -

- **चित्रयोगाः –** विभिन्नौपनिषदिकयोगानाम् (मन्त्र-तन्त्र-औषधीनाम्) प्रयोगस्य ज्ञानम्।

---

साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्। - प्रहेलिका-दर्शनयोः सङ्गमः)

[26] ऋग्वेदः १०.७१.४

[27] मीमांसादर्शनम् १.१.५

[28] मीमांसासूत्रम् १.१.२ (चोदनालक्षणोऽर्थो धर्मः – सम्पाठ्य-दर्शनयोः संगमः)

[29] छान्दोग्योपनिषद् ६.१.३ (सर्वं खल्विदं ब्रह्म – काव्यकृतेः दार्शनिकाधारः)

[30] गीता २.५० (योगः कर्मसु कौशलम् - काव्यकृति-दर्शनयोः संगमः)

[31] सांख्यकारिका – ३ (मूलप्रकृतिरविकृतिः – निमित्तज्ञान-दर्शनयोः संगमः)

[32] योगसूत्रम् १.२ (योगश्चित्तवृत्तिनिरोधः- निमित्तज्ञान-दर्शनयोः संगमः)

[33] नाट्यशास्त्रम् ३३.१०

- **कौचुमारयोगाः** - औपनिषदिकवर्णितसौन्दर्यवृद्ध्यादीनां प्रयोगः ।
- **प्रतिमाला** - अन्त्याक्षरीप्रतियोगितायाः क्षमता ।
- **दुर्वाचकयोगाः** – कूटश्लोकानां प्रच्छनं, कथनं च ।
- **पुस्तकवाचकनम्** – पद्यस्य रसानुकूलं गायनम् ।
- **धारणमातृका** – स्मृतिवृद्धेः साधनानां ज्ञानम् ।
- **अभिधानकोशः** – शब्दकोशज्ञानं प्रयोगश्च ।

**सांस्कृतिकसामाजिकं च महत्वम्**

- **बौद्धिकविकासः** - तर्कविद्या, निरुक्तिः, सम्पाठ्यं चेत्यादिकलाः बुद्धिवर्धनाय उपयोगिन्यो भवन्ति ।
- **आध्यात्मिकप्रसारः** - काव्यकृतिः, छन्दोज्ञानं च सामान्यजनं दर्शनं प्रति आकर्षयति ।
- **सामाजिकैक्यता** - न्यायप्रणालीनिर्मितकलाः समवायबुद्धिं जनयन्ति। अर्थात् प्रस्तुति-तर्काभ्यामाधारिताः कलाः समाजम् एकीकुर्वन्ति ।

**आधुनिकप्रासङ्गिकता**

**तर्कविद्या** - आधुनिकतर्कशास्त्रे, न्यायविचारे उपयोगिनी ।

**निरुक्तिः, छन्दोज्ञानञ्च** - भाषाविज्ञाने, साहित्ये च प्रासङ्गिकम् ।

**सम्पाठ्यम्** - शास्त्रीयग्रन्थाध्ययने आवश्यकम् ।

चतुःषष्टिकला: भारतीयसंस्कृतेः गाम्भीर्यं, विविधतां च दर्शयन्ति । एतासु भारतीयदर्शनसम्बद्धाः कलाः – तर्कविद्या, निरुक्तिः, सम्पाठ्यं, काव्यकृतिः, प्रहेलिका, निमित्तज्ञानं, छन्दोज्ञानं च ज्ञानस्य, तर्कस्य, आत्मचिन्तनस्य च प्रमुखमार्गान् सूचयन्ति । एताः कलाः प्राचीनभारतस्य दार्शनिक-सांस्कृतिकयोः समृद्धेः प्रमाणानि सन्ति। आधुनिकयुगेऽपि आसां प्रासङ्गिकता अस्त्येव । आसां संरक्षणम् आधुनिकेऽपि समये अस्माकं ज्ञानविज्ञानवैभवं सुरक्षितं करिष्यति ।

**चतुःषष्टिकलायाः भारतीयदर्शनस्य सङ्गमः**

चतुःषष्टिकलाः भारतीयदर्शनं च परस्परपूरकौ स्तः। यथा सङ्गीतं नृत्यं च न केवलं कले स्तः, अपि तु योगेन ध्यानेन सहापि युक्ताः भवन्ति। नादयोगः सङ्गीतस्य माध्यमेन आत्मना सह सन्नादं साधयति। एवमेव, चित्रकला शिल्पकला च भारतीयदर्शनस्य सौन्दर्यशास्त्रेण सह युक्ते स्तः, यत्र प्रत्येकसृजनं विश्वैकतायाः प्रतीकं भवति ।

कामसूत्रे चतुःषष्टिकलानां वर्णनमस्ति, परम् अस्याः मूलं धर्मार्थकाममोक्षाख्य-भारतीयदर्शनस्य पुरुषार्थचतुष्टये निहितमस्ति। एतत् निरूपयति यत् एताः कलाः केवलं कौशलभूताः एव न, अपि तु जीवनस्य उद्देश्येन सहापि युक्ताः सन्ति। यथा आयुर्वेदः केवलं शारीरकस्वास्थ्यं यावत् सीमितं न भवति, आत्मनः मनसश्च सन्तुलनं निर्माति, यत् योगदर्शनस्याधारो भवति ।

**सामाजिकप्रभावः**

चतुःषष्टिकलाः भारतीयदर्शनं च भारतीयसमाजस्य सामाजिक-सांस्कृतिक-आध्यात्मिकस्वरूपाम् आकृतिं प्रयच्छन्ति। प्राचीनकाले गुरुकुलव्यवस्थायाम् एतासां कलानां शिक्षणं, दर्शनस्य अध्ययनं च सार्धमेव भवति स्म। एतेन व्यक्तेः समग्रविकासः, समृद्धसमाजस्य च निर्माणं भवति स्म ।

आधुनिककालेऽपि अनयोः सङ्गमः प्रासङ्गिको भवति। योग-आयुर्वेद-सङ्गीत-नृत्यादीनि विश्वस्तरे स्वीकृतानि सन्ति। भारतीयदर्शनस्य मूल्यानि (अहिंसा, सत्यं, धर्मः चेत्यादयः) आधुनिकनैतिकचिन्तनं प्रभावयन्ति। तथा च चतुःषष्टिकलानां शिक्षणम् आधुनिकशिक्षायां

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

समावेशेन व्यक्तीनां रचनात्मको भावनात्मकश्च विकासो भवति।

**उपसंहारः**

चतुःषष्टिकलाः भारतीयदर्शनं च भारतीयसंस्कृतेः द्वौ आधारस्तम्भौ स्तः। एतौ द्वौ ज्ञानस्य कौशलस्य च सङ्गमेन जीवनस्य समग्रविकासस्य मार्गं प्रशस्तं कुरुतः। चतुःषष्टिकलाः व्यक्तेः रचनात्मिकां व्यवहारिकीं च क्षमतां वर्धयन्ति, भारतीयदर्शनं च जीवनस्य गूढार्थम् उद्देश्यं च निरूपयति। अनयोः संयोजनं न केवलं भारतीयसंस्कृतेः विशिष्टतां प्रदर्शयति, अपि तु विश्वस्य कृते एकम् आदर्शमपि प्रस्तौति। अतः चतुःषष्टिकलाः भारतीयदर्शनं च ज्ञान-कौशलयोः उत्कृष्टोदाहरणानि सन्ति।

## सहायकग्रन्थसूची


- वात्स्यायनमुनिः। (२०१४)। *कामसूत्रम्*। द्विवेदी, पारसनाथः (सम्पा.)। वाराणसी : चौखम्बा सुरभारतीप्रकाशनम्।
- व्यासमुनिः। (२०२२)। *श्रीमद्भागवतमहापुराणम्*। पोद्दारः, हनुमानप्रसादः (सम्पा.)। गोरखपुरम् : गीताप्रेस्।
- व्यासमुनिः। (वि.सं.२०७६)। *श्रीविष्णुपुराणम्*। पोद्दारः, हनुमानप्रसादः (सम्पा.)। गोरखपुरम् : गीताप्रेस्।
- मनुः। (२०१०)। *मनुस्मृतिः*। कौण्डिन्यायनः, शिवराजः (सम्पा.)। वाराणसी : चौखम्बा विद्याभवनम्।
- भरतमुनिः। (२०१५)। *नाट्यशास्त्रम्*। शुक्ला, शास्त्री, बाबूलालः (सम्पा.)। वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।
- कालिदासः। (२०१५)। *अभिज्ञानशाकुन्तलम्*। त्रिपाठी, कृष्णमणिः (सम्पा.)। वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।
- कौटिल्यः। (२०१७)। *अर्थशास्त्रम्*। तिवारी, श्यामलेशकुमारः (सम्पा.)। वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।
- गौतममुनिः। (२०१३)। *न्यायसूत्रम्*। झा, महेशः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।
- पतञ्जलिः। (२०२०)। *योगसूत्रम्*। शास्त्री, राकेशः (सम्पा.)। दिल्ली : चौखम्बा ओरियन्टालिया।
- यास्कमुनिः। (२०१६)। *निरुक्तम्*। शास्त्री, ज्ञानप्रकाशः (सम्पा.)। दिल्ली : परिमल पब्लिकेशन्स।
- कणादमुनिः। (२०१२)। *वैशेषिक-दर्शनम्*। शर्मा, पवित्रकुमारः (सम्पा.)। जयपुरम् : हंसाप्रकाशनम्।
- जैमिनिः। (२०२१)। *मीमांसादर्शनम्*। पेन्ना, मधुसूदनः (सम्पा.)। दिल्ली : न्यू भारतीय बुक कॉर्पोरेशन।
- वेदव्यासः। (२०१८)। *श्रीमद्भगवद्गीता* (साधकसञ्जीवनी)। स्वामी रामसुखदासः (सम्पा.)। गोरखपुरम् : गीताप्रेस्।
- ईश्वरकृष्णः। (२००६)। *सांख्यकारिका*। शास्त्री, राकेशः (सम्पा.)। दिल्ली : परिमल पब्लिकेशन्स।
- (२००६)। *ऋग्वेदसंहिता*। कम्बोजः,.जियालालः (सम्पा.)। दिल्ली : विद्यानिधिप्रकाशनम्।
- शर्मा, विष्णुः। (२०२३)। *पञ्चतन्त्रम्* (सम्पूर्णम्)। बादरायणः (सम्पा.)। दिल्ली : वाणीप्रकाशनम्।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# अधिगीतं वैश्विकसमस्यायाः समाधानम्

**दयाराम-गौतमः**
**शोधच्छात्रः, संस्कृतविभागः, दिल्लीविश्वविद्यालयः**
**दिल्ली**

**प्रबन्धसारः**

गीता अर्जुनमुखेन सर्वेषां मानवानां कल्याणाय निगदिता ज्ञानविज्ञानकर्माकर्मभक्तिज्ञानविरागप्रवृत्तिनिवृत्तिदयाहिंसाद्यनेकगुणगणप्रचारणपरा महाभारतान्तर्हिता हिताहितबोधनतत्परा कार्ष्णीया वाङ्गतिमतामाश्रयास्पदीभूता सिद्धान्तानामनेकेषां प्रतिष्ठापयित्री प्रस्थानत्रयान्तर्भूता सर्वमतसम्मता सर्वसाहित्यानामादर्शभूता। अमुष्या गीताया: अध्ययनाध्यापनमनेकै: कालैर्न केवलं भारतवर्षे अपि तु विश्वस्मिन् विश्वे जायमानं वरीवर्ति। गीताया यथा पुराकल्पे सर्वविधविषयाणां विचारणावसरे महत्त्वमासीत्तथैवाधुनिकपरिप्रेक्ष्येऽपि सर्वेषु विषयेषु गीताया महत्त्वमस्ति। तथाभूता विषया नावशिष्यन्ते ये गीतायां न समादृता:। प्रकृतस्थले विचारस्य विषयो भवति गीतायां निहितानि सार्वभौमिकतत्त्वानि। समग्रेऽपि भूमण्डले येषां विषयाणामुपादेयत्वं विद्यते येषां विषयाणामपरिहार्यता विद्यते विश्वस्योन्नत्यै ते विषया: वैश्विकसमस्यायाः समाधानत्वेन निगद्यन्ते। अमी एव विषया: प्रकृतस्थले यथागीतं विशदीक्रियन्ते।

**कुञ्चीशब्दाः- गीता, वैश्विकसमस्या, समाधानं, श्रीकृष्णः, समत्त्वं चेत्यादयः।**

***********************************************************************

**विषयोपस्थापनम्**

समाधानतत्त्वेषु तानि तत्त्वान्यन्तर्भवन्ति यानि तत्त्वानि विश्वस्मिन् विश्वे सर्वेषां प्राणिनामण्डज-स्वेदजजरायुजोद्भिज्जानां कल्याणाय सुखाय महर्षिभिरुपदिष्टानि। प्राधान्येन मानव: सर्वेषु प्राणिषु श्रेष्ठा यथा बभाण धर्मधुर्यो मनु:-

**भूतानां प्राणिनः श्रेष्ठा: प्राणिनां बुद्धिजीविन:।**
**बुद्धिमत्सु नराः श्रेष्ठा:॥**[1]

अतो मानवस्य प्रवृत्त्या अन्ये शेषा: प्राणिन: स्वप्रवृत्तिं जनयन्तीति वस्तुस्थिति:। अतो मानवानां विकासेऽन्येषां प्राणिनां विकास:, मानवानां बुद्धिशुद्धावन्येषां प्राणिनां बुद्धिशुद्धिरक्षिलक्षीभवत्येव। अत: समेषां मानवानां कल्याणाय निगदितानि तत्त्वान्येव सार्वभौमिकतत्त्वानि भवन्तीति प्रसिद्ध्यति। सार्वभौमिकतत्त्वानि चेमानि न कथञ्चिदपि कालेन कवलीक्रियन्ते, दुष्टैश्च दुष्टायन्ते, दुर्मतिभि: कलुषायन्ते। अत इमानि तत्त्वानि त्रैकालिकानि समेषां हितवहान्यत: सर्वैरेव लोकै: समादरणीयानि भवन्ति। अनेके विषया: समाधानत्वेन परिगणिता दयाहिंसासर्वभूतसद्भावकर्मनिष्ठतामुमुक्षुत्वज्ञानार्जना-भिवादनकामक्रोधादिषड्वर्गत्यागादय:। अमी विषया: भगवद्गीतायां भगवता कृष्णेन लोकोपकारैकचक्षुषा यथास्थानं समुपबृंहिता:। ते च यथायथं यथागीतं यथामति विचार्यन्ते-

क. ज्ञानार्जनम्
ख. धैर्यम्
ग. कर्मनैष्ठ्यम्
घ. योग:

---

[1] मनुस्मृति १.९६

ङ. जितेन्द्रियत्वम्

च. स्वधर्मनिष्ठा

छ. समदर्शिता

ज. दिनचर्य्या

**ज्ञानार्जनम्-**

मानवानां प्रथमं कर्तव्यं भवति विद्याया अध्ययनम्। उपनिषदो भृशमस्माञ्ज्ञापयन्ति यद्विद्यया एव अमृतत्वस्य प्राप्तिर्भवति - विद्ययामृतमश्नुते। अथ च नीतिवचनान्यपि विद्यायै प्रतिपदं प्रेरयन्ति-

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं**
**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।**
**विद्या बन्धुजनो विदेशगमने विद्या परा देवता**
**विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः॥**[2]

विद्यया विना मानवः पशुतुल्यः कृत्याकृत्ययोर्ज्ञानेन विरहितो भवत्यमुना च कारणेन लोकः पीड्यते। अज्ञानी आत्मानन्तु पीडयत्येव साकमेवान्यानपि लोकान् पीडयतीति वस्तुस्थितिः। अतः विद्यायाः प्राप्तिर्मानवानां प्रथमं कर्तव्यं वर्तते। इयं च विद्या ज्ञानं, शिक्षा, अध्ययनम् इत्यादिभिः शब्दैर्विश्वैर्निगद्यते। गीतायां भगवता कृष्णेन ज्ञानार्जनाय साक्षादुपदेशः प्रदत्तोऽस्मभ्यम्। भगवान् कृष्णो बभाण ज्ञानेन तुल्यं पवित्रं न सकलेऽपि ब्रह्माण्डे कश्चित्पदार्थो वर्तते। अतो मानवेन ज्ञानार्जनं कर्तव्यम्। यथाह भगवान्

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।**[3]

ज्ञानार्जनाय प्रेरयन् वासुदेवो ज्ञानार्जनपद्धतिमप्युपदिदेश। यथोपदेशं मानवेन विद्यार्जनाय त्रयो विधयः समादरणीया भवन्ति। गुरूणां प्रसादप्राप्त्यै तेषां सम्यगादरो विद्यार्थिना विहितव्यः, विषयस्य सम्यग्ज्ञानाय गुरुः पुनः पुनरपि प्रष्टव्यः, गुरूणां समग्रं ज्ञानमाविष्कर्त्तुन्तेषां शुश्रूषा। त्रयोऽपि विधयोऽस्माभिराचर्य्यन्ते चेत् प्रसन्नमना आचार्यः समग्रमपि ज्ञानमस्मभ्यं हितवहं प्रकटीकरोति। अद्यत्वे एतेषां विधीनां शैक्षणिकसंस्थानेष्वभावोऽभिलक्ष्यते येन कारणेन गुरुबुद्धौ निहितं समग्रं ज्ञानमवाप्तुं शिष्याः न शक्नुवन्ति तथा च शिष्येषु आचार्यं प्रति आदरभावो न लक्ष्यते। अतो गीतोक्तविधिना ज्ञानार्जने गुरूणां शिष्याणामुभयोर्हितं सन्निहितं वर्तते।

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥**[4]

शिक्षाग्रहणविधिमुपदिश्य भगवता ये ज्ञानवन्तस्तेऽमी मम प्रिया इत्युक्त्वा ज्ञानार्जनाय मानवा भृशं प्रेरिताः। शिक्षाभावे मानवो दुर्बलो भवति, आत्मनिर्भरो न भवति, आजीविकाविहीनो भवति, सत्यासत्ययोर्ज्ञानविरहितो भवति, अतो मानवेन विद्याध्ययनाय प्रयत्नो विधेयः। यतः एकोऽपि शिक्षितो मानवो न केवलं स्वकुटुम्बस्यापि तु समग्रस्य राष्ट्रस्य गौरवो भवति। उदाहरणाय अनेके सन्ति तथाभूता ये राष्ट्रस्य गौरवा राष्ट्रे विदेशे वा ससम्मानं राजन्तेतमाम्। अतो भगवान् मानवकल्याणाय ज्ञानं प्रति मानवान् निनयिषुः प्रेष्ठत्वं ज्ञानिनां समाम्नातमासीत्।

**तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।**
**प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥**[5]

सर्वास्वपि भक्तिषु सतीषु ज्ञानेन विना न कापि भक्तिः श्रेष्ठतमेत्यमुना कार्ष्णीयेन वचसैतत् प्रसिद्ध्यति तन्मानवेन ज्ञानार्जनं कर्तव्यमिति। इदञ्च ज्ञानार्जनं

---

[2] नीतिशतकम् १६

[3] श्रीमद्भगवद्गीता ४.३८

[4] श्रीमद्भगवद्गीता ४.३४

[5] श्रीमद्भगवद्गीता ७.१७

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

विश्वस्मिन् विश्वे कल्याणाधायकं वर्तते इति दिशा सार्वभौमिकतत्त्वेषु परिगण्यते।

**धैर्यम्**-

धैर्यस्य मानवजीवने सर्वत्रापि महत्त्वपूर्णं स्थानं वर्तते। धैर्य्येण हीनो मानवः विश्वस्मिन् विश्वे यत्र कुत्रापि स्यात् स दुःखी भवत्येव। कृष्णेन भगवता द्वितीयाध्याये विषयोऽयं स्पष्टीकृतः यन्मानवेन सर्वथैव धैर्येण भाव्यम्। सुखदुःखे उभे अपि यथाकर्म मानवजीवने आपतत एव अतो मानवेन दुःखे वा सुखे वा समानतया धैर्येण भाव्यम्। धैर्य्याभावे मानवः शोकातुरो भवति तथा च शोकाधिक्याद् आत्महत्यादीनि कर्म्माण्याचरतीति वस्तुस्थितिः। अतः समाजे आत्महत्यादीनि कृत्यानि न स्युरेतदर्थं भगवता धैर्यस्योपदेशो विहितः। कार्ष्णीयं वचो यथा-

**यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।**
**समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥**[6]

लाभे, हानौ, जये, पराजये वा समानबुद्ध्या धैर्येण वा यः तिष्ठति स एष पुरुषो विश्वस्मिन् विश्वे प्रसन्नो भवति वीतशोको भवत्यतः मानवेन जीवनयुद्धे धैर्येण भाव्यमित्युपदेशः कार्ष्णीयो भवति।

**सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।**
**ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥**[7]

धैर्यस्य अभावे मानवः कर्मफलेन प्रभावितः सन् कामनया प्रभावितो भवति। अनया च कामनया क्रोधस्योत्पत्तिर्भवति। क्रोधश्चासौ मानवीयबुद्धौ विकारमुत्पादयत्यनेन च मानवः स्वस्य परस्य च हानिं कर्त्तुं शक्नोति।

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥**[8]

क्रोधे समुत्थिते सति मानवः कृत्याकृत्ययोर्ज्ञानेन रहितो भवति। अनेन च मूढभावेन मानवस्य स्मृतिर्विनश्यति स्मृतेर्नाशेन च बुद्धेर्विनाशो भवति बुद्धिनाशेन च मानवस्य समूलं नाशो भवति। अनेन प्रकारेण समग्रस्यापि नाशस्य कारणं धैर्यस्याभावो भवतीति कार्ष्णीयं वचो भवति।

**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥**[9]

धैर्यस्य सार्वभौमिकं महत्त्वं विद्यते यतो धैर्य्येण रहितो मानवो विषमपरिस्थितौ परस्य स्वस्य वा हानिं कर्त्तुं प्रवृत्तो भवति, क्वचिन्नाशायापि कारणभूतो भवति। अतः सर्वस्मिन्नपि देशे अस्य तत्त्वस्याधुनिकपरिप्रेक्ष्ये अतितरां महत्त्वं विद्यते यस्योपदेशो गीतायां निहितो विद्यते।

**कर्मनैष्ठ्यम्**

कर्मनिष्ठः समाज एव राष्ट्रस्योन्नतेः कारणम्भवत्यतो भगवता कृष्णेन कर्मण उपदेशः प्रदत्तोऽस्मभ्यम्। भगवता साक्षादिदमपि सङ्केतितं यन्मानवः फलस्य चिन्तां विहाय प्राथम्येन कर्मणि प्रवृत्तो भवेद्यतः फलस्य चिन्तायां सत्यां कर्म क्वचित्तादृशं सुष्ठुतरं न सम्पद्यते इत्यप्याधुनिकपरिप्रेक्ष्येऽक्षिलक्ष्यीभवति। द्वितीयाध्याये भगवतासावेव विषयो विशदीकृतो विद्यते यन्मानवेन कर्मणि एव अधिकारो ममेति मत्त्वा कर्माणि कर्त्तव्यानि यतः कर्मणः फलं मानवाधीनं न भवति। कार्ष्णीयं वचो यथा-

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**

[6] श्रीमद्भगवद्गीता २.१५

[7] श्रीमद्भगवद्गीता २.३८

[8] श्रीमद्भगवद्गीता २.६२

[9] श्रीमद्भगवद्गीता २.६३

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्म्मणि ॥**[10]

आधुनिकपरिप्रेक्ष्ये मानवा: कर्मणि प्रवृत्तिं पश्चात् फले प्रवृत्तिं पूर्वं व्यक्तीकुर्वतेऽत: आधुनिकानामस्मादृशानामयमुपदेशो लाभप्रदो वर्तते। आदावेव फलस्य चिन्तनेन पश्चात् फलस्य न्यौन्यमवलोक्य शोको भवत्यत: कृष्णस्येदं वच आधुनिकपरिप्रेक्ष्ये महत्त्वपूर्णं वर्तते। कर्मणोत्पद्यमानं फलं प्रति मोहो भवति, तस्य मोहस्य नाशे सति शोक उत्पद्यतेऽत आधुनिका युवान: हतोत्साहा भवन्त्यतो मानवै: फलचिन्तां विहाय कर्म कर्त्तव्यम् इत्युपदेश आधुनिकपरिप्रेक्ष्ये सफलीभवति।

**कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिण:।**
**जन्मबन्धविनिर्मुक्ता: पदं गच्छन्त्यनामयम् ॥**[11]

मानवेन निरन्तरं स्वकर्मणां सम्पादनं कर्तव्यं यत: कर्मणि अप्रवृत्तेरपेक्षया कर्मणि प्रवृत्ति: श्रेयस्करी विद्यते। कर्मविरहितं मानवशरीरं कदाचिदपि यशसे न भवत्यत: मानवशरीरे यावत्कालं प्राणा: सन्ति तावत् कालं कर्मणि प्रवृत्ति: स्यादित्युपदेशः गीतायां विद्यते।

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मण:।**
**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मण: ॥**[12]

भगवता चतुर्थाध्याये उपदिष्टं मानवेन कस्मिन्नपि कर्मणि प्रवृत्तेः प्राक्कर्म्मणो विचिकित्सा कर्तव्या। मानवेन ध्येयं भवति वास्तविकं कर्म किं वर्तते, किञ्चाकर्तव्यं कर्म वर्तते, किञ्च विशिष्टं कर्म वर्तते एवम्प्रकारेण सम्यक्कर्मणो विचिकीत्सया मानव: कर्मणो गभीरां गतिं जानाति तथा च कर्मणि विकर्म्मणि च प्रवृत्तो भवतत्यकर्माणि जहाति।

**कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मण:।**
**अकर्मणश्च बोद्धव्यं गहना कर्मणो गति: ॥**[13]

इत्येवम्प्रकारेण सार्वभौमिकतत्त्वेष्विदमपि कर्मनैष्ठ्यमन्तर्भवति। अमुना कर्मनैष्ठ्येन च सार्वभौमिकोन्नतिर्भवतीति धिया कृष्णेनास्य तत्त्वस्योपदेशो विहित:।

**योग**:

योगस्योपदेशो गीतायां विशदतया वर्तते। सर्वेषां मानवाय मानसिकबौद्धिकशारीरिकबलवृद्ध्यै योगस्य अत्यन्तं महत्त्वपूर्णं स्थानं वर्तते। अद्य समग्रैर्विश्वैरेव योगस्य अपरिहार्यतामधिगम्य जूनमासस्य एकविंशे दिनाङ्के अन्ताराष्ट्रिययोगदिवस आचर्य्यते। अस्य च योगस्य विस्तार: गीतायां द्रष्टुं शक्यते। समताया: प्रतीकोऽयं योग: प्रकृतस्थले गीतायां दृश्यते। भगवता आसक्तिरहितस्य कर्मण: प्रतिपादनं कर्त्तव्यमित्युपदेशो विहित:। अद: कर्म च योगे स्थित्वैव कर्त्तव्यमित्यप्युपदेशो विहितः कृष्णेन। योगेन परस्परं समत्त्वं जागर्तीत्यपि उपदेशोऽत्र समाम्नातो वर्तते। अद्यत्वे परस्परं समताया अभावात्समाजे भेदबुद्धिर्वर्तते तस्य दूरीकरणं योगादेवसम्भवतीत्यस्याप्युपदेशः समुपबृंहितो वर्तते। कार्ष्णीयं वचो यथा-

**योगस्थ: कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्यो: समो भूत्वा समत्वं योग उच्यते ॥**[14]

योग: सर्वेषु कर्मसु श्रेष्ठतरं कर्म वर्तते यतः कर्मसु नैपुण्यममुना योगेनैवोपलभ्यते। पुण्यापुण्ये कर्मणी विरहय्य मानवेन योगः कर्तव्यः। योगेन मानसिकदुःखं, शारीरिकदुःखं, बौद्धिकदुःखं चापाकर्तुं शक्यते। आधुनिकपरिप्रेक्ष्ये सर्वेऽपि जनाः प्रायेण

[10] श्रीमद्भगवद्गीता २.४७

[11] श्रीमद्भगवद्गीता २.५१

[12] श्रीमद्भगवद्गीता ३.८

[13] श्रीमद्भगवद्गीता ४.१७

[14] श्रीमद्भगवद्गीता २.४८

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

त्रिभिरेव दु:खैर्दु:खिता दरीदृश्यन्ते तेषां दु:खमपहर्त्तुं योग: कारणत्वमावहति यस्योपदेश: गीतायां समाम्नातो वर्तते। कार्ष्णीया वाग् यथा-

**बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।**
**तस्माद्योगाय युज्यस्व योग: कर्मसु कौशलम्॥**[15]

**जितेन्द्रियत्वम्**

इन्द्रियाणि यस्य वशे न सन्ति तादृशो मानव: समाजे बलात्कारादीनि कर्म्माणि कुरुते। अनेन च समग्रमपि विश्वं भीतियुक्तं भवति। अत आधुनिकपरिप्रेक्ष्ये विश्वस्मिन् व्याप्तस्य बलात्काराख्यस्य दुर्गुणस्य नाशाय जितेन्द्रियता अपरिहार्या भवति। जितेन्द्रियस्य मानवस्य बुद्धि: स्थिरीभवतीत्यपि भगवता निर्दिष्ट:। अत: बुद्धे: स्थिरतायै जितेन्द्रियत्वमपेक्षते। कार्ष्णीयं वचो यथा-

**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥**[16]

जितेन्द्रियत्वमपि गुणो वर्तते यस्यावश्यकता समग्रस्यापि विश्वस्योन्नत्यै विद्यतेऽतः सार्वभौमिकतत्त्वेष्वन्तर्भवति।

**स्वधर्मनिष्ठा**

आधुनिकपरिप्रेक्ष्ये धर्मपरिवर्तनेन धर्मस्य नाम्ना चानेकानि पापकर्म्माणि सम्पद्यमानानि समग्रेऽपि विश्वे सन्ति। स्वस्य धर्मं परित्यज्य वित्तलोभादन्येन वा लोभेनान्यस्य धर्मे प्रवृत्ति: समाजस्य राष्ट्रस्य, समग्रस्य वा विश्वस्य कल्याणाय न भवति। अतो भगवता कृष्णेन निर्दिष्टं- यतो हि परस्य धर्मे अनेके गुणा: स्यु:, गुणवान् परस्य धर्मोऽभिलक्ष्येत परं तत्र सुखमस्तीति मत्वा बुद्धिमता तत्र न गन्तव्यम्। यत: स्वधर्मे मरणं श्रेयसे कल्पते परस्य धर्मे रमणादिति। कार्ष्णीयं वचो यथा-

**श्रेयान्स्वधर्मो विगुण: परधर्मात्स्वनुष्ठितात्।**
**स्वधर्मे निधनं श्रेय: परधर्मो भयावह:॥**[17]

अतो मानवेन स्वधर्मस्यैवाश्रयः स्वीकर्तव्यः। अनेन प्रकारेण चाधुनिकपरिप्रेक्ष्ये धर्मपरिवर्तनजन्यानां दोषाणां नाशो भवति तथा वास्तविकधर्मस्य संरक्षणं भवति तथा च धर्मजन्या हिंसा न भवन्ति। अतोऽस्य तत्त्वस्य सार्वभौमिकतत्त्वेषु परिगणना भवति।

**समदर्शिता**

सर्वेष्वपि भूतेषु समत्वभावनया स्थिति: विश्वस्य कल्याणाय भवति। आधुनिकपरिप्रेक्ष्ये वयमनेकान् भेदानवलोकयितुमनुभवितुं वा शक्नुमः। एतेषां भेदानां दूरीकरणं तदैव सम्भवति यदा सर्वेष्वपि प्राणिषु भेदबुद्धिः या स्थिता वर्तते तस्या नाशो भवेत्तथा च मानवाः समदर्शिनः सन्त: मैत्रीभावेन जीवनयापनं कुर्युः। एतदर्थञ्चोपदेशः गीतायां भगवता कृता। वार्ष्णेय उपदिशति ज्ञानिनो मानवाः उच्चवर्गे, नीचवर्गे, पशौ, पक्षिणि वा भेदं न कुर्वते सर्वेषु एकमेव आत्मतत्त्वं पश्यन्ति।

**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**
**शुनि चैव श्वपाके च पण्डिता: समदर्शिन:॥**[18]

परमात्मापि प्राणिनां मित्रं वर्तते सर्वेऽपि प्राणिन: परमात्मन: सुहृदो वर्तन्ते इति मत्वा मानवेन सर्वान् मानवान् प्रति समत्वेन भाव्यम्।

**भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।**
**सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥**[19]

---

[15] श्रीमद्भगवद्गीता २.५०

[16] श्रीमद्भगवद्गीता २.५८

[17] श्रीमद्भगवद्गीता ३.३५

[18] श्रीमद्भगवद्गीता ५.१८

[19] श्रीमद्भगवद्गीता ५.२९

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

भगवान् प्रतिपादयति मित्रेषु, अरिषु, उदासीनेषु, मध्यस्थेषु, द्वेष्येषु, बन्धुगणेषु, धर्मनिष्ठेषु, पापिषु वा समानतया व्यवहारः कर्तव्यः। यदि सर्वेषु मानवेषु समानतया व्यवहारः क्रियते तदा स मानवः श्रेष्ठो भवतीति कार्ष्णीयं वचो भवति।

**सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु।**
**साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते॥[20]**

मानापमानयो: शत्रुमित्रयो: शीतोष्णयो: सुखदु:खयोर्यः समत्वं द्रष्टुं शक्नोति यश्च समत्वेनैतान् सर्वान् पदार्थान् पश्यति स एव श्रेष्ठः समाजे, प्रेष्ठश्च भगवतो निगद्यते।

**सम: शत्रौ च मित्रे च तथा मानापमानयोः।**
**शीतोष्णसुखदु:खेषु समः सङ्गविवर्जित:॥[21]**

सर्वेष्वपि प्राणिषु परमात्मानं तथा च परमात्मनि प्राणिनं य द्रष्टुं शक्नोत्याहोस्विद् य: पश्यति स समदर्शी वर्तते तथा चायं श्रेष्ठतरो मानवो निगद्यते।

**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।**
**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शन:॥[22]**

सर्वेऽपि मानवा: परमात्मनोंऽशा:, यस्य कस्यापि यथोचितमादरेण परमात्मन आदरो भवतीति विश्वस्य य सर्वेषामादरं विदधाति एवम्प्रकारको मानवो योगी भवति तथा च एतादृग्योगी परमात्मन: सन्निधिमेत्य परमं सुखमवाप्नोति।

**सर्वभूतस्थितं यो मां भजत्येकत्वमास्थित:।**
**सर्वथा वर्त्तमानोपि स योगी मयि वर्तते॥[23]**

भगवान् उपदिदेश सर्वेषु भूतेषु समानरूपेणाहं स्थितो वर्ते, कस्मिंश्चिन्न्यूनतया कस्मिंश्चिच्च आधिक्येन नाहं स्थित:, मत्कृते कोऽपि अत्यन्तं प्रियो द्वेष्यो वा नास्ति। अतो मानवेनेदं रहस्यं ज्ञात्वा समे समाना इति भावनया समदर्शित्वेन भाव्यमित्युपदेशोऽत्र समाम्नातो वर्तते।

**समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रिय:॥[24]**

य: कमपि प्राणिनं नोद्वेजयति प्राणिनां कृत्यैश्च यो नोद्विजते एवम्प्रकारक: समानबुद्धि:, हर्षशोकादिभि: शून्य: कृष्णस्य प्रिय इत्युक्त्वा वार्ष्णेयेन समदर्शिनो मानवस्य प्रशंसा विहिता। प्रशंसामुखेन चैतदपि सङ्केतितं यन्मानवै: कस्याप्युद्वेजकं कर्म न कर्तव्यं सर्वत्र समानतया दृष्टिर्भवेत्।

**यस्मान्नो द्विजते लोको लोकान्नो द्विजते च यः।**
**हर्षाहर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥[25]**

अनेन च समदर्शित्वेन समग्रे भूमण्डले भेदभावस्य नाशो भवति तथा च आतङ्कवाद:, वर्णविभेद:, वर्णविभेदजन्यहिंसादीनि कर्म्माणि विनाशं यान्ति यस्योपदेश: गीतायां निहितो वर्तते।

**दिनचर्य्या**

भगवता त्रयोदशेऽध्याये सार्वभौमिक्या दिनचर्य्याया उपदेशोऽपि विहितो वर्तते। अनया दिनचर्यया युतो मानव: विश्वस्मिन् विश्वे यत्र कुत्राप्यात्मानं व्यापारयन् स्यात् स स्वस्थ: सुखी प्रसन्न: सर्वेषां प्रियो भवति। अनेनैव साकं सहायतायै सदोद्यत: परार्थी चैतादृङ्मानवो भवति। अस्माभिर्यत्किञ्चिदस्माकं पार्श्वे विद्यते तत्सर्वं प्रकृतेर्भगवतो वेति विचिन्त्य तस्याभिमानं न कर्तव्यम्। सर्वेऽपि प्राणिन: भगवतोंऽशा इति विचिन्त्य सर्वेषु प्राणिषु आत्मानमवलोक्य दम्भस्य उच्चनीचयोस्त्याग: कर्तव्य:। कोऽपि प्राणी अस्माकं

[20] श्रीमद्भगवद्गीता ६.९
[21] श्रीमद्भगवद्गीता १२.१८
[22] श्रीमद्भगवद्गीता ६.२९
[23] श्रीमद्भगवद्गीता ६.३१
[24] श्रीमद्भगवद्गीता ९.२९
[25] श्रीमद्भगवद्गीता १२.१५

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

हिंसायै नास्ति सर्वेऽपि समाना इति विचिन्त्य कस्यापि प्राणिनो हिंसा न कर्त्तव्या। यः बले, धने, पराक्रमे अस्माभिर्न्यूनः स्यात्स यदि दोषाचरणं कुर्यादस्माकं हानिं कुर्यात्तदा तस्य दौर्बल्यमाकलय्य क्षमादानेन स अनुगृहीतव्यः। गुरुभिः साकं नूतनज्ञानाय प्रयत्नः कर्तव्यस्तदर्थञ्च गुरुः सेवनीयो, गुरोरादर आचरणीयः। सदा प्रातः उत्थाय शरीरशुद्धिः, अन्तःकरणशुद्धिः, मनश्शुद्धिः, वाक्शुद्धिर्यतः स्यात्तथाविधोपासनाविधिरनुष्ठेयः। इन्द्रियाणां स्थिरतायै योगाचरणं कर्तव्यम्। कार्ष्णीयं वचो यथा-

**अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।**
**आचार्य्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥**[26]

इत्येम्प्रकारेण दिनचर्य्याचर्य्यते चेन्न केवलं समाजस्यापि तु सार्वभौमिकोन्नतिः सम्भवति इत्यतोऽस्माभिः सर्वैर्गीतोक्तदिनचर्याया आचरणं प्रतिदिनं कर्तव्यम्।

**उपसंहृतिः**

गीतायां निहितानाममीषां समाधानतत्त्वानाम् अनुष्ठानेन निश्चयं मानवसमाजः समग्रस्यापि भूमण्डलस्य सर्वविधामुन्नतिं कर्तुं समर्थो भवति। अमीषां तत्त्वानां सम्यगनुष्ठानं आबालाद्वृद्धं यावद्यदि समेऽपि प्राणिनः कुर्युस्तदा समाजे व्याप्ता दोषाः बलात्कारातङ्कवादवर्णविभेदजातिविभेदभ्रष्टाचारराष्ट्र-द्रोहस्तेयपरस्त्रीगमनमद्यपानधूम्रपानासत्यभाषणादयः समाप्तिं यायुः। आदर्शविश्वस्य स्थापनायै तत्त्वान्यमूनि सर्वैरेवादर्त्तव्यान्याचरणीयानि च भवन्ति यतः समग्रमपि विश्वं दुःखानि विहाय पम्फुल्येत।

## सहायकग्रन्थसूची


- श्रीमद्भगवद्गीता (शाङ्करभाष्यसहिता), भाष्यकारः आदिशङ्कराचार्य, सम्पादकः पं. वासुदेवशास्त्री अभ्यंकर, प्रकाशकः चौखम्बा संस्कृत सीरीज़, स्थानम् वाराणसी, वर्षम् २००५
- श्रीमद्भगवद्गीता (श्रीरामानुजभाष्यसहिता), भाष्यकारः श्रीरामानुजाचार्य, सम्पादकः पं. के. एस. वरदाचार्य, प्रकाशकः आन्ध्र विश्वविद्यालय, स्थानम् विशाखापट्टनम्, वर्षम् १९९८
- श्रीमद्भगवद्गीता (माध्वभाष्यसहिता), भाष्यकारः मध्वाचार्य, सम्पादकः पं. के. टी. पाण्डुरंगाचार्य, प्रकाशकः द्वैत वेदान्त अध्ययन केन्द्र, स्थानम् उडुपी, वर्षम् २००१
- श्रीमद्भगवद्गीता (श्रीधरस्वामिभाष्यसहिता), भाष्यकारः श्रीधरस्वामी, सम्पादकः पं. नारायणदत्त शास्त्री, प्रकाशकः चौखम्बा, स्थानम् वाराणसी, वर्षम् १९९६
- श्रीमद्भगवद्गीता (आनन्दगिरिटीकासहिता), टीकाकारः आनन्दगिरि, सम्पादकः पं. गोविन्दशास्त्री, प्रकाशकः चौखम्बा, स्थानम् वाराणसी, वर्षम् २००८
- भगवद्गीता (नीलकण्ठटीकासहिता), टीकाकारः नीलकण्ठ, सम्पादकः पं. रामशास्त्री, प्रकाशकः निर्णयसागर प्रेस, स्थानम् मुम्बई, वर्षम् १९१२
- गीता-धर्मार्थ-प्रकाश, लेखकः माधुसूदन सरस्वती, सम्पादकः पं. शिवरामशास्त्री, प्रकाशकः चौखम्बा, स्थानम् वाराणसी, वर्षम् २००३
- गीता-तात्पर्य-चन्द्रिका, लेखकः वेदान्तदेशिक, सम्पादकः पं. एन. एस. अनन्ताचार्य, प्रकाशकः


[26] श्रीमद्भगवद्गीता १३.८

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

श्री वैष्णव ग्रन्थमाला, स्थानम् श्रीरंगम्, वर्षम् १९९४

- गीता-संग्रह, सम्पादक: पं. युधिष्ठिर मीमांसक, प्रकाशक: गीता प्रेस, स्थानम् गोरखपुर, वर्षम् १९७८
- गीता-शान्तिदर्शन, लेखक: पं. राधाकृष्ण शास्त्री, प्रकाशक: संस्कृत भारती, स्थानम् दिल्ली, वर्षम् २०१०
- नीतिशतकम्, सम्पादकः तारिणीश झा, प्रकाशकः रामनारायणलाल विजयकुमार, कटरा रोड, इलाहावाद, वर्षम् १९९८
- मनुस्मृति, सम्पादकः प. तुलसीराम स्वामी, प्रकाशकः प. छुट्टनलाल स्वामी, स्थानः मेरठ, वर्षम् १९९६

**आङ्ग्लग्रन्थाः**

- Bhagavad Gita As It Is, Translator: A. C. Bhaktivedanta Swami Prabhupada, Publisher: Bhaktivedanta Book Trust, Place: Los Angeles, Year: 1983
- God Talks with Arjuna, Author: Paramahansa Yogananda, Publisher: Self-Realization Fellowship, Place: Los Angeles, Year: 1995
- The Bhagavad Gita, Translator: S. Radhakrishnan, Publisher: George Allen & Unwin, Place: London, Year: 1948
- The Song Celestial, Translator: Sir Edwin Arnold, Publisher: Trübner & Co., Place: London, Year: 1885
- Essence of the Bhagavad Gita, Author: Eknath Easwaran, Publisher: Nilgiri Press, Place: California, Year: 1985
- The Living Gita, Author: Swami Satchidananda, Publisher: Integral Yoga Publications, Place: New York, Year: 1988
- Bhagavad Gita and World Peace, Author: R. N. Dandekar, Publisher: BORI, Place: Pune, Year: 1971
- The Bhagavad Gita and Modern Life, Author: Sri Aurobindo, Publisher: Sri Aurobindo Ashram, Place: Pondicherry, Year: 1950
- Paths to God: Living the Bhagavad Gita, Author: Ram Dass, Publisher: Harmony Books, Place: New York, Year: 2004
- The Bhagavad Gita: A New Translation, Translator: Graham M. Schweig, Publisher: HarperOne, Place: New York, Year: 2007

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# लिङ्गवैषम्येन दत्तकप्रथा नवजागरणञ्च

**सरस्वती-अधिकारी**
**शोधच्छात्रा, संस्कृतविभागः, सबं-सजनीकान्तमहाविद्यालयः**
**पश्चिमबङ्गः**

**प्रबन्धसारः**

*अयं शोधलेखः भारतीयधर्मशास्त्रपरम्परायां दत्तकप्रथायाः सन्दर्भे लिङ्गवैषम्यसमस्यां विवेचयति। प्राचीनधर्मशास्त्रेषु पुत्रस्य धार्मिक-सामाजिकमहत्त्वं विशेषतया प्रतिपादितम् अस्ति। पिण्डोदकक्रियाः, श्राद्धकर्माणि, लोकपरम्परायाश्च संरक्षणम् इत्यादीनां कर्तृत्वं प्रायः पुत्रे एव निहितं मन्यते स्म। अतः औरसपुत्राभावे दत्तकपुत्रस्य विधानं स्वीकृतं, किन्तु दत्तककन्यायाः तथा स्त्रीणां दत्तकग्रहणाधिकारस्य विषये सन्देहः जातः।*

*अत्र मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, वसिष्ठधर्मसूत्रं, वेदाः, उपनिषदः, पुराणानि च आधारीकृत्य दर्शितं यत् वैदिककाले स्त्री धर्मे, यज्ञे, व्रते च समानाधिकारिणी आसीत्। नारी शक्तिरूपेण पूजिता, यज्ञकर्मणाम् अनिवार्याङ्गरूपा च मन्यते स्म। यदा धर्मः सर्वजनहिताय मोक्षप्राप्तये च भवति, तदा तत्र लिङ्गभेदेन निषेधः अयुक्तः इति लेखे प्रतिपादितम्।*

*अद्यतनसमाजे दत्तकप्रथायां स्त्रीणां तथा दत्तककन्यायाः अधिकारविषये पुनर्विचारस्य आवश्यकता सूच्यते। शास्त्रीयदृष्ट्या सम्यगालोचनेन तथा आधुनिकसामाजिकचिन्तनेन दत्तकप्रथायाः समतामूलकं,न्याययुक्तं च स्वरूपं निर्मेयम् इति निष्कर्षः प्रस्तूयते।*

**कुञ्चीशब्दाः - लिङ्गवैष्यम्यम् , दत्तकप्रथा, दत्तककन्याधिकारः, धर्मशास्त्रपरम्परा, नारीसमानाधिकारः चेत्यादयः।**

*************************************************************************

**प्रस्तावना**

देशोऽयं धर्मप्रधानो धर्माविरोधेनैव राजनीतिं व्यवहारञ्च स्वीकरोति। तत्र धर्मशास्त्रमेव स्मृतिशब्देन व्यवह्रियते 'धर्मशास्त्रं तु वै स्मृति'रिति। आचारो व्यवहारः प्रायश्चित्तं चेति त्रयो हि धर्मशास्त्रस्य विषयाः। तत्रापि व्यवहारो मध्यमणिन्यायेनावतिष्ठते। अतएव याज्ञवल्क्येन तत्स्मृतौ आचार-व्यवहार-प्रायश्चित्तरूपविषयभेदेन अध्यायत्रयं निबद्धम्। मानवे धर्मशास्त्रे द्वादशभिरध्यायैः एते विषयाः सुविशदं प्रतिपादिताः। व्यवहारेऽपि अष्टादशपदानि प्रसिद्धानि। तेषु दायभागोऽन्यतमः। तत्रौरसपुत्राभावे दत्तकविधिः विचार्य्यते। परन्तु तत्र केवलं दत्तकपुत्रः कः? कीदृशः? कथञ्च ग्राह्य इति निरूपणीयम्। अधुना दत्तकग्रहणे कोऽधिकारी? केन दत्तको देयः? को वा दत्तको भवितुमर्हति? अतः दत्तकदुहितुः क्षेत्रजादिदुहितुश्च अधिकारविषये विषयानुकुलं तत्तन्महर्षीणां वचनान्युदाहृत्य यथायथमत्र प्रतिपादितम्।

**भावनायाः उत्सः**

'पुत्रेण लोकाञ्जयति' इत्यादिविधौ 'नापुत्रस्य लोकोऽस्ति' इत्यादि अर्थवादोऽनुगृहीत। अतः लोकपुत्रयोः साध्यसाधनभावस्य निर्वाहः, अवान्तरव्यापारभूतक्रियापेक्षायां पिण्डोदकक्रियाहेतोरित्युच्यते।[1] तस्मात् पुत्रकृत्-क्रियायां लोकविशेषसिद्धेः पुत्रप्रतिनिधित्वम् आवश्यकम् इति भाष्यकृता मेधातिथिना उक्तम्। तत्र च औरसपुत्रः

---

[1] अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिः सदा। (अत्रिवचनम्, दत्त.मी, पृष्ठाङ्कः 3)
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात्प्रयत्नतः॥

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

भूयांसमुपकर्तुं शक्नोति न तथा इतर इति। ततश्च येन केनापि प्रयत्नेन पुत्रप्रतिनिधिः कार्यः।

मनुसंहितायां प्राप्यते-

क्षेत्रभूता स्मृता नारी बीजभूता स्मृतः पुमान्।
क्षेत्रबीजसमायोगात् सम्भवः सर्वदेहिनाम्॥[2]

पुनः मनुना उक्तम्-

बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते।
सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता॥[3]

अतएव उत्पत्तिस्थानं क्षेत्रं तत्तुल्या स्त्री, पुरुषश्च ब्रीह्यादिबीजतुल्यः स्मृतः। बीजक्षेत्रयोर्बीजं प्रधानमभिधीयते। यस्मात् सर्वेषां भूतानाम् उत्पत्तौ बीजगतवर्णस्वरूपादिविशेषलक्षणा दृश्यते। अस्मिन् विषये यास्केन उक्तम्-

अङ्गादङ्गात् सम्भवसि हृदयादभिजायसे।
आत्मा वै पुत्रानामासि स जीव शरदः शतम्॥[4]

अत्र लिङ्गवैषम्ये दत्तकपुत्रवत् दत्तककन्यायाः ग्रहणविषये आलोचनं कृतम्। अपि च स्त्रीणां दत्तकस्वीकारे अधिकारोऽस्ति न वेति विचारप्रसङ्गोऽपि द्रष्टव्यः।

**धर्माचरणे नारी**

प्राचीनकाले भारतभूमौ स्त्रीणां, तासां भूमिकाविषये च विविधानि दृष्टिकोणानि सन्ति। ऋग्वेदस्य देवीसूक्ते स्त्रीशक्तिः विश्वस्य साररूपेण निरूपिता अस्ति – या सर्वद्रव्येषु स्त्रीशक्तिविषयकचेतनां वर्धयति, सर्वशक्तिमती सा नित्या अनन्ता च। सा परमार्थतः सत् (ब्रह्म), सर्वस्य आत्मा (परमात्मा) च। अपि च कतिपयेषु उपनिषत्सु, शास्त्रेषु, पुराणेषु च – विशेषतः देव्युपनिषदि, देवीमाहात्म्ये, देवीभागवतपुराणे च नारी सर्वातिशक्तिशालिनी, शक्तिदायिनी इत्येवं रूपेण पूज्यते। वाक्सूक्ते नारी यज्ञीयानां प्रथमाऽसीदिति प्रथिताऽस्ति। अतः पूजाकर्मणि, यज्ञकर्मणि च नारीणामधिकारः अस्ति।[5]

“धर्ममधीयीत” इत्युक्ते धर्मज्ञानं – यः आत्मा, ब्रह्म, मोक्ष इत्यादिशिक्षां यच्छति। यदि धर्मः सर्वजनहिताय, मोक्षमार्गाय च अस्ति, तर्हि तत्र लिङ्गभेदेन निषेधः अयुक्तः स्यात्। “सा विद्या या विमुक्तये”[6] – यया विद्यया मोक्षः प्राप्यते, सा एव विद्येति। एषा विद्या केवलं पुरुषाणां न, अपि तु सर्वेषां हिताय प्रतिपद्यते। स्त्रीः यदि धर्मम् अधीयीत, तर्हि सा स्वधर्मं, स्वकर्तव्यं, न्यायम्, अन्यायं च स्पष्टतया बोद्धुं शक्नुयात्।

स्त्री शुद्धा पवित्रा च भवेत् यज्ञञ्च कुर्यात्।[7] स्त्रियः धार्मिकाः आसन्, स्त्रीः पत्न्या सह उपविश्य यज्ञं करोति स्म। स्त्रियं विहाय यज्ञकार्यमपूर्णं भवति स्म। यज्ञे पत्नीं विना पुरुषस्याधिकारो नासीत्। पुनः भर्तुः कस्याश्चित् पत्न्या रजोयोगादिना अनुपस्थितावपि, पत्न्यन्तरेण यज्ञनिष्पत्तिः, तथा न स्त्रीणां भर्त्रा विना यज्ञसिद्धिः। नापि भर्तुरनुमतिमन्तरेण व्रतोपवासौ किन्तु भर्तुः परिचर्ययैव स्त्रीः स्वर्गलोके पूज्यते।[8]

---

[2] मनु.सम् –9.33

[3] तत्रैव – 9.35

[4] निरुक्तम्- 4.3

[5] अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्॥
(ऋग्वेदः - १/१२५/३)

[6] तत्कर्म यन्न बंधाय सा विद्या या विमुक्तये।
आयासायापरं कर्म विद्यान्या शिल्पनैपुणम्॥
(विष्णुपुराणम् – १.१९.४१)

Read more at:
https://panchjanya.com/2021/08/01/183252/bharat/sa-vidya-or-vimuktaye/

[7] शुद्धाः पूता योषितो यज्ञिया इमाः। (अथर्व.– ११.१.१७)

[8] नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषितम्।

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

यतोहि विधवानां स्त्रीणां भर्तुरभावे यथा विनियोगानधिकारः इति समर्थनात् न पुत्रपरिग्रहे अधिकारः इति।

पुत्रपरिग्रहविधौ अपुत्रेणैव कर्तव्यः इति 'अपुत्रेणे'ति पुंस्त्वश्रवणात् न स्त्रियाः अधिकार इति गम्यते। अपि च विधवायाः भर्तुः अभावेन अनुज्ञाप्राप्तेः असम्भवात् स्त्रियाऽनधिकार इति विचारितम्। वसिष्ठेनोक्तं -

'न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञाद्भर्तुरिति'[9]

तदा विधवाया ब्रह्मचर्याचरणेन अलोकतापरिहारोक्तेः प्रयोजनाभावादेव पुत्रपरिग्रहाभावः सिध्यति इति मनुना उक्तम्- ब्रह्मचारिणी नारी ब्रह्मचर्यपालनेन स्वर्गलोकं प्राप्तुं समर्था।[10]

**पारलौकिककर्मणि अधिकारः**

यथा पिण्डोदकाद्युपकारितया औरसपुत्राद्यभावे दत्तकादिकरणं तथा स्वपुत्रद्वारा पिण्डोदकाद्युपकारितया औरसकन्याभावे दत्तककन्याग्रहणं कर्तुं शक्यते इति व्यवस्थापयितुं विचारः प्रस्तूयते। अस्या औरसकन्याया दानादिविधौ 'पिता दद्यात् स्वयं कन्यां भ्राता वानुमतेः पितुः'[11] इत्यादिवचनबोधितदानादिविधौ इत्यर्थः। वस्तुतस्तु लिङ्गभेदे जातसन्तानाः उभयः शुक्रशोणितसम्भवः मातापितृनिमित्तत। अतः कन्याया अपि शुक्रशोणितसम्भवत्वसद्भावात् उद्देश्यविशेषणत्वेन पुंस्त्वाविवक्षायां तद्वचनबोधितदानादिविधावित्यर्थः।

**दृष्टान्तस्थापनम्-**

दुहितृप्रतिनिधिविषये पुराणेषु लिङ्गदर्शनानि उपलभ्यन्ते। तत्र रामायणे बालकाण्डे दशरथं प्रति सुमन्त्रस्य सनत्कुमारोक्तभविष्यानुवादो लिङ्गम्। पुनः 'नापुत्रस्य लोकोऽस्ति' इति वचने 'पुत्र' इति पदस्य विश्लेषणं कर्तुं शक्यते। 'भातृपुत्रौ स्वसृदुहितृभ्याम्' इति पाणिनीयसूत्रेण अत्र दुहितृपुत्रयोः पदयोः एकशेषवृत्तिः भवति। तत्र दत्तकपरिग्रहवत् दौहित्रप्रतिनिधिः उपलभ्यते।

शास्त्रे दत्तकविषये बहवो व्यवहाराः प्राप्यन्ते। शतपथब्राह्मणे उच्यते नारी पुरुषस्य अर्धभागोऽस्ति। यतो हि पत्नीं विना पुरुषः सन्तानलाभे असमर्थः सन्तानं च विना पुरुषोऽपूर्णोऽस्ति – 'अर्धो ह वा एष आत्मनो यज्जाया तस्माद्यावज्जायां न विन्दते नैव तावत् प्रजायतेऽसर्वो हि तावद् भवति'[12]

**उपसंहारः**

अस्य शोधप्रबन्धस्य मुख्यविषयः धर्मशास्त्रीयदृष्ट्या दत्तकप्रथायां विद्यमानं लिङ्गवैष्यम्यं सम्यगालोच्य तस्य सामाजिक-धार्मिकप्रासङ्गिकतानिर्धारणम्। स्मृतिशास्त्रेषु पुत्रस्य पिण्डोदकक्रियासाधनत्वं प्रधानतया प्रतिपादितं, येन दत्तकविधानं मुख्यतः पुरुषसन्तानपरकं जातम्[13]। अस्य दृष्टिकोणस्य परिणामस्वरूपं दत्तककन्यायाः तथा स्त्रीणां दत्तकग्रहणाधिकारः सीमितः इव दृष्टः।

तथापि वेदोपनिषत्पुराणादिषु नारीणां धर्मे, यज्ञे, आध्यात्मिकसाधनायां च अनिवार्यं स्थानं स्पष्टतया

पतिं शुश्रूषते येन तेन स्वर्गे महीयते। ( मनुसंहिता- ५.१५५)

[9] वसिष्ठधर्मशास्त्रम् – १५.३

[10] मृते भर्तरि साध्वीस्त्री ब्रह्मचर्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः।। ( मनु. सम्- ५.१६०)

[11] मनु. सम्- ५.१५१

[12] शत.ब्रा – ५.२.१.१०

[13] मनुस्मृतिः – ९.१३८, अत्र दायभागे पुत्रस्य प्रधानत्वं प्रतिपादितम्

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

उपलभ्यते[14]। नारी शक्तिरूपेण, यज्ञकर्मणां सहकारिणीरूपेण च स्वीकृता, यस्मात् पत्न्या विना यज्ञसिद्धिरपि न सम्भवति[15]। अतः धर्मस्य लक्ष्यं यदि सर्वजनहिताय मोक्षप्राप्तये च भवति, तर्हि तत्र लिङ्गभेदाधारितो निषेधः शास्त्रीयन्यायेन दुर्बलः इति मन्यते।

एवमेव शास्त्रेषु दत्तकविधौ यत्र पुत्रप्रतिनिधित्वस्य कल्पना दृश्यते, तत्रैव सन्तानसामान्यत्वदृष्ट्या कन्यायाः प्रतिनिधित्वं नितान्तम् असङ्गतं न भवति[16]। मातृपित्रोभयनिमित्तत्वेन उत्पन्नायाः कन्यायाः धार्मिकमहत्त्वं न्यूनं नास्ति इति भावः अनेकैः शास्त्रीयसन्दर्भैः समर्थ्यते।

अद्यतनसमाजे परिवर्तितसामाजिकसंरचनायां नारीशिक्षा, आत्मनिर्भरता, सामाजिकदायित्वं च विशेषतया दृष्टिगोचराः भवन्ति। अतः दत्तकप्रथायाः शास्त्रीयाधारान् अवलम्ब्य आधुनिकमानवाधिकारदृष्ट्या पुनर्व्याख्या अपेक्षिता।[17] दत्तककन्यायाः तथा स्त्रीणां दत्तकग्रहणाधिकारस्य स्वीकारः न केवलं नारीकल्याणस्य साधनम्, अपि तु समाजस्य समतामूलकविकारस्य अपि आधारः भविष्यति। एतदेव अस्य शोधप्रबन्धस्य अन्तिमनिष्कर्षः।

## सहायकग्रन्थसूची

**आङ्गल-ग्रन्थाः –**


- Altekar, A.S. (2021, 12th Reprint, Second Edition ). *The position Of Women in Hindu Civilization* (Printed). New Delhi : Motilal Banarasi Dass Publishing House.
- Banerji, S. C. (1999, First *Edition* ). *A History of Dharmaśāstra* (Printed). Delhi : Abhinava Publishers
- Dasgupta, Mou. (2018, First Edition). *Women in Ancient India: Myriad Voice* (Printed). Kolkata: Sanskrit Pustak Bhandar.
- Kane, P. V. (1947, First Edition). *History of Dharmaśāstra* (Volume – I & III), (Printed). Poona : Bhandarkar Oriental Research Institute.
- Ram, Tulsi (Translator). (2013, First Edition). *Atharva-veda* (Volume – II & II), (Printed). Delhi : Vijaykumar Govindaram Hansanand.
- Swami, Krishnanada (Translator). (2011, First Edition). *The Chhandyogya Upanishad*, (Printed). Garhwal : The Divine Life Society.
- Willson, H. H. (Translator). (1946). *Rig-Veda* (Volume – I), (Printed). Bangalore City : The Bangalore Printing and Publishing Company Limited.


**वङ्ग-भाषा-निबद्ध-ग्रन्थाः -**


- বন্দ্যোপাধ্যায়, অশোক কুমার।(২০১৪, নবম সংস্করণ)। *শ্রাদ্ধতত্ত্বম্* (স্মার্ত রঘুনন্দন ভট্টাচার্য প্রণীত)। কলকাতা : সদেশ।


[14] ऋग्वेदः १.१२५.३ देवीसूक्ते नारीशक्तेः सार्वत्रिकमहत्त्वं वर्णितम्

[15] मनुस्मृतिः ५.१५५, यज्ञे पत्न्याः अनिवार्यता प्रतिपादिता

[16] याज्ञवल्क्यस्मृतिः, व्यवहाराध्यायः , पुत्रप्रतिनिधित्वभावस्य विवेचनम्

[17] विष्णुपुराणम् १.१९.४१, सा विद्या या विमुक्तये इति समत्वाधारितधर्मदृष्टिः

- বন্দ্যোপাধ্যায়, মানবেন্দু। (২০১৩, প্রথম প্রকাশ)। *হিন্দুশাস্ত্রমতে শ্রাদ্ধসংস্কার* (মুদ্রিত)। কলকাতা : সংস্কৃত পুস্তক ভাণ্ডার।
- মনু। (২০১৬, তৃতীয় সংস্করণ )। *মনুসংহিতা* (মনু প্রণীত), (মুদ্রিত)। বন্দ্যোপাধ্যায়, মানবেন্দু (সম্পাদক)। কলকাতা: সংস্কৃত পুস্তক ভাণ্ডার।
- (১৩৮৫ বঙ্গাব্দ, প্রথম প্রকাশ)। *ঋগ্বেদসংহিতা* (প্রথম খণ্ড), (মুদ্রিত)। বন্দ্যোপাধ্যায়, রমেশ চন্দ্র (সম্পাদক)। কলকাতা: হরফ প্রকাশনী।
- যাজ্ঞবল্ক্য। (১৪০৭ বঙ্গাব্দ, প্রথম সংস্করণ)। *যাজ্ঞবল্ক্যসংহিতা, ব্যবহার অধ্যায়* (মুদ্রিত)। বসু, সুমিতা (সম্পাদক)। কলকাতা : সংস্কৃত পুস্তক ভাণ্ডার।
- শীলভদ্র, ভিক্ষু। (২০২০, চতুর্থ সংশোধিত সংস্করণ)। *থেরীগাথা* (মুদ্রিত)। কলকাতা : মহাবোধি বুক এজেন্সী।
- শ্রাবণ, রাজীব। (২০২২, প্রথম প্রকাশ)। *আর্যনারী* (মুদ্রিত) ।কলকাতা: তুহিন প্রকাশনী।

**संस्कृत-हिन्दी-ग्रन्थाः -**

- (१८३६ शकाब्दः)। *बृहदारण्यकोपनिषत्,* (मुद्रितः)। आप्टे, हरिनारायणः (सम्पा.)। पुणा : आनन्दाश्रम मुद्रणालय।
- चन्द्र, सोतीवीरेन्द्रः। (२००९)। *भारतीय संस्कृति में स्त्रियों की स्थिति* (मुद्रित)। नइ दिल्ली : डि. के. प्रिन्टओर्यार्ल्ड।
- सिंहः, अमरः। (२०१९)। *अमरकोषः,* (मुद्रितः)। जोशी, कन्हैयालालः (सम्पा.)। नइ दिल्ली : चौखाम्भा ओरियेन्टालिया।
- द्विवेदी, रमेशकुमारः। (२००२, प्रथमसंस्करणम्)। *भारतीयसंस्कृतौ प्रवजितनारीणामवदानम्* (मुद्रितम्)। वाराणसी : सम्पूर्णानन्द-सस्कृत-विश्वविद्यालयः।
- नारदः। (प्रकाशावर्षः अनुपलब्धः)। *नारदस्मृतिः* (मुद्रिता)। वर्मा, रामकुमारः (सम्पा.)। मेरठ : डायनामिक् पावलिकेशनस्।
- वेदव्यासः। (२००९)। *भागवत पुराण,* (मुद्रित)। विनय (सम्पादकः)। नइ दिल्ली : डायमण्ड् पोकेट् वुक्स्।
- वेदव्यासः। (२०१८)। *विष्णु पुराण* (मुद्रित)। विनयः (सम्पा.)। नइ दिल्ली : डायमण्ड् पोकेट् वुक्स्।
- (२०१५)। *यजुर्वेद* (मुद्रितः)। व्यास, रेखा (सम्पा.)। नइ दिल्ली : संस्कृत साहित्य प्रकाशन।
- (२०१६)। *ऋग्वेदः* (मुद्रितः)। शर्मा, गंगासहायः (सम्पा.)। नइ दिल्ली : संस्कृत साहित्य प्रकाशन।
- (२००८)। *ऋग्वेदः* (मुद्रितः)। शर्मा, भीष्मदत्तः (सम्पा.)। नइ दिल्ली : चौखम्बा पाव्लिसिं हाउस्।

**अन्तर्जालोत्साः –**

- https://ochs.org.uk/lecture/how-did-unmarried-women-live-in-the-%E1%B9%9Bg-vedic-age-mt19/ (Date of accession – 26-07-2025)
- https://panchjanya.com/2021/08/01/183252/bharat/sa-vidya-or-vimuktaye/ (Date of accession – 24-07-2025)
- https://www.shdvef.com/wp-content/uploads/2021/11/%E0%A4%9B%E0%A4%BE%E0%A4%A8%E0%A5%8D%E0%A4%A6%E0%A5%8B%E0%A4%97%E0%A5%8D%E0%A4%AF%E0%A5%8B%E0%A4%AA%E0%A4%A8%E0%A4%BF%E0%A4%B7%E0%A4%A4%E0%A5%8D.pdf (Date of accession – 26-07-2025)

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

# भारतीयसंस्कृतौ संस्कृतस्य स्थानम्

**सुशान्त-मण्डलः**
**शोधच्छात्रः, साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः**
**दिल्ली**

**प्रबन्धसारः**

*व्यक्तेः समाजस्य राष्ट्रस्य च निर्माणे संस्कृतेः महद् योगदानं भवति। राष्ट्रेण सह संस्कृतेः अन्योन्याश्रयो नाम योगः श्रूयते। राष्ट्रेण स्वीया संस्कृतिः निर्मीयते संस्कृतिरेव वा स्वयं राष्ट्रविशेषं विनिर्मातीति वक्तुं न शक्यते। परन्तु एतत् निश्चयेन वक्तुं शक्यते यत् संस्कृतेः सुरक्षां विना राष्ट्रस्य सुरक्षा नास्ति। संस्कृतिरेव वस्तुतः राष्ट्रस्य प्राणप्रदात्री भवति। राजनैतिकः पराभवः तथा कष्टाय न भवति यथा सांस्कृतिकः पराभवः। बहवः वैदेशिकाः आक्रमणं कृतवन्तः। राजनैतिके पराभवे सत्यपि सांस्कृतिकदृष्ट्या भारतं कदाचिदपि पराभूतं नाभूत्। संस्कृताध्ययनेन सह संस्कृतेरध्ययनमपि भारतीयानामस्माकं कर्त्तव्यं भवति।*

*भारतीयसंस्कृतेर्नामान्तरम् आर्यसंस्कृतिः हिन्दूसंस्कृतिर्वापि भवति। यद्यपि भारते न केवलं हिन्दवः सन्ति, तथापि प्राधान्येन तथा व्यपदेशो भवति। आर्याणाम् आदिस्थानविषये विद्वत्सु वैमत्यं दृश्यते। भारतमेव तेषामार्याणामादिस्थानमिति वयं मन्यामहे। किन्तु भारताद्बहिः मध्य-एशियादिस्थानमपि आर्याणामादिस्थानरूपेण कैश्चिदुपपाद्यते। 'कृण्वन्तो विश्वमार्यम्' इति वैदिक उद्घोषस्तत्र उभयथापि चरितार्थतां गच्छति।*

*कस्यचिदपि राष्ट्रस्य स्वकीया काचिदेका संस्कृतिः भवति। भारतीया संस्कृतिस्तत्र किंस्वरूपा इति प्रश्नः जागर्ति। भारतस्य सांस्कृतिकं स्वरूपं सर्वथैव सर्वदैव च गौरवास्पदं विलोक्यते। किन्तु साम्प्रतं पाश्चात्यप्रभावेण स्थितिश्चिन्तनीया भवति। तथापि सम्पूर्णेऽपि जगति साम्प्रतमपि भारतीयसंस्कृतेः वैजयन्ती दोधूयते। बहवो वैदेशिकाः भारतीया संस्कृतिः सर्वोत्तमा इति अङ्गीकुर्वन्ति। भारतीयां संस्कृतिं परिचेतुं ते दूरतरादपि स्वदेशादत्र. समागच्छन्ति। सेयं महनीया भारतीया संस्कृतिः सकलपापप्रक्षालिनी पुण्यसलिला भागीरथीव प्रतीयते, या विभिन्नान्नपि नदीनदान् सागरं प्रापयति।*

**कुञ्चीशब्दाः- भारतीयसंस्कृतिः, आर्यसंस्कृतिः, हिन्दूसंस्कृतिः, राष्ट्रं, सांस्कृतिकः पराभवः चेत्यादयः।**

***************************************************************************

**उपक्रमः-**

भूषणार्थे सम्-पूर्वकस्य कृधातोः प्रयोगे भवति सकारागमः। तेन च "सम्+कृतिः = संस्कृतिः" इत्येवं निष्पन्नः संस्कृतिशब्दः कस्याश्चिन्मनुष्यजातेः गौरवसूचकं कार्य्यजातमेव बोधयति। भारतीयसंस्कृतेः स्वरूपं विज्ञातुं प्रथमं संस्कृतिपदार्थः विज्ञातव्यो भवति। 'सम्' इत्युपसर्गपूर्वकं 'डुकृञ् करणे' इत्यनेन धातोः स्त्रियां 'क्तिन्' प्रत्यये सुडागमे च संस्कृतिशब्दो निष्पद्यते। सम् कृ क्तिन् इति संक्षेपेण तत्रोच्यते। तत्र 'सम्' इत्युपसर्गः 'सम्परिभ्यां करोतौ भूषणे' इति सूत्रेण क्रियार्थके भूषणेऽर्थे भवति। तस्मात् संस्कृतिः मानवानां संस्कारपरां कामपि जीवनपद्धतिं लक्षयति। पशुजीवनं प्राकृतिकं भवति। तद्विपरीतं मानवजीवनं सांस्कृतिकं भवति। जीवनं विकृतं मा भूदित्येतदर्थं मानवसमाजे संस्कृतिरनिवार्या भवति। तेन "संस्क्रियते यया सा संस्कृतिः" इति वक्तुं युज्यते। भारतीयानां मनुष्याणामेवंविधं गौरवसूचकं कार्य्यजातं भारतीयसंस्कृतिशब्देन व्यवदिश्यते। तेन हि धर्मसाधने वा, शिक्षाक्षेत्रे वा, समरविज्ञाने वा,

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

वाणिज्यव्यापारे वा नव-नवयन्त्राणां विरचने वा, सदाचारे वा भारतवर्षीया मानवाः यद् यद् वैशिष्ट्यं प्रदर्शितवन्तः, तत्तत्सर्वमेव भारतीयसंस्कृतिशब्देन बुध्यते। गीतिशास्त्रे, नाट्यविज्ञाने, दार्शनिक-चिन्तायां वापि यानि गौरवसूचकानि वैशिष्ट्यानि प्रदर्शितानि, तान्यपि ज्ञायन्ते संस्कृतिशब्देनेति व्यापक एवार्थो भारतीय संस्कृतिशब्दस्य ।

संस्कृतं संस्कृतिः संस्कारश्चेति त्रयः शब्दाः श्रूयन्ते। तत्र संस्कृतिपदार्थं बोद्धुं संस्कृतवाङ्मयस्याध्ययनं संस्काराणां परिपालनं चावश्यकं भवति। संस्कृतं संस्कारं च तिरस्कृत्य संस्कृतेः परिपालनं न युज्यते। संस्कारस्तत्र देवर्षिपितृपरायणतामधिकृत्य प्रवर्तते। पितृपरायणताविषयकं मनोः सांस्कृतिकं वचनमस्ति-

**येनास्य पितरो याता येन याता पितामहाः।**
**तेन यायात् सतां मार्गे तेन गच्छन् न रिष्यते[1] ॥**

संस्कृताध्ययनं विना भारतीयसंस्कृतेरवबोधो न भवतीति समेषां श्रुतचरं स्यात्। संस्कृतवाङ्मये पदे पदे संस्कृतेः स्वरूपं परिभाषितं भवति। उदाहरणाय देव्यथर्वशीर्षे प्रोक्तम्-

**"अहं राष्ट्री, संगमनी,**
**वसूनां चिकितुषी,**
**प्रथमा यज्ञियानाम्।"[2]**

इति वैदिकं वाक्यं संस्कृतेः स्वरूपनिर्धारकं भवति। अत्र 'राष्ट्री' इति पदमधिकृत्य संस्कृतेः यत्स्वरूपं निष्पन्नं भवति, तदनुसारेण राष्ट्रियतां विना संस्कृतिः न सम्भवति। कस्यचिदपि राष्ट्रस्य स्वीया कापि संस्कृतिः भवति। अत एव सांस्कृतिकानां जनानां राष्ट्रियस्वरूपनिर्माणे योगदानं स्वीक्रियते। कस्याश्चिदपि संस्कृतेः स्वकीयं राष्ट्रियं धरातलं नूनमेव भवति। सा च संस्कृतिः 'संगमनी' प्रोक्ता। तदनुसारेण संस्कृतिरेव राष्ट्रस्य ऐक्यं सम्पादयति। 'वसूनां चिकितुषी' इति कथनेन संस्कृतेः समृद्धिकारिता प्रतीयते। संस्कृतिविहीनो जनः धनाढ्यः सन्नपि रिक्तस्तिष्ठति। संस्कृतिरेव वास्तविकं वित्तं प्रति जनं प्रेरयति। 'प्रथमा यज्ञियाना'मिति यदुक्तं, तेन जीवने संस्कृतेः सर्वातिशायि महत्त्वं प्रकटितं भवति। जीवनयज्ञे संस्कृतिरेव प्राथम्यमर्हति। संस्कृतिं विना जीवनं यज्ञमयं कथमपि कर्तुं न युज्यते। तदेवं पूर्वोक्ते वेदवाक्ये संस्कृतिरेव देवी भूत्वा स्वकीयं स्वरूपं चतुर्धा प्रकटयति।

भारतीयसंस्कृतेर्मूलं वेदाः सन्ति। वैदिकं मूलमादाय भारतीया संस्कृतिः युगानुरूपं स्वरूपमाविष्कुर्वाणा विकसति। वैदिकमन्त्रद्रष्टार ऋषयः साक्षात्कृतधर्माणोऽभूवन्। अत एव 'वेदोऽखिलधर्ममूलमि'ति कथ्यते। भारतीयसंस्कृतेः धार्मिकः मौलिकश्च सम्बन्धः वेदैः सह सदैव स्वीक्रियते। वैदिकमन्त्रैरेव वस्तुतः भारतीया संस्कृतिः विनिर्मिता भवति। परवर्तिकाले बौद्ध-जैन यवन-पाश्चात्यादिकानि सांस्कृतिकानि तत्त्वानि सम्मिल्य तामेव वेदमूलकभारतीयसंस्कृतिं विकासयन्ति।

भारतीयसंस्कृतेः मौलिकाः सर्वेऽपि सिद्धान्ताः वेदेष्वेव दृश्यन्ते। आस्तिकता, सनातनता, ईश्वरास्तित्ववादः, कर्मवादः, जन्मान्तरवादः, यज्ञपरता, वर्णाश्रमधर्मव्यवस्था चेत्यादीनि सांस्कृतिकतत्त्वानि वेदोदितानि सन्ति। संस्कृतेः स्वरूपाधायकं तत्त्वमपि मौलिकरूपेण वेदेष्वेव लभ्यते। यजुर्वेदे प्रोक्तम्-

---

[1] मनुस्मृतिः- ४/१७८

[2] देव्यथर्वशीर्षः- ३

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम्।**
**सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः ॥**[3]

अत्र 'संस्कृतिर्विश्ववारा' इत्युच्यते। तेन संस्कृतेः विश्वव्यापकं स्वरूपमपि निर्धारितं भवति। यद्यपि संस्कृतिः राष्ट्रियतामधिकृत्य प्रवर्तते, तथापि तत्र विश्ववरणसामर्थ्यमपि भवतीत्यर्थः। अथ 'संस्कृतेः प्रवाहः अविच्छिन्नः भवति' इत्यपि पूर्वोक्तेन मन्त्रेण सिद्ध्यति। एवमेव ऐतरेयब्राह्मणे प्रोक्तम्-

**आत्मसंस्कृतिर्वाव शिल्पानि च्छन्दोमयं वा।**
**एतैर्यजमान आत्मानं संस्कुरुते।**[4]

अत्र संस्कृतौ आध्यात्मिकता संस्कारपरता च प्रतिपाद्यते। सर्वाणि शिल्पानि सर्वाश्च कलाः (यतो वेदे कलाशिल्पे पर्यायभूते स्तः) आत्मनः संस्काराय भवन्ति, आत्मसंस्कृतिरूपेण च परिगण्यन्ते। आत्मनः संस्काराय यत्किमपि क्रियते, तत्सर्वमपि संस्कृतिपदवाच्यं भवतीति निर्गलितोऽर्थः ।

पुरातनानां मानवानामाचारकलापं तेषां शिक्षादि-संस्कृतिगतानि वैशिष्ट्यानि च ज्ञातुं शक्नुवन्ति मानवाः प्राचीनलेखेभ्य एव। यद्यपि लोकपरम्परयापि तादृशं व्यापारजातं कथञ्चिज्ज्ञातुं शक्यते, तथापि तत्र भ्रान्तिविजृम्भितमपि स्थातुमर्हतीति न खल्वेष द्वितीयप्रकारो नितरां प्रामाण्यमावहति। प्राचीनग्रन्थेषु, शिलालिपिषु, ताम्रफलकेषु च दृश्यन्ते यानि निदर्शनानि पुरातनसंस्कृतेः तान्येव प्रमाणत्वेन गृह्यन्ते सुधीभिः। वेदा एव प्राचीनतमाः ग्रन्था जगत्यस्मिन्निति स्वीक्रियते विभिन्नदेशवासिभिः सुधीभिरपि। ऋग्वेदे, यजुर्वेदे, सामवेदे, अथर्ववेदे च सर्वत्रैव दृश्यन्ते सहस्रशः प्रमाणानि भारतीयसंस्कृतेः। कथं खलु अस्माकं पूर्वपुरुषाः धर्माचरणं चक्रुः, कीदृश आसीत्तेषां व्यवहारः सामाजिकेषु, राष्ट्रियेषु च विविधेषु व्यापारेषु इति सर्वमेव सुष्ठु समवगन्तुं शक्यते वेदग्रन्थेभ्यः। वेदोत्तरकालेष्वपि स्मृतिषु, पुराणेष, इतिहासग्रन्थेषु, दर्शनशास्त्रेषु, तन्त्रेषु, काव्यादिषु च ग्रन्थेषु बहुशः दृश्यन्ते आर्याचारप्रमाणानि। आर्य्याचारो भारतसंस्कृतेरभिन्न इत्यत्र नास्ति संशयावकाशः।

अनधीत्य वेदान्, अनधीत्य च स्मृति-पुराणेतिहास-दर्शन-काव्यादीनि न कोऽपि ज्ञातुमर्हत्ति भारतसंस्कृतिं यथार्थतः निःसन्देहश्च। यद्यपि बौद्धयुगे पालिभाषायापि केचन ग्रन्था विरचिता आसन् केचिच्च शिलालेखाः निर्मिताः, कानिचित्ताम्रफलकानि च लिखितानि, तथापि तादृशमध्ययुगेऽपि संस्कृतभाषैव बाहुल्येन व्यवहृतासीदित्यवगम्यते तत्कालीनेभ्य एव ग्रन्थेभ्यः शिलालेखेभ्यश्च। स्मरणातीतकालादारभ्य अद्यावधि भारतवर्षे संस्कृतभाषया रच्यन्ते पुस्तकानि सर्वेष्वेव विषयेषु। भारतीयज्ञानराशेराकरस्वरूपिणी खल्वियं संस्कृतभाषा।

ऋग्वेदादवगच्छामो वयं तदानीन्तनानां भारतीयानामुपासनाप्रकारं, यजुर्वेदाच्च तेषां यज्ञसाधनप्रणालीम्। सामवेदादथर्ववेदाच्च ज्ञायन्ते धर्मसाधनप्रकाराः विस्तरशः। सर्वेभ्य एव वेदेभ्यो ज्ञायन्ते, तदानीन्तना भारतीयाः कया रीत्या विवाहादिकानाचारान् सम्पादितवन्तः, कीदृश आसीत्तेषां परिच्छदप्रकारः, कीदृशी च तेषां युद्धप्रणालीति। दुर्गादिनिर्माणविषये, स्वर्णालङ्कारादि-धारणे रथ-खड्ग-धनुःशरादिनिर्माणे, अश्वचालने,

---

[3] यजुर्वेदः- ७/१४

[4] ऐतरेयब्राह्मणः- ६/५/१

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

एवंविधेषु व्यापारान्तरेषु च यादृशमासीत्तेषां चातुर्य्यं, तदपि ज्ञायते वेदादिसंस्कृतभाषामयेभ्य एव ग्रन्थेभ्यः। वेदोत्तरकालीनेभ्यः स्मृतिपुराणादि-ग्रन्थेभ्यश्च ज्ञायन्ते तत्तत्-कालीना भारतीयाः विविधाः संस्कृतिव्यापाराः। वाल्मीकेः रामायण-मितिहासमध्य एव गण्यते कैश्चित्। उक्तञ्च ब्रह्मवैवर्त्तपुराणे, श्रीकृष्ण-जन्मखण्डे-

**"इतिहासो भारतञ्च वाल्मीकिकाव्यमेव च।"**[5]

इति। संस्कृतभाषामयं महाभारतमितिहासग्रन्थ इति प्रायेण सर्वैरेव स्वीक्रियते। न केवलमुल्लिखित-ब्रह्मवैवर्तपुराणवचनादेव तज्ज्ञायते महाभारतमध्येऽपि दृश्यते सत्यस्यास्य स्वीकृतिः, उक्तञ्चादिपर्वणि-

**"तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम्।**
**इतिहासमिमञ्चक्रे पुण्यं सत्यवतीसुतः॥"**[6]

इति। रामायणात्, महाभारताच्च सुष्ठु समवगम्यन्ते विभिन्नाः प्रकारास्तदानीन्तनभारतीयसंस्कृतेः। इतिहासमज्ञात्वा यथा कश्चित् कस्यचिद्देशस्य यथार्थविवरणं ज्ञातुं नार्हति, तथैव महाभारतादिग्रन्था-ननधीत्य भारतीय-व्यापारकलापमपि ज्ञातुं न शक्नोति कश्चिन्मानवः।

वर्णाश्रम एव भारतीयानां प्राचीनतमो धर्मः। स चाद्यापि वर्तते देशेऽस्मिन् प्राधान्येन। एतस्य धर्मस्य सर्वे ग्रन्थाः केवलं संस्कृत-भाषयैव विरचिताः। हिन्दूनां धर्मकर्मसु प्रयोज्याः सर्वे एव मन्त्राः रचिताः अनयैव भाषया। अतो मन्त्रार्थज्ञानलाभाय, धर्मसाधन-प्रकारपरिचयार्थञ्च विद्यते प्रयोजनं संस्कृतभाषाज्ञानस्य, जैनानां बौद्धानाञ्च धर्मग्रन्थाः बाहुल्येन रचिताः संस्कृतभाषया। आञ्चलिक-भाषाणां पालि-प्राकृतादीनां बाहुल्येन प्रसारो नासीदिति भूतार्थमवगम्य सर्वजनपरिचितया बहुदेशविस्तृतया संस्कृतभाषयैव स्व-स्वधर्ममतानि प्रचारितानि जैन-बौद्धधर्म्मयोरपि आचार्यवर्यैः ग्रन्थादिप्रणयनमुखेन।

स्वीक्रियते खलु सर्वैरेव विबुधधुरन्धरैः-संस्कृतग्रन्थान् सम्यगनधीत्य, प्राचीनभारतस्येतिहासो नैव यथार्थतया रचयितुं शक्यते इति। ये खलु ऐतिहासिकाः संस्कृतं सम्यगज्ञात्वैव आर्य्यजाते-रादिवासभूमिं निर्णेतु प्रवृत्ताः, सर्वे एव ते भ्रान्तमेव मतं प्रकाशितवन्तः। अहो दुःखम्! अद्यापि दृश्यते पाठ्यपुस्तक-सहाय-केन तदेव भ्रान्तं मतं प्रचार्य्यते विमलमतिषु विद्यार्थिषु सत्यवृत्त-रूपेण। एते वदन्ति, आर्य्यजातेरादिवासस्थानं भारताद् बहिः एशिया-महादेश-मध्यभागे वा इउरोप-महादेशमध्यभागे वा कुत्राप्यासीदिति, तस्मादेव स्थानाद् भारतीयानां पूर्वपुरुषाः पारसिकदेशस्थमार्गमनुसृत्य भारत-पश्चिमभागं प्रविश्य सिन्धुनदस्योपत्यकाविभागे चिरं स्थित्वा तत्रैव वेदग्रन्थान् विरचय्य क्रमेण पूर्वाभिमुखमागत्य समग्रमार्यावर्तमधिचक्रुरिति, ततश्च भारतस्य विभागान्तरेष्वपि सञ्जातास्तेषामावासा इति च। वस्तुतस्तु मतस्यास्य समर्थनाय किमपि प्रमाणं न दृश्यते वेदादिषु ग्रन्थेषु। मनुस्मृतेः महाभारतादिभ्यश्चापि ग्रन्थेभ्यो ज्ञायते, भारतवर्षस्य मध्यभाग एवासीदार्याणामादिभूमिरिति। सिन्धो-रुपत्यका तदानीं म्लेच्छदेशरूपेण परिचितासीद् आर्यसमाजे। तत्र कथमपि गन्तुं नेच्छन्ति स्म आर्यपुरुषाः। प्रयोजनविशेषवशेन चेत् केनचिदार्येण तत्र गन्तव्यमासीत्तदा रात्रिसमागमात् प्रागेव प्रत्यावर्त्तनीयमासीत्तेन तस्याः म्लेच्छभूमेः। तदुक्तं मनुना (द्वितीयाध्याये)-

**"हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनापि।**

---

[5] श्रीकृष्णजन्मखण्डः - १३३/२३

[6] महाभारतस्य आदिपर्वणि- १/५४

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

**प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥**[7]

इत्याद्यारभ्य,

**"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।**
**स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः॥"**[8] **इति**

उक्तञ्च महाभारते कर्णपर्वणि (हरिदासीयसंस्करणे) ३४-तमाध्याये-

**"बहिष्कृता हिमवता गङ्गया च बहिष्कृताः ।**
**सरस्वत्या यमुनया कुरुक्षेत्रेण चापि ये ॥**
**पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तरा स्थिताः ।**
**तान्धर्मबाह्यानशुचीन् वाहीकान्परिवर्जयेत् ॥"**[9]

**इति,**

**"पञ्च नद्यो वहन्त्येता यत्र पीलुवनान्युत ।**
**शतद्रुश्च विपाशा च तृतीयेरावती तथा ॥**[10]
**चन्द्रभागा वितस्ता च सिन्धुषष्ठा बहिर्गिरेः ।**
**आरट्टा नाम ते देशा नष्टधर्मा न तान्व्रजेत्॥"**[11]

**इति,**

**"वाहीका नाम ते देशा न तत्र दिवसं वसेत् ॥"**[12]

**इति च**

एतस्मिन् पञ्चनदभूभागे तदानीं किंवृत्ता मानवा निवसन्ति स्म, इत्यपि ज्ञायते महाभारतवचनादेव। तदुक्तं तत्रैव -

**"धानगौडासवं पीत्वा गोमांसं लसुनैः सह ।**
**अपूप-मांसवाट्टानामाशिनः शीलवर्जिताः ॥**[13]
**एवं शीलेषु व्रात्येषु वाहीकेषु दुरात्मसु ।**
**कश्चेतयानो निवसेन्मुहूर्त्तमपि मानवः ॥"**[14] **इति ।**

स्थितेष्वपि एवंविधेषु प्रमाणेषु दुर्दैववशादस्माकं तथाकथिता ऐतिहासिका विदेशागतानेव पूर्वपुरुषान् अस्माकं प्रकाशयन्ति। भ्रमस्यास्य निराकरणाय ज्ञातव्यं संस्कृतमैतिहासिकैः ।

कस्याश्चिन्मनुष्यजातेः संस्कृतिप्रकाराश्च ज्ञायन्ते तेषां साहित्य-ग्रन्थेभ्यः। भारतीय-साहित्यग्रन्थाः स्मरणातीतकालात् प्रभृति संस्कृतभाषयैव निबद्धा विद्यन्ते। यद्यपि पालि-प्राकृतभाषाभ्यामपि मध्ययुगे केचन साहित्यग्रन्था रचिता आसन्, तथापि भाषाद्वयमेतद् वस्तुतः संस्कृतभाषाया एव त्रुटिपूर्णं रूपमिति ज्ञायते तत्तद्भाषास्थितेभ्य एव शब्देभ्यः। एतद्भाषाद्वयञ्च अत्यल्पकालमेव साहित्यरचनाक्षेत्रे प्राबल्यं लेभे। एतस्मात् पूर्वस्मिन् काले, सम्प्रति च दृश्यते संस्कृत-भाषाया एव प्राबल्यम् ।

सर्वा भारतीया भाषाः संस्कृतभाषात एव जनिमापन्नाः। एतासु भाषासु प्रतिशतमशीतिसंख्यका नवतिसंख्यका वा शब्दाः संस्कृतमूलका एव। अतोऽद्यापि केवलां संस्कृतभाषां सुष्ठु समवगम्य कश्चिज्जनो निखिले भारते वर्षे विचरितुमर्हति नतु काञ्चित् प्रान्तीयां भाषामधीत्य। समग्रे भारतवर्षे चेत् कश्चन अखण्डभावः सञ्चारणीयस्तदा तदर्थमपि संस्कृतभाषाया एवाध्ययनमावश्यक्यम् ।

साङ्ख्य-वेदान्त-न्याय-वैशेषिक-योग-मीमांसा-संज्ञकानि षड् दर्शनानि, चार्वाक-बौद्ध-जैनरूपाणि च नास्तिकदर्शनानि सर्वाण्येव संस्कृत-भाषया निबद्धानि। संस्कृतभाषयैव विरचितास्तेषां व्याख्याग्रन्थाः। अतो भारतीय-चिन्ताधाराया अवगत्यर्थमपि विद्यते प्रयोजनं संस्कृत-भाषाज्ञानस्य।

---

[7] मनुस्मृतिः- २/२१

[8] मनुस्मृतिः- २/२३

[9] महाभारतस्य कर्णपर्वणि- ४४

[10] महाभारतस्य कर्णपर्वणि- ४४/३१

[11] महाभारतस्य कर्णपर्वणि- ४४

[12] महाभारतस्य कर्णपर्वणि- ४४

[13] चरकसंहिता- १३

[14] महाभारतस्य कर्णपर्वणि- ४४/१६

ISSN : 2583-2271
Vol. - 5, No. 1: 2025

विशालस्यास्य भारतवर्षस्य विविधप्रान्तेषु निवसन्ति ये विभिन्नभाषाभाषिणो मनुष्यसङ्घाः, तेषु नितरामैक्यं विधातुं विद्यते सर्वाधिकसामर्थ्यं संस्कृतभाषाया एव, तथा संस्कृतमूलत्वाद् भाषाणाम्। यया भाषया उच्चार्य्यन्ते अस्माकं धर्म्मीयमन्त्राः, यया भाषया विरचितानि धर्मशास्त्राणि, अर्थशास्त्राणि, नीतिशास्त्राणि, दर्शन-स्मृति-पुराण-काव्य-व्याकरणादीनि च शास्त्रान्तराणि, यया भाषया निबद्धाः स्मरणातीतकालात् प्रभृति भारतीयानामाचारपरम्पराप्रकाशः, यया भाषया निबद्धः समग्र एव ज्ञानविज्ञानराशिः भारतवर्षस्य, कथं खलु सा संस्कृतभाषा भारतीयसंस्कृतेराकर-स्वरूपिणी न स्यात्? यया भाषया अद्यापि ऐक्यं विधातुं शक्यते शतधा विच्छिन्नासु भारतीयजातिषु कथं नाम सा सम्यगादरणीया न भवेत् ?

अतो वक्तुं शक्यते - संस्कृतभाषां विना भारतीयसंस्कृतिरेव ज्ञातुं न शक्यते मानवैः, न च एकता साधयितुं शक्यते भारतवर्षे भाषामिमां विहायेति। यद्यपि काञ्चन प्रान्तीयभाषामधीत्यापि भारतीयसंस्कृतिरंशतो ज्ञातुं शक्यते, तथापि संस्कृतभाषासाहाय्येन साकल्येन तां ज्ञातुमर्हामो वयमिति स्वीकर्तव्यं भारतीयसंस्कृतौ संस्कृतभाषाया एव स्थानं सङ्गतमिति शम्।

## सहायकग्रन्थसूची


- उपाध्यायः, बलदेवः। (२०१०)। *भारतीयसंस्कृतिः*। काशीः शारदापुस्तकालय।
- सिंहः, राजकिशोरः। (१९८६)। *भारतीयसंस्कृतिः*। आगरा विनोद पुस्तकमन्दिर।
- कल्याणः, सेनगुप्तः। (२०२४)। *मनुस्मृतिः*। कोलकाताः पाण्डुलिपि।
- द्विवेदीः, कपिलदेवः । (२०००)। *वैदिक साहित्य एवं संस्कृति*। वाराणसीः विश्वविद्यालय प्रकाशन।
- नागः, व्रजेन्द्रचन्द्रः। (१९८१)। *चरक संहिताः*। कलकाताः नवपत्र प्रकाशकः।
- दत्तः, रामनारायणः। (२०२३)। *महाभारत*। गोरखपुरः गीताप्रेसः।
- Umesh Kotru, Ashutosh Zutshi। (2015). *Karna The Unsung Hero of the Mahabharata*. Kindle Edition
- Pt. Shree Jagannath Shastri Tailang. (२०११). *मनुस्मृतिः*. Varanasi. The Bharatiya Vidya Prakashan.
- Padmashri Dr. Kapil Deva Dvivedi. (२०१८). *वैदिक साहित्य एवं संस्कृति.* Varanasi. Vishwa Vidhyalay Prakashan.

সবং সজনীকান্ত মহাবিদ্যালয়

তমসো মা জ্যোতির্গময়